उद्रीव वज्रिन्नवतो न सिञ्चते क्षरन्तीन्द्र धीतयोऽम् ॥
प्र चेतन प्रचेतयोऽम् ॥ ६
यद्द नूनं यद्वा यज्ञे यद्वा पृथिव्या मधि ।
अतो नो यज्ञ माशुभिर्महे-
मत उग्र उग्रेभिरा गहोऽम् ॥
रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति ।
येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसोऽम्
इन्द्र द्युम्नाय न इषोऽम् ॥ ७
यद्द नूनं परावति यद्वा पृथिव्यां दिवि ।
युजान इन्द्र हरिभिर्महेमत ऋष्व ऋष्वेभिरा गहोऽम् ॥
अजिरासो हरयो ये त आशवो वाता इव प्रसक्षिणः ।
येभिरप्त्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशेऽम् ॥
राये वाजाय वज्रिवोऽम् ॥ ८
एतावतस्त ईमह इन्द्र सुम्नस्य गोमतः ।
यथा प्रावो मघवन् मेध्यातिथिं
यथा नीपातिथिं धनोऽम् ॥
यथा कण्वे मघवन्मेधे अध्वरे दीर्घनीथे दमूनसि ।
यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियोऽम् ॥

शविष्ठ वज्रिन्नृञ्जसो४म् ॥ ९

एतावतस्ते वसो विद्याम शूर नव्यसः ।
यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजो३म् ॥
यथा कण्वे मघवन् त्रसदस्यवि यथा पक्थे दशव्रजे ।
यथा गोशर्ये असनोर्ऋजिश्वनीन्द्र गोमद्धिरण्यवो३म् ॥

मंहिष्ठ वज्रिन्नृञ्जसो४म् ॥ १०

यथा मनौ सांवरणौ सोममिन्द्रापिबः सुतम् ।
नीपातिथौ मघवन्मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचो३म् ॥
पृषध्रे मेध्ये मातरिश्वनीन्द्र सुवाने अमन्दथाः ।
यथा सोमं दशशिप्रे दशोण्ये शूभरम्भावृजूनसो३म् ॥

चिकित्वो अभि नो नयो४म् ॥ ११

यथा मनौ विवस्वति सोमं शक्रापिबः सुतम् ।
यथा त्रिते छन्द इन्द्र जुजोषस्यायौ मादयसे सचो३म् ॥
पार्षदाणः प्रस्कण्वं समसादयच्छयानं जिव्रिमुद्धितम् ।
सहस्राण्यसिषासद्गवा ऋषिस्त्वोतो दस्यवे वृको३म् ॥

इन्द्रो विदेत मु स्तुषो४म् ॥ १२

य उक्थेभिर्न विम्बते चिकिद्य ऋषिचोदनः ।
इन्द्रं तमच्छा वद नव्यसा मत्यविष्यन्तं न भोजसो३म् ॥

यस्य त्वमिन्द्रस्तोमेषु चाकनो वाजे वाजिञ्छतक्रतो ।
तं त्वा वयं सुदुघा मिव गोदुहो जुहूमसि श्रवस्यवोऽम् ॥
त नूतये हवामहोऽम् ॥ १३

य उक्था केवला दधे यः सोमं धृषितापिबत् ।
यस्मै विष्णुस्त्रीणि पदा विचक्रम उपमित्रस्य धर्मभोऽम् ॥
यस्या अर्कं सप्तशीर्षाण मानृचुस्त्वधातु मुत्तमे पदे ।
स त्वि१मा विश्वा भुवनानि चिक्रदद्दादिज्जनिष्टपौंस्योऽम् ॥
जेतार मपराजितोऽम् ॥ १४

यो नो दाता वसूना मिन्द्रं तं हूमहे वयम् ।
विद्मा ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजोऽम् ॥
यस्मै त्वं वसो दानाय मंहसे स रायस्पोष मिन्वति ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहोऽम् ॥
स नः पर्षदतिद्विषोऽम् ॥ १५

यो नो दाता स नः पिता महाꣳ उग्र ईशानकृत् ।
अयामन्नुग्रो मघवा पुरूवसुर्गोरश्वस्य प्र दातु नोऽम् ।
यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोष मश्नुते ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहोऽम् ॥
क्रतुश्छन्द ऋतं बृहोऽम् ॥ १६

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यतोऽम् ॥
यस्ते त्वं मघवन्निन्द्र गिर्वणः शिक्षो शिक्षसि दाशुषे ।
अस्माकं गिर उत सुष्टुतिं वसो कण्ववच्छृणुधी हवोऽम् ॥
स नः पर्षदतिस्निधोऽम् ॥ १७
कदा चन प्र युच्छस्युभे नि पासि जन्मनी ।
तुरीयादित्य हवनं त इन्द्रिय मा तस्थावमृतं दिवोऽम् ॥
प्र यो ननक्ष अभ्योजसा क्रिविं वधैः शुष्णं निघोषयन् ।
यदेदस्तभ्नीत् प्रथयन्नमूं दिवमादिज्जनिष्ट पार्थिवोऽम् ॥
पूर्वस्य यत्ते अद्रिवोऽम् ॥ १८
यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत् सो अज्यते रयोऽम् ॥
स मिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम् ।
सं शुक्रासः शुचयः सङ्गवाशिरः
सोमा इन्द्र ममन्दिषोऽम् ॥
सुत्र आ धेहि नो वसोऽम् ॥ १९
अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत ।
पूर्वीरृतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षतोऽम् ॥

तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कं मानृचुः ।
अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इन्दवोऽम् ॥
पूर्त्तिः श्रविष्ठ श्रवतोऽम् ॥ २०
उपमं त्वा मघोनां ज्येष्ठं च वृषभाणाम् ।
पूर्भित्तमं मघवन्निन्द्र गोविद
मीशानं राय ईमहोऽम् ॥
नहन्त इन्द्र मवसे सुकृत्यया येषां सुतेषु मन्दसे ॥
यथा संवर्त्ते अमदो यथा क्रश एवास्मे इन्द्र मत्स्वोऽम्
नूनं तं नव्यं सन्न्यसोऽम् ॥ २१
एतत्त इन्द्र वीर्यं गीर्भिर्गृणन्ति कारवः ।
ते स्तोभन्त ऊर्जं मावन् घृतश्चुतं
पौरासो नहन् धीतिभोऽम् ॥
य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे ।
त्वं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहोऽम् ॥
प्र भो जनय वृत्रहोऽम् ॥ २२
आ नो विश्वेषां रसं मधुः सिञ्चन्त्वद्रयः ।
ये परावति सुन्विरे जनेष्वा ये अर्वावतीन्दवोऽम् ॥
पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः ।

आपो वातः पर्वतासो वनस्पतिः
शृणोतु पृथिवी हवो३म् ॥
समन्येषु ब्रवावहो४म् ॥ २३

आ नो विश्वे सजोषसो देवासो गन्तनोप नः ।
वसवो रुद्रा अवसे न आगमच्छृण्वन्तु मरुतो हवो३म् ।
विष्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्वा वसु।
शीष्टेषु चित्ते मदिरासो अंशवो यत्रासोमस्य तृम्पसो३म्॥
शूरो यो गोषु गच्छतो४म् ॥ २४

इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।
आ शन्तमशन्तमाभिरभिष्टिभिरा स्वापे स्वापिभो३म् ॥
आजिपते नृपते त्व मिद्धि नो वाज आ वक्षि सुक्रतो ।
वीती होत्राभिरुत देववीतिभिः ससवांसो विशृण्विरो३म्॥
सखा सुशेवो अद्वयो४म् ॥ २५

यदिन्द्र राधो अस्ति ते माघोनं मघवत्तम ।
तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहो३म्॥
आजितुरं सत्पतिं विष्वचर्षणिं कृधि प्रजास्वाभगम् ।
प्र सू तिरा शचीभिर्ये त उक्थिनः
क्रतुं पुनत आनुषो३म् ॥

एवा ह्यंवैवा हि देवोऽम् ॥ २६

यस्ते साधिष्ठोऽवसे ते स्याम भरेषु ते ।

वयं होत्राभिरुत देवहूतिभिः ससवांसो मनामहोऽम् ॥

वयं त इन्द्र स्तोमेभिर्विधेम व मस्माकं शतक्रतो ।

महि स्थूरं शशयं राधो अक्षयं प्रस्कण्वाय नि तोशयोऽम् ॥

आ यो मन्याय मन्यवोऽम् ॥ २७

सन्ति ह्यर्य आशिष इन्द्र आयुर्जनानाम् ।

अस्मान्नक्षस्व मघवन्नुपावसे

धुक्षस्व पिप्युषी मिषोऽम् ॥

अहं हि ते हरिवो ब्रह्म वाजयुराजिं यामि सदोतिभिः ।

त्वामिदेव तमसे समश्वयुर्गव्युरग्रे मथीनोऽम् ॥

उपो मन्याय मन्यवोऽम् ॥ २८

(अथ वालखिल्यानां यथापाठं शंसनम् *)

अभि प्र वः सुराधस मिन्द्रं मर्च यथा विदे ।

यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षतोऽम् ॥

---

* ऐ० ब्रा० ३भा० ३४७ पृ० १ पंक्तितो द्रष्टव्यम् ।

शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसो३म्॥

आ त्वा सुतास इन्दवो मदा ये इन्द्र गिर्वणः।
आपो नु वज्रिन्नन्वोक्यं१ सरः पृणन्ति शूर राधसो३म्॥

अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठ मीं पिब।
आ यथा मन्दसानः किरासि नः प्र क्षुद्रेव त्मनाधृषो३म्॥

आ नः स्तोम मुप द्रवद्धियानो अश्वो न सोढभिः।
यं ते स्वधावन्त्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयो३म्॥

उग्रं न वीरं नमसोप सेदिम विभूति मक्षितावसुम्।
उद्रीव वज्रिन्नवतो न सिञ्चते क्षरन्तीन्द्र धीतयो३म्॥

यद्ध नूनं यद्वा यज्ञे यद्वा पृथिव्या मधि।
अतो नो यज्ञमाशुभिर्महेमत उग्र उग्रेभिरा गहो३म्॥

अजिरासो हरयो ये त आशवो वाता इव प्रसक्षिणः।
येभिरप्त्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशो३म्॥

एतावतस्त ईमह इन्द्र सुम्नस्य गोमतः।
यथा प्रावो मघवन्मेध्यातिथिं यथा नीपातिथिं धनो३म्॥

यथा कण्वे मघवन्त्सदस्यवि यथा पक्थे दशव्रजे।

Nyāya Kusumāñjali Prakaraṇa, (Text) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—3 @ /6/ each .. .. .. Rs. 3 6
Padumawati Fasc. 1 & 2 .. .. 4 0
Pariçiṣṭa Parvan, (Text) Fasc. 1—5 @ /6/ each 1 14
Pṛthivirāj Rāsā, (Text) Part I, Fasc.1, Part II, Fasc.1—5 @ /6/ .. 2 4
Ditto (English) Part II, Fasc. 1 .. .. .. 0 12
Prākṛta Lakṣaṇam, (Text) Fasc. 1 .. .. 1 8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1—8 ; Vol. II, Fasc. 1—6 ; Vol. III, Fasc. 1—5 @ /6/ each 7 2
Parāçara, Institutes of (English) 0 12
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5—10 ; II, 1—6 ; III, 1—7 ; IV, 1—6 ; V, 1—8, @ /6/ each Fasc. 12 6
Sāṃkhya Sūtra Vṛtti (Text) Fasc. 1—4 @ /6/ each 1 8
Ditto (English) Fasc. 1—3 @ /12/ each 2 4
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/ 0 12
*Taittirīya Āraṇyaka, (Text) Fasc. 2—11 @ /6/ each 3 12
* Ditto Saṁhitā, (Text) Fasc. 9—42 @ /6/ each 12 12
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1—19 @ /6/ each 7 2
Tattva Cintāmaṇi, (Text) Vol, I, Fasc. 1—9 ; Vol. II, Fasc. 1—10, Vol. III, Fasc. 1—2, Vol. IV, Fasc. 1, Vol. V,Fasc. 1—5 Part IV, Vol. II, Fasc. 1—4 @ /6/ each 11 10
Tul'si Sat'sai, (Text) Fasc. 1—5 @ /6/ each 1 14
Uvāsagadasāo, (Text and English) Fasc. 1—6 @ /12/ each .. 4 8
Varāha Purāṇa, (Text) Fasc. 1—14 @ /6/ each 5 4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2—6 ; Vol. II, Fasc. 1—7, @ /6/ each 4 8
Viṣṇu Smṛti, (Text) Fasc. 1—2 @ /6/ each 0 12
Vivādaratnākara (Text) Fasc. 1—7 @ /6/ each 2 10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1—6 @ /6/ each 2 4
Vṛhat Svayambhū Purāṇa, Fasc. 1—5 .. .. .. 1 14

Tibetan Series.

Pag-Sam Ṭhi Siṅ, Fasc. 1—4 @ 1/ each 4 0
Rtogs *brjod dpag bkhri* Siṅ (Tib. & Sans,) Vol. I, Fasc. 1—5 ; Vol. II. Fasc. 1—5 @ 1/ each 10 0
Sher Phyin, Vol. I, Fasc. 1—5 ; Vol. II, Fasc. 1—3 ; Vol. III, Fasc. 1—3 @ 1/ each 11 0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1—13 @ /6/ each .. 4 14
Al Muqaddasi, (English) Vol. I, Fasc. 1 .. .. .. 0 12
Āīn-i-Akbarī, (Text) Fasc. 1—22 @ 1/ each 22
Ditto (English) Vol. I, Fasc. 1—7 ; Vol. II, Fasc. 1—5 ; Vol. III, Fasc. 1—5 @ 1/12/ each 29 12
Akbarnāmah, with Index, (Text) Fasc. 1—37 @ 1/ each 37 0
Ditto (English) Fasc. 1—3 @ 1/ each 3 0
Arabic Bibliography, by Dr. A. Sprenger 0 6
Bādshānāmah, with Index, (Text) Fasc. 1—19 @ /6/ each .. 7 2
Catalogue of the Persian books and Manuscripts in the Library of the Asiatic Society of Bengal, Fasc. 1 & 3 @ 1/ each 3 0
Dictionary of Arabic Technical Terms and Appendix, Fasc. 1—21 @ 1/ each 21 0
Farhang-i-Rashīdī (Text), Fasc. 1—14 @ 1/ each 14 0
Fihrish-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1—4 @ /12/ each 3 0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1—9 @ /6/ each .. 3 6
Ditto of Āzādī, (Text) Fasc. 1—4 @ /6/ each 1 8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 .. 0 12
History of the Caliphs, (English) Fasc. 1—6 @ /12/ each .. 4 8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1—3 @ /6/ each 1 2
Isābāh, with Supplement, (Text) 51 Fasc. @ /12/ each 38 4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1—9 ; Vol. II, 1—9 ; Vol. III, 1—10 ; Index to Vol. I, Fasc. 10 & 11 ; Index to Vol. II, Fasc. 10—12 ; & Index to Vol. III, Fasc. 11 & 12 @ /6/ each 13 2
Maghāzi of Wāqidī, (Text) Fasc. 1—5 @ /6/ each 1 14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhab-ut-Tawārīkh, (Text) Fasc. 1—15 @ /6/ each ..	Rs. 5	10
Muntakhab-ut-Tawārīkh, (English) Vol. I, Fasc. 1—4 ; Vol. II, Fasc. 1—5 @ /12/ each	6	12
Muntakhab-ul-Lubāb, (Text) Fasc. 1—19 @ /6/ each	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1—6 @ /6/ each	2	4
Nukhbat-ul-Fikr, (Text) Fasc. 1	0	6
Niẓāmī's Khiradnāmah-i-Iskandari. (Text) Fasc. 1 and 2 @ /12/ each ..	1	8
Riyāẓu-s-Salātin (Text) Fasc. 1—4 @ /6/ each	1	8
*Suyūṭy's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7—10 @ 1/ each	4	0
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1—5 @ /6/ each	1	14
Ditto (English) Fasc. 1—14 @ /12/ each	10	8
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of ẓiyāu-d-dīn Barni, (Text) Fasc. 1—7 @ /6/ each	2	10
Tārīkh-i-Fīrūzshāhi of Shams-i-Sirāj-Aif, (Text) Fasc. 1—6 @ /6/ each	2	4
Ten Ancient Arabic Poems, Fasc. 1 & 2 @ 1/8/ each	3	0
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1	0	12
Wīs o Rāmin, (Text) Fasc. 1—5 @ /6/ each	1	14
Ẓafarnāmah, Vol. I, Fasc. 1—9 ; Vol. II, Fasc. 1—8 @ /6/ each ..	6	6

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vol. VII, Vols. XIII and XVII, and Vols. XIX and XX @ 10/ each Rs. 50 0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @/6/ per No. ; and from 1870 to date @ /8/ per No.
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883..	3	0
General Cunningham's Archæological Survey Report for 1863—64 (Extra No., J. A. S. B., 1864)	2	0
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868)	2	0
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875)	4	0
Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., J.A.S.B., 1882)	4	0
5. Anis-ul-Musharrahin	3	0
6. Catalogue of Fossil Vertebrata	3	0
7. Catalogue of the Library of the Asiatic Society, Bengal by W.A. Bion	3	8
8. Istilāhāt-us-ṣūfīyah, edited by Dr. A. Sprenger, 8vo. ..	1	0
9. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each	32	0
10. Jawāmi-ul-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I	2	0
11. Khizānat-ul-'ilm	4	0
12. Mahābhārata, Vols. III and IV, @ 20/ each	40	0
13. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—III, with 8 coloured Plates, 4to. @ 6/ each ..	18	0
14. Sharaya-ool-Islām	4	0
15. Tibetan Dictionary, by Csoma-de Kōros	10	0
16. Ditto Grammar. " "	8	0
17. Kāçmīraçabdāmṛta, Part I	1	8

Notices of Sanskrit Manuscripts, Fasc. 1—26 @ 1/ each ..	26	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ..	5	0

N. B.—All Cheques, Money Orders &c., must be made payable to the "Treasurer, Asiatic Society," only.

Books are supplied in V.-P. P.

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 903.



॥ ऐतरेयब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE AITARĒYA BRĀHMAṆA
OF THE ṚG-VEDA,

WITH THE
COMMENTARY OF SĀYAṆA ĀCĀRYA.

EDITED BY
PANDIT SATYAVRATA SĀMASRAMĪ.

VOL. IV.

FASCICULUS III.

CALCUTTA:

PRINTED BY H. V. CHATTERJEE,
AT THE SATYA PRESS, 16/1 GHOSH'S LANE,

AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.

1897.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

SIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.

46, GREAT RUSSEL STREET, LONDON, W. C. AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Advaita Brahma Sidd[illegible] (Text) Fasc. 1—4 @ /6/ each ..	Rs.	1	8
*Agni Pur[illegible] (Text) Fasc. 4—14 @ /6/ each		4	2
Aitarēya Āraṇyaka of the Rg Veda, (Text) Fasc. 1—5 @ /6/ each		1	14
Aitarēya Brāhmaṇa, (Text) Vol. I, Fasc. 1—5 ; Vol. II, Fasc. 1—5 ; and Vol. III, Fasc. 1—5 ; Vol. IV, Fasc. 1—3 @ /6/ each		6	12
Aṇu Bhāṣyam, (Text) Fasc. 1—4 @ /6/ each		1	8
Aphorisms of Çāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1—6 @ /6/ each ..		2	4
Açvavaidyaka, (Text) Fasc. 1—5 @/6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1—5 ; Vol. II, Fasc. 1—5 @ 1/ each		10	0
*Bhāmati, (Text) Fasc. 3—8 @ /6/ each		2	4
Brahma Sūtra, (English) Fasc. 1		0	12
Bṛhaddēvatā, (Text) Fasc. 1—4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1—5 @ /6/ each		1	14
Caturvarga Cintāmaṇi, (Text) Vols. II, 1—25 ; III, Part I, Fasc. 1—18, Part II, Fasc. 1—10 @ /6/ each		19	14
* Ditto Lāṭyāyana (Text) Fasc. 2—9 @ /6/ each		5	4
Ditto Çāṅkhāyana (Text) Vol. I, Fasc. 1—7 ; Vol. II, Fasc. 1—4 ; Vol. III, Fasc. 1—4 @ /6/ each		3	0
Çrī Bhāṣyam, (Text) Fasc. 1—3 @ /6/ each		5	10
Kāla Mādhava, (Text) Fasc. 1—4 @ /6/ each		1	2
Kāla-Vivēka, (Text) Fasc. 1		1	8
Kātantra, (Text) Fasc. 1—6 @ /12/ each		0	6
Kathā Sarit Sāgara, (English) Fasc. 1—14 @ /12/ each		4	8
Kūrma Purāṇa (Text) Fasc. 1—9 @ /6/ each		10	8
*Lalita-Vistara, (Text) Fasc. 4—6 @ /6/ each		3	6
Ditto (English) Fasc. 1—3 @ /12/ each		1	2
Madana Pārijāta, (Text) Fasc. 1—11 @ /6/ each		2	4
Manuṭīkā Saṅgraha, (Text) Fasc. 1—3 @ /6/each		4	2
*Mārkaṇḍēya Purāṇa, (Text) Fasc. 4—7 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1—5 @ /12/ each		1	8
*Mīmāṁsā Darçana, (Text) Fasc. 3—19 @ /6/ each		3	12
Nārada Smṛti (Text) Fasc. 1—3 @ /6/ each		6	6
Nyāyavārtika, (Text) Fasc. 1—3 @ /6/ each		1	2
*Nirukta, (Text) Vol. III, Fasc. 1—6 ; Vol. IV, Fasc. 1—8 @/6/each		1	2
*Nītisāra, or The Elements of Polity, By Kāmandakī (Sans.) Fasc. 2—5 @ /6/ each		5	4
Nyāyabinduṭīkā, (Text)		1	8
		0	10

ऽन्नाद्याय भूर्भुवस्स्वरित्यथैतानि ह वै क्षत्रियादीजानाद् व्युत्क्रान्तानि भवन्ति ब्रह्मक्षत्रे ऊर्गन्नाद्य मपा मोषधीनां रसो ब्रह्मवर्चस मिरापुष्टिः प्रजातिः क्षत्ररूपं तदथो अन्नस्य रस ओषधीनां क्षत्रं प्रतिष्ठा तद्यदेवामू पुरस्तादाहुती जुहोति तदस्मिन् ब्रह्मक्षत्रे दधाति ॥ ३ (७) ॥

अभिषेकप्रकारं विधत्ते— "अथैन मुदुम्बरशाखा मन्तर्द्धायाभिषिञ्चति"–इति । 'अथ' शान्तिवाचनानन्तरम्, 'एनं' क्षत्रियम् 'उदुम्बरशाखा मन्तर्द्धाय' शिरस्युदुम्बरशाखया व्यवधानं कृत्वा चमसस्थैर्दध्यादिभिरभिषिञ्चेत् * ॥

तिस्र ऋचः, एकं यजुः, व्याहृतयश्चेत्येते अभिषेकमन्त्राः । तत्र प्रथमा मृच माह— "इमा आपः शिवतमा इमाः सर्वस्य भेषजीः । इमा राष्ट्रस्य वर्द्धनीरिमा राष्ट्रभृतो ऽमृताः"–इति । 'आपः'–इत्यनेन दध्यादिसर्वद्रव्याणि उपलक्ष्यन्ते । 'इमाः' दध्यादिसहिताः आपः 'शिवतमाः' अतिशयेन शान्ताः । तथा 'इमाः' आपः 'सर्वस्य' दारिद्र्यादिरोगस्य 'भेषजीः' औषधरूपाः । तथा 'इमाः' आपो राष्ट्रस्य 'वर्द्धनीः' अभिवृद्धिहेतवः । अत एव 'इमाः' आपो 'राष्ट्रभृतः' राष्ट्रधारिण्यः । स्वयं च 'अमृताः' विनाशरहिताः ॥

द्वितीया मृच माह— "याभिरिन्द्र मभ्यषिञ्चत् प्रजापतिः

---

* "स्थितं प्राञ्च मभिषिञ्चति"–इत्यादि- (कात्या० श्रौ० १५.५. ३०–३३.)-पाठाच्चाभिषेकप्रकारविशेषाश्चाभिगन्तव्याः ।

KENDRIYA SANSKRIT VIDYA PEETHA LIBRARY, TIRUPATI. 7363

सोमं राजानं वरुणं यमं मनुं । ताभिरङ्गिरभिषिञ्चामि त्वा मह राज्ञां त्व मधिराजो भवेह"–इति । पुरा प्रजापतिः 'याभिः' दध्यादिसहिताभिरङ्गिरिन्द्रादीनभ्यषिञ्चत्, हे क्षत्रिय ! ताभिरङ्गिः त्वा मह मभिषिञ्चामि ; त्वं च 'इह' लोके राज्ञां सर्वेषां अधिको राजा भव ॥

तृतीया मृच माह— "महान्तं त्वा महीनां सम्राजं चर्षणीनां । देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनद्"–इति । 'जनित्री' तवोत्पादिका मातृरूपा देवी, त्वां 'महीनां' महता मपि पुरुषाणां मध्ये अतिशयेन महान्तम्, 'चर्षणीनां' मनुष्याणां सर्वेषां 'सम्राजं' सम्यक् धर्मेण पालयितारं कृत्वा, 'अजीजनत्' उत्पादितवती ; अतो भवदीया 'जनित्री' माता, स्वयं तदा पुण्यात्मा भूत्वोत्पादितवती ॥

तिस्र ऋचो ऽभिधाय यजुर्विधत्ते— "देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे ऽन्नाद्याय"–इति * । हे क्षत्रिय ! 'सवितुः' प्रेरकस्य देवस्य परमेश्वरस्य 'प्रसवे' अभ्यनुज्ञायां सत्यां त्वा मभिषिञ्चामि । केन साधनेन ? 'अश्विनोः' देवयोः सम्बन्धिभ्यां बाहुभ्यां, न तु मदीयाभ्याम् ; तथा 'पूष्णः' देवस्य हस्ताभ्याम् । मणिबन्धपर्यन्तौ दण्डाकारौ 'बाहू', अङ्गुलि-

---

* एवंविधमन्त्रपाठे तैत्तिरीया दूषण मप्यामनन्ति । तद्यथा— "यद् ब्रूयात् अग्नेस्त्वा तेजसाभिषिञ्चामीति, तेजस्येव स्यात् ; दुश्चर्मा तु भवेत् । सोमस्य त्वा द्युम्नेनाभिषिञ्चामीत्याह, सौम्यो वै देवतया पुरुषः, स्वयैवैनं देवतयाभिषिञ्चति"–इति तै० ब्रा० १.७.८ । सोमस्य त्वेत्यादिस्तु तैत्तिरीयाणां वाजसनेयिनाञ्च अभिषेकमन्त्रः (सं० १. ८. १४.— वा० सं० १०. १७.) ।

सहितावयवभागी 'हस्तौ'। तथाग्निसम्बन्धिना 'तेजसा' शारीरकान्त्या, सूर्यस्य सम्बन्धिना 'वर्चसा' बाह्यप्रकाशेन, इन्द्रसम्बन्धिना 'इन्द्रियेण' चक्षुरादिपाटवेन। कस्मै प्रयोजनायाय मभिषेकः ? तव शारीरबलाय, 'श्रियै' हस्त्यश्वादिसम्पदे, 'यशसे' कीर्त्यै, 'अन्नाद्याय' अन्नसमृद्धये ॥

अथ कामनाभेदेन व्याहृतीर्दर्शयति— "भूरिति य इच्छेदिम मेव प्रत्यन्न मद्यादित्यथ य इच्छेद् द्विपुरुषं भूर्भुव इत्यथ य इच्छेत् त्रिपुरुषं वा ऽप्रतिमं वा भूर्भुवस्स्वरिति"–इति। 'यः' अभिषेक्ता 'इम मेव' अभिषिच्यमानं क्षत्रियं प्रति असौ 'अन्न मद्यात्' नीरोगो भवेदिति 'इच्छेत्' कामयेत, तं 'भूरिति' व्याहृत्या अभिषिञ्चेत्। अथ 'यः' अभिषेक्ता पुत्रपौत्राभ्यां द्वाभ्यां पुरुषाभ्यां सहितम् 'इमं' क्षत्रियं प्रति अन्न मद्यादिति कामयेत, तदानीं 'भूर्भुवः इति' व्याहृतिद्वयेन अभिषिञ्चेत्। अथ 'यः' अभिषेक्ता पुत्रपौत्रप्रपौत्रैस्त्रिभिः पुरुषैः युक्तम् 'इमं' क्षत्रियम् प्रति पुरुषत्रयपर्यन्तं जीवित्वा सुखेनान्न मद्यादिति कामयेत; अथवा तमेतम् 'अप्रतिमं' स्वतुल्यक्षत्रियान्तररहितं कुर्यात् * इति कामयेत, तदानीं 'भूर्भुवस्स्वरिति' व्याहृतित्रयेण अभिषिञ्चेत् ॥

अत्र किञ्चित् पूर्वपक्षं मुद्भावयति — "तद्धैक आहुः, — सर्वाग्निर्वा एषा यदेता व्याहृतयो ऽतिसर्वेण ह्यस्य परस्मै कृतं भवतीति; त मेतेनाभिषिञ्चेद् देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे ऽन्नाद्यायेति"–इति। 'तद्ध' तस्मिन् एव अभिषेके ब्रह्मवादिनः केचिदेव माहुः,— या एता

* "कुर्याम्"–इति ख।

व्याहृतयः सन्ति , 'एषा' व्याहृतिरूपा 'सर्वाग्निर्वै' सर्वफलप्राप्ति-साधनम् ; अथो व्याहृतिभिरभिषेके 'अस्य' अभिषिच्यमानस्य 'परस्मै' परस्य स्वस्मादन्यस्य क्षत्रियस्य 'असर्वेण' तदपेक्षामात्र मतिक्रम्य कृत्स्नेनापि मन्त्रजातेन अभिषेचनं कृतं भवति ; तदेत-दधिकाभिषेचन मयुक्तम् 'इति' अभिप्रेत्य 'तं' क्षत्रियम् 'एतेन' देवस्य त्वेत्यादिना यजुषा अभिषिञ्चेत् , न तु व्याहृतिभिरिति तेषां पक्षः ॥

तं पक्षं दूषयति— "तदु पुनः परिचक्षते ; यदसर्वेण वाचो ऽभिषिक्तो भवतीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माह सत्य-कामो जाबालो य मेताभिर्व्याहृतिभिर्नाभिषिञ्चतीति"–इति । 'तदु' तदपि पूर्वोक्तं मतं पुनरन्ये ऽभिज्ञाः 'परिचक्षते' निरा-कुर्वन्ति । 'यं' क्षत्रियम् 'एताभिः' व्याहृतिभिः नाभिषिञ्चति , 'एषः' क्षत्रियो 'यद्' यस्मात् कारणाद् 'असर्वेण' सम्मूर्त्तिरहितेन 'वाचा' वाक्येन मन्त्रेण अभिषिक्तो भवति , तस्मादयं स्वोचिता-दायुषः पुरा 'प्रैतोः' प्रेतुं मर्त्तुम् 'ईश्वरः' समर्थो भवति ; तस्माद् आयुःक्षयहेतुत्वादयं पक्षो न युक्त इति जबालाया पुत्रः 'सत्य-कामः' महर्षिराह स्म ॥

पूर्वपक्षं दूषयित्वा सिद्धान्त माह— "ईश्वरो ह सर्व मायुरैतोः सर्व माप्नोद्विजयेनेत्यु ह स्माहोद्दालक आरुणिर्य मेताभिर्व्याहृति-भिरभिषिञ्चतीति ; त मेतेनैवाभिषिञ्चेद् देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्च-सेन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे ऽन्नाद्याय भूर्भुवस्स्व-रिति"–इति । 'यं' क्षत्रियम् 'एताभिः' व्याहृतिभिरभिषिञ्चति , स क्षत्रियः 'सर्व मायुरैतोः' सर्वमनायुः प्राप्तुम् 'ईश्वरः' समर्थो

भवति ; ततो 'विजयेन' शत्रूनभिभूय सर्वं भोगम् 'आप्नोत्' आप्नोति । 'इति' एवं वरुणस्य पुत्र उद्दालक आह स्म । तस्मात् 'तं' क्षत्रियम् 'एतेन' व्याहृत्यन्तेन यजुषा अभिषिञ्चेत्, न तु केवलेन । सोऽयं व्याहृत्यन्तो मन्त्रो नित्यप्रयोगे द्रष्टव्यः, काम्यप्रयोगे तु व्याहृतिविकल्पः पूर्वं मुक्तः * ॥

अभिषेकाङ्गं होमं विधत्ते— "अथैतानि ह वै क्षत्रियादीजानाद् व्युत्क्रान्तानि भवन्ति,— ब्रह्मक्षत्रे ऊर्गन्नाद्य मपा मोषधीनां रसो ब्रह्मवर्चस मिरापुष्टिः प्रजातिः क्षत्ररूप ; तदथो अन्नस्य रस ओषधीनां क्षत्रं प्रतिष्ठा ; तद्यदेवामू पुरस्तादाहुती जुहोति, तदस्मिन् ब्रह्मक्षत्रे दधाति"–इति । 'अथ' अभिषेकानन्तरम्, होम उच्यत इति शेषः । 'ईजानाद्' यागं कृतवतः क्षत्रियात् 'एतानि' वक्ष्यमाणानि 'व्युत्क्रान्तानि' अपगतानि भवन्ति । तानि निर्दिश्यन्ते— 'ब्रह्मक्षत्रे' एतस्य समीपे वर्त्तमानं जातिद्वयम्, 'ऊर्क्' क्षीरादिरसः, 'अन्नाद्यम्' ओदनादिकम् ; तदेतदुभय मपा मोषधीनाञ्च 'रसः' सारः । 'अपां सारः' क्षीरादिः, 'ओषधीनां रसः' अन्नाद्यम् । 'ब्रह्मवर्चसं' श्रुताध्ययनसम्पत्तिः, 'इरापुष्टिः' अन्नसम्पत्तिः, 'प्रजातिः' पुत्रोत्पादनम् । तच्च सर्वं क्षत्रियस्य स्वरूपम् ; अत्यन्त मपेक्षितत्वाद् । एतेषां व्युत्क्रान्तौ क्षत्रियस्य स्वरूपहानिरेव भवति । 'अथो' अपि च 'अन्नस्य' ओदनस्य, 'रसः' रसस्य क्षीरादेः, 'ओषधीनां' व्रीहियवादीनां 'क्षत्रं प्रतिष्ठा' क्षत्रिय आश्रयः । तस्माद् उक्तो व्यतिक्रमः क्षत्रियस्य न युक्तः । 'तत्' तथा सति 'यत्' यदि 'अमू' बुद्धिस्थे आहुती अभिषिक्तस्य क्षत्रियस्य पुरस्ताद् जुहुयात्, 'तत्'

* 'भूरिति'–इत्यादिः, 'भूर्भुवइति'–इत्यादिश्च १९५ पृ० ६ पं० द्र० ।

तदानीम् 'अस्मिन्' अभिषेके ब्राह्मणजातिं, क्षत्रियजातिं, तदुपलक्षित मन्नादिकं च सर्वं मवस्थापयति। "ब्रह्म प्रपद्ये ०—० स्वाहा"–"क्षत्रं प्रपद्ये ०—० स्वाहा"–इत्याहुतिद्वयं * जुहुयादिति तात्पर्यार्थः † ॥ ३ (७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तविंशाध्याये) तृतीयः खण्डः ॥ ३ (७) ॥

———

॥ अथ चतुर्थः खण्डः ॥

अथ यदौदुम्बर्यासन्दी भवत्यौदुम्बरश्चमस उदुम्बरशाखोर्ग्वा अन्नाद्य मुदुम्बर ऊर्ज मेवास्मिंस्तदन्नाद्यं दधात्यथ यद् दधि मधु घृतं भवत्यपां स ओषधीनां रसोऽपा मेवास्मिंस्तदोषधीनां रसं दधात्यथ यदातपवर्ष्या आपो भवन्ति तेजश्च ह वै ब्रह्मवर्चसं चातपवर्ष्या आपस्तेज एवास्मिंस्तद् ब्रह्मवर्चसं च दधात्यथ यच्छष्पाणि च तोक्मानि च भवन्तीरायै

---

* पुरस्तात् ७. ४. ४. (११२–११६) द्रष्टव्यम्।

† तै० सं० १. ८. १४, तै० ब्रा० १. ७. ८, वा० सं० १०. १७, वा० ब्रा० (शत०) ५. ४. २ अभिषेकविवरणं द्रष्टव्यम्।

तत्पुष्ट्यै रूप मथो प्रजात्या इरा मेवास्मिंस्तत्पुष्टिं दधात्यथो प्रजाति मथ यत् सुरा भवति क्षत्ररूपं तदथो अन्नस्य रसः क्षत्ररूप मेवास्मिंस्तद्दधात्यथो अन्नस्य रस मथ यद् दूर्वा भवति क्षत्रं वा एतदोषधीनां यद् दूर्वा क्षत्रं राजन्यो नितत इव ह्येह क्षत्रियो राष्ट्रे वसन् भवति प्रतिष्ठित इव निततेव दूर्वावरोधैर्भूम्यां प्रतिष्ठितेव तद्यद् दूर्वा भवत्योषधीना मेवास्मिँस्तत्* क्षत्रं दधात्यथो प्रतिष्ठा मेतानि ह वै यान्यस्मादीजानाद् व्युत्क्रान्तानि भवन्ति तान्येवास्मिँस्तद् दधाति तैरेवैनं तत्समर्द्धयत्यथास्मै सुरा कंसं ह्स्त आदधाति स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इन्द्राय पातवे सुत इत्याधाय शान्तिं वाचयति नाना हि वां देवहितं सदस्कृतं मा संसृक्षाथां परमे व्योमनि सुरा त्व मसि शुष्मिणी सोम एष राजा मैनं हिंसिष्ट स्वां योनि माविशन्ताविति सोमपीथस्य चैषा सुरापीथस्य च व्यावृत्तिः पीत्वा यं रातिं मन्येत तस्मा एनां प्रयच्छेत्तद्धि मित्रस्य रूपं मित्र एवैनां तदन्ततः प्रतिष्ठापयति तथा हि मित्रे प्रतितिष्ठति प्रतितिष्ठति य एवं वेद ॥ ४ (८) ॥

---

* "मेवास्मिंस्तत्"–इति क, ग, ङ । एव मिहोत्तरत्र च ।

अभिषेकसाधनानि क्रमेण प्रशंसितु मादावासन्द्यादित्रयं शंसति— "अथ यदौदुम्बर्यासन्दी भवत्यौदुम्बरश्चमस उदुम्बरा खोर्ग्वा अन्नाद्य मुदुम्बर ऊर्ज मेवास्मिंस्तदन्नाद्यं दधाति"—ति । आसन्दी-चमस-शाखानां कारणभूतो यः 'उदुम्बरः', ऽयं रसस्यान्नस्य स्वरूपभूतः ; तेन 'अस्मिन्' यजमाने रस न्नञ्च सम्पादयति ॥

दध्यादित्रयं प्रशंसति— "अथ यद् दधि मधु घृतं भवत्यपां ओषधीनां रसो ऽपा मेवास्मिंस्तदोषधीनां रसं दधाति"—। दधिघृतयोः पशुभक्षिततृणोदकजन्यत्वात् ओषधिरसत्वम् ; नो मधुकरानीतपुष्परसजन्यत्वाद् ओषधिसारत्वम् ॥

आतपसहिता वृष्टिजन्या आपः प्रशंसति— "अथ यदातप- आपो भवन्ति, तेजश्च ह वै ब्रह्मवर्चसं चातपवर्षा आपस्तेज स्मिंस्तद् ब्रह्मवर्चसं च दधाति"—इति * । आतपसम्बन्धात् त्वम्, आहुतिफलरूपवृष्टिसम्बन्धाद् ब्रह्मवर्चसत्वम् ॥

श्यामतृणान्यङ्कुराणि च प्रशंसति— "अथ यच्छ्यामानि च ानि च भवन्तीरायै तत् पुष्ट्यै रूप मथो प्रजात्या इरा मेवा- तत् पुष्टिं दधात्यथो प्रजातिम्"—इति । तृणाना मङ्कुराणां च त्वात् तद्भक्षणेन पशुपुष्टिप्रजोत्पादनयोर्दृष्टत्वात् इरापुष्टि तिरूपत्वम् ॥

---

* आध्वर्यवेष्वभिषेकसाधनेषु सप्तदशविधा आपः श्रूयन्ते । ता यथा— सारस्वत्यः, र्मिः, स्यन्दमानाः, ओजस्वत्यः, अपयत्यः , अपाम्पतिः, निवेष्यः, सूर्यत्वचसः , आतप- , वैश्वन्त्यः, कूप्याः, पुष्वाः , मधु, गौरुल्ब्याः, पयः, घृतम्, मरीच्यः । "स सारस्वती- प्रथमा गृह्णाति"—इत्यारभ्य , "सप्तदैशापः सम्भरति"—इत्यन्तः शत० ब्रा० ५. ३. ४. २ कण्डिका द्रष्टव्याः । षोडश्न वेति च तत्रास्ति पक्षान्तरम् । तै० सं० १. ८. ११, ब्रा० १. ७. ५ अपि एव मेव ।

सुरां प्रशंसति — "अथ यत् सुरा भवति, क्षत्ररूपं तद्; अथो अन्नस्य रसः; क्षत्ररूप मेवास्मिंस्तद्दधात्यथो अन्नस्य रसम्" —इति। सुरायाः क्षत्रियस्येव मदयोगात् क्षत्ररूपत्वम्, व्रीह्या-द्यङ्कुरजन्यत्वादन्नरसत्वञ्च ॥

दूर्वां प्रशंसति— "अथ यद् दूर्वा भवति; क्षत्रं वा एतदोष-धीनां यद् दूर्वा, क्षत्रं राजन्यो, नितत इव ह्येह क्षत्रियो राष्ट्रे वसन् भवति, प्रतिष्ठित इव; नितत्येव दूर्वावरोधैर्भूम्यां, प्रतिष्ठि-तेव; तद्यद् दूर्वां भवत्योषधीना मेवास्मिंस्तत् क्षत्रं दधात्यथो प्रतिष्ठाम्"—इति। ओषधिजातौ दूर्वायाः क्षत्रियजातित्वं राज-सम्बन्धिक्षत्रियजातिसाम्यादवगन्तव्यम् *। तदेव साम्यं नितत इवेत्यादिना प्रपञ्चयति। 'इह' राष्ट्रे क्षत्रियो वसन्, तेषु ग्रामेषु सञ्चारात् स्वपुरुषस्थापनाच्च, स्वयं नितरां 'ततः' विस्तृतः 'इव' राज्यैश्वर्येण प्रतिष्ठित एव भवति; दूर्वा 'अवरोधैः' अधोमुखैः स्वकीयमूलैर्नितरां 'तता इव' व्याप्तेव, स्थैर्याद् एकत्र प्रतिष्ठितेव भवति। तथा सति 'यद्' यत्र दूर्वा भवति, तदानीम् ओषधि-सम्बन्धिक्षत्रियजातिम् 'अस्मिन्' यजमाने सम्पादयति, अपि च 'प्रतिष्ठां' स्थैर्य मपि सम्पादयति ॥

प्रत्येकं प्रशस्य समुदायरूपेण प्रशंसति— "एतानि ह वै यान्य-स्मादीजानाद् व्युत्क्रान्तानि भवन्ति, तान्येवास्मिंस्तद्दधाति; तैरे-वैनं तत्समर्द्धयति"—इति। 'ईजानाद्' यागं कृतवतः 'अस्मात्' क्षत्रियाद् यान्येव 'एतानि' दध्युदुम्बरादीनि व्युत्क्रान्तानि भवन्ति,

* "अथं वाव माऽधूर्वीदिति यदब्रवीदधूर्वीन्मेति, तस्माद् दूर्वा; धूर्वा ह वै तां दूर्वे-त्याचक्षते परोक्षम्; परोक्षकामा हि देवाः। तदेतत् क्षत्रम्। प्राणो ह्येष रसः"—इति शत० ब्रा० ७, ४, २, १२।

तान्येव 'अस्मिन्' क्षत्रिये सम्पाद्य , तैरेवैनं समृद्धं करोति ॥

अभिषिक्तस्य क्षत्रियस्य पानपात्रं विधत्ते — "अथास्मै सुरा कांसं हस्त आदधाति"–इति । 'अथ' अभिषेकानन्तरम् , 'अस्मै' अस्य क्षत्रियस्य हस्ते सुरायुक्तं कांस्यपात्र मादध्यात् ॥

तत्र मन्त्र माह— "स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इन्द्राय पातवे सुतः (सं० ९.१.१.)"–इति । हे सोम ! त्वत्समानं सुराद्रव्यं 'स्वादिष्ठया' अतिशयेन स्वादुभूतया , 'मदिष्ठया' अतिशयेन मदहेतुभूतया त्वदीयया 'धारया' पवस्व यजमानं शोधय । हे द्रव्यविशेष ! 'इन्द्राय पातवे' इन्द्रस्य पानार्थं 'सुतः' अभिषुतः सम्पादितोऽसि ॥

मन्त्रान्तरेण शान्तिवाचनं विधत्ते — "इत्याधाय शान्तिं वाचयति"–इति । 'इति' अनेन पूर्वोक्तमन्त्रेण हस्ते सुरायुक्तं कांस्यपात्र माधाय, वक्ष्यमाणमन्त्रेण शान्तिं वाचयेत् ॥

तं मन्त्रं दर्शयति— "नाना हि वां देवहितं सदस्कृतं ; मा संसृक्षाथां परमे व्योमनि ; सुरा त्व मसि शुष्मिणी , सोम एष राजा, मैनं हिंसिष्टं स्वां योनि माविशन्ताविति"–इति । हे सुरा-सोमौ ! 'वां' युवयोः 'देवहितं' देवैः सम्पादितं 'सदः' स्थानं 'नाना कृतं' पृथगेव निष्पादितम् । अतः 'परमे व्योमनि' उत्कृष्टे उदराकाशे 'मा संसृक्षाथां' मा संसर्गं कुरुतम् । संसर्गे हि सोमस्य बाधः स्यात् । हे मद्य ! त्वं 'शुष्मिणी' बलवती सुरासि , एष सोमो राजा, तौ बलवन्तौ युवा मुभौ 'स्वां योनि माविशन्तौ' उदरमध्ये विभागेन स्वं स्वं स्थानं प्रविशन्तौ 'एनं' पातारं 'मा हिंसिष्टं' हिंसित मुपद्रुतं मा कुरुतम् । 'इति' एतं मन्त्रं क्षत्रिय-स्याग्रे कथयित्वा, तं वाचयेत् ॥

तस्य मन्त्रस्य तात्पर्यं दर्शयति— "सोमपीथस्य चैषा सुरापीथस्य च व्यावृत्तिः"–इति । 'एषा' मन्त्रप्रतिपाद्या सोमपानसुरापानयोः परस्परव्यावृत्तिः ; मा संसृक्षाथा मिति संसर्गस्य निषिद्धत्वात् ॥

पीतशेषस्य दानं विधत्ते— "पीत्वा यं रातिं मन्येत, तस्मा एनां प्रयच्छेत्, तद्धि मित्रस्य रूपं ; मित्र एवैनां तदन्ततः प्रतिष्ठापयति, तथा हि मित्रे प्रतितिष्ठति"–इति । कांस्यपात्रगतां सुरां क्षत्रियः स्वयं पीत्वा, 'यं' पुरुषं 'रातिं' स्वस्य धनदातारं मित्रं मन्येत, 'तस्मै' पुरुषाय 'एनाम्' अवशिष्टां सुरां प्रयच्छेत् । 'तत्' एकपात्रगतद्रव्यपानं मित्रस्य स्वरूपम् ; परस्परं मित्रयोः सहभोजनदर्शनात् । 'तत्' तेन दानेन 'अन्ततः' पानान्ते मित्रे एव 'एनां' सुरां प्रतिष्ठापयति । 'तथा हि' तथैव कुर्वन्, स्वयमपि मित्रे प्रतिष्ठितो भवति ॥

वेदनं प्रशंसति— "प्रतितिष्ठति य एवं वेद"–इति ॥ ४ (८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तविंशाध्याये) चतुर्थः खण्डः ॥ ४ (८) ॥

———

॥ अथ पञ्चमः खण्डः ॥

अथोदुम्बरशाखा मभि प्रत्यवरोहत्यूर्वा अन्नाद्य मुदुम्बर ऊर्ज मेव तदन्नाद्य मभि प्रत्यवरोहत्युपर्ये-

वासीनो भूमौ पादौ प्रतिष्ठाप्य प्रत्यवरोह माह प्रतितिष्ठामि द्यावापृथिव्योः प्रतितिष्ठामि प्राणापानयोः प्रतितिष्ठाम्यहोरात्रयोः प्रतितिष्ठाम्यन्नपानयोः प्रति ब्रह्मन् प्रति क्षत्रे प्रजासु त्रिषु लोकेषु तिष्ठामीत्यन्ततः सर्वेणात्मना प्रतितिष्ठति सर्वस्मिन् ह वा एतस्मिन् प्रतितिष्ठत्युत्तरोत्तरिणीं ह श्रिय मश्नुते ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं य एव मेतेन पुनरभिषेकेणाभिषिक्तः क्षत्रियः प्रत्यवरोहत्येतेन प्रत्यवरोहेण प्रत्यवरूह्योपस्थं कृत्वा प्राङासीनो नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे नमस्कृत्य वरं ददामि जित्या अभिजित्यै विजित्यै सञ्जित्या इति वाचं विसृजते स यन्नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे नमस्करोति ब्रह्मण एव तत्क्षत्रं वश मेति तद्यत्र वै ब्रह्मणः क्षत्रं वश मेति तद्राष्ट्रं समृद्धं तद्वीरवदा हास्मिन् वीरो जायते ऽथ यद्वरं ददामि जित्या अभिजित्यै विजित्यै सञ्जित्या इति वाचं विसृजत एतद्वै वाचो जितं यद् ददामीत्याह यदेव वाचो जितां३ * तन् म इद मनु कर्म सन्तिष्ठाता इति विसृज्य वाच

* "जितां३"-इति क, ख, घ। "जितं३"-इति च।

मुपोत्थायाहवनीये समिध मभ्यादधाति समिदसि सम्वेङ्क्ष्वेन्द्रियेण वीर्येण स्वाहेतीन्द्रियेणैव तद्वीर्येणा-त्मान मन्ततः समर्द्धयत्याधाय समिधं त्रीणि पदानि प्राङुदङ्ङभ्युत्क्रामति क्रृम्निरसि दिशां मयि देवेभ्यः कल्पतं कल्पतां मे योगक्षेमो ऽभयं मे ऽस्त्वित्यपरा-जितां दिश मुपतिष्ठते जितस्यैवापुनः पराजयाय तत्तदितीँ३ * ॥ ५ (९) ॥

आसन्या अवरोहं विधत्ते — "अथोदुम्बरशाखा मभि प्रत्य-वरोहत्यूर्ग्वा अन्नाद्य मुदुम्बर ऊर्जं मेव तदन्नाद्य मभि प्रत्यवरो-हति"–इति । 'अथ' अभिषेकानन्तरम्, भूमौ उदुम्बरशाखा मवस्थाप्य, ताम् 'अभि'लक्ष्य प्रत्यवरोहेत् । योऽय मुदुम्बरः स 'ऊर्ग्वै' रसरूप एव ; तत्फले माधुर्यसद्भावात् । तथान्नाद्यस्वरू-पश्च ; तद्भक्षणेनोदरपूरणात् । तस्माद् उदुम्बरशाखायां प्रत्यवरोहे-णोर्जं मन्नाद्यं चाभिलक्ष्यावरोहति ॥

तत्र प्रकारं विधत्ते — "उपर्येवासीनो भूमौ पादौ प्रतिष्ठाप्य प्रत्यवरोह माह"–इति । आसन्या उपर्येव स्वय मुपविष्टः, प्रथमतः पादौ भूमाववस्थाप्य प्रत्यवरोहसाधनभूतं मन्त्रं पठेत् ॥

तं मन्त्रं दर्शयति — "प्रतितिष्ठामि द्यावापृथिव्योः, प्रति-तिष्ठामि प्राणापानयोः, प्रतितिष्ठाम्यहोरात्रयोः, प्रतितिष्ठाम्यन्न-पानयोः, प्रति ब्रह्मन्, प्रति क्षत्रे, प्रत्येषु त्रिषु लोकेषु तिष्ठा-

---

* "तत्तदितीँ३"–इति ग, ङ ।

मीति"-इति । भूमौ यदवरोहणं, तद् द्यावापृथिव्यादिषु सर्वेष्ववस्थान मिति मन्त्रार्थः ॥

अनेन मन्त्रेण क्रियमाणं प्रत्यवरोहं प्रशंसति— "अन्ततः सर्वेणात्मना प्रतितिष्ठति, सर्वस्मिन् ह वा एतस्मिन् प्रतितिष्ठत्युत्तरोत्तरिणीं ह श्रिय मश्नुते, श्नुते ह प्रजाना मैश्वर्य माधिपत्यं, य एव मेतेन पुनरभिषेकेणाभिषिक्तः क्षत्रियः प्रत्यवरोहति"-इति । 'यः' क्षत्रियः उक्ताभिषेकादूर्ध्वं मनेन मन्त्रेण प्रत्यवरोहति, स पुरुषः 'अन्ततः' अभिषेकस्यान्ते धनिकत्वादिना सर्वेण रूपेण प्रतिष्ठितो भवति । 'एतस्मिन् सर्वस्मिन्' द्यावापृथिव्यादिके प्रतिष्ठितो भवति । उत्तरेत्यादि पूर्ववद् (१९०पृ०) योजनीयम् ॥

प्रत्यवरोहादूर्ध्वं कर्त्तव्यं विधत्ते— "एतेन प्रत्यवरोहेण प्रत्यवरुह्योपस्थं कृत्वा, प्राङासीनो नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे नमस्कृत्य, वरं ददामि जित्या अभिजित्यै विजित्यै सञ्जित्या इति वाचं विसृजते"-इति । प्रत्यवरुह्येति दीर्घश्छान्दसः । 'एतेन' पूर्वोक्तेन प्रत्यवरोहमन्त्रेण 'प्रत्यवरुह्य' भूमौ 'उपस्थम्' आसनविशेषं * कृत्वा, प्राङ्मुख आसीनो नमस्कारमन्त्रं त्रिः पठित्वा, वर मित्यादिमन्त्रेण वाचं विसृजेत् । वाग्विसर्गो ऽलौकिकव्यवहारः । 'जितिः' जयमात्रम् । अभितः सर्वेषु देवेषु जितिः 'अभिजितिः' । प्रबलदुर्बलशत्रूणां तारतम्येन विविधो जयो 'विजितिः' । पुनः शत्रुत्वराहित्याय सम्यग् जितिः 'सञ्जितिः' । एतत्सिद्ध्यर्थं ब्राह्मणाय 'वर' गां ददामि † ॥

---

* "समसज्जङ्घोरुररत्निभ्यां जानुभ्यां चोपस्थं कृत्वा यथा शकुनिरुत्पतिष्यन्"-इति आश्व० श्रौ० ६. ५. ४ ।

† "वरो दक्षिणा"-इति तै० सं० १. ८. १ । तै० आर० २. १६. ३ । "वरो दक्षिणा

नमस्कारमन्त्रं प्रशंसति— "स यन्नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे नमस्करोति, ब्रह्मण एव तत्क्षत्रं वश मेति; तद्यत्र वै ब्रह्मणः क्षत्रं वश मेति, तद्राष्ट्रं समृद्धं, तद्वीरवदा हास्मिन् वीरो जायते"–इति। 'सः' क्षत्रियो मन्त्रेणनमस्करोतीति यदस्ति, तेन 'ब्रह्मण एव' ब्राह्मणस्यैव क्षत्रियजातिर्वश मेति। 'तत्' तेन ब्राह्मणाधीनत्वेन तद्राष्ट्रं सर्ववस्तुसमृद्धं वीरपुरुषोपेतं च भवति; 'अस्मिन्' क्षत्रिये 'वीरः' पुरुष आजायते ॥

वरदानमन्त्रं प्रशंसति— "अथ यद्वरं ददामि, जित्या अभिजित्यै विजित्यै सञ्जित्या इति वाचं विसृजते; एतद्वै वाचो जितं, यद्वै ददामीत्याह; यदेव वाचो जितां३; तन् म इद मनु कर्म सन्तिष्ठाता इति"–इति। वर मित्यादिमन्त्रेण वाचं विसृजत इति यदस्ति (२०६ पृ०), तस्मिन् मन्त्रस्वरूपे ददामीति यदाह, एतदेव वाक्सम्बधि 'जितं' जयः। यदेव वाचो जित मस्ति, [पूजार्थे जिता मिति दीर्घः *] 'तद्' वाग् वज्ररूपं 'मे' मदीयम् 'इदं कर्म' अनुष्ठानं 'सन्तिष्ठातै' सम्यगवतिष्ठताम्; 'इति' तस्य मन्त्रस्याभिप्रायः ॥

समिदाधानं विधत्ते— "विसृज्य वाचे मुपोत्थायाहवनीये समिध मभ्यादधाति"–इति। उक्तेन प्रकारेण वाङ्नियमं परित्यज्य, तस्मादासनात् उत्थितो वक्ष्यमाणमन्त्रेणाहवनीये समिधं प्रक्षिपेत् ॥

वरो हि राज्यम्"–इति तै० ब्रा० १. ६. १. ५। "पशुर्दक्षिणा धेनुर्वरो वा"–इति कात्या० श्रौ० ६. ७. २९। "आचार्याय वरं ददाति; गौर्ब्राह्मणस्य, ग्रामो राजन्यस्य"–इति पार० गृ० १. १०. १२। "अश्वं निविदां श्रुत्वे०—० वर मेव ददाति"–इति २भा० ४२पृ०।

* मदृष्टेषु सर्वेष्वेव पुस्तकेषु 'जितां३'–इति प्लुताङ्को विद्यते; पूजार्था प्लुतिरेवोचिता, उक्तञ्च तथा बहुत्रैव, वक्ष्यति चोपरिष्टादनेकत्र (२०९ पृ०)।

तं मन्त्रं दर्शयति—"समिदसि सम्वेङ्क्ष्वेन्द्रियेण वीर्येण स्वाहेति"–इति । हे काष्ठ ! त्वं 'समिदसि' समिन्धनसाधन मसि । इङ्गति-धातोर्लोण्मध्यमपुरुषैकवचनम् 'एङ्क्ष्व'–इति ; स च गत्यर्थः * । 'उ'-शब्दो ऽनर्थकः । इन्द्रियपाटवेन , शरीरसामर्थ्येन च 'समेङ्क्ष्व' संयोजय, तदर्थं स्वाहुत मिद मस्तु ॥

मन्त्रस्य तात्पर्यं दर्शयति—"इन्द्रियेणैव तद्वीर्येणात्मान मन्ततः समर्द्धयत्याधाय समिधं त्रीणि पदानि प्राङुदङ्ङभ्युत्क्रामति"–इति । 'तत्' तेन समिदाधानमन्त्रेण आत्मान मभिषेककर्मान्ते वीर्येन्द्रियाभ्यां समृद्धं करोति । समिधं प्रक्षिप्य प्राङ्मुख उदङ्मुखो वा पदत्रय मभित उत्क्रामेत् । यद्वा प्राङुदङिति अन्तरालवर्तिनी मैशानीं दिश मभिलक्ष्योत्क्रामेत् ॥

तत्र मन्त्रं दर्शयति—"क्लृप्तिरसि दिशां मयि देवेभ्यः कल्पत, कल्पतां मे योगक्षेमो ऽभयं मे ऽस्तु"–इति । दिग्विशेष मभिलक्ष्य क्रियमाणं त्रैपदोत्क्रमणं दिशां 'क्लृप्तिः' कल्पनं , स्वाधीनत्वसम्पादनम् ; तथा सम्पादक मसि । अतो मयि देवार्थं 'कल्पत' कल्पनं सामर्थ्यं कुरु । बहुवचनं छान्दसम् । 'मे' मम 'योगक्षेमः' योगसहितः क्षेमः 'कल्पताम्' सम्पाद्यताम् ; तथैव 'मे' मम सर्वत्र 'अभय' भयराहित्य मस्तु ॥

दिगुपस्थानं विधत्ते—"इत्यपराजितां दिश मुपतिष्ठते, जितस्यैवापुनः पराजयाय ; तत्तदितीꣳ"–इति । 'इति' अनेन पूर्वोक्तेन क्लृप्तिरसीत्यादिनैव मन्त्रेण पराजयरहितां प्राचीं मुदीचीं वा दिश मुपतिष्ठते । अथवा 'अपराजितां दिशम्' ऐशानीम् उपतिष्ठते । पूर्वं जितस्यैव दिग्विशेषस्य, पुनः परा-

* "उख उखि०—०इख इखि०—०रिगि लिगि गत्यर्थाः"–इति धा०पा०स्वा०१२८–१५५ ।

जयराहित्यार्थ मुपस्थानम् । लोकाश्च सर्वे तदुपस्थान मिति पूजयन्ति । पूजार्थेयं सानुनासिका श्रुतिः ॥ ५ (८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (८) ॥

॥ अथ षष्ठः खण्डः ॥

देवासुरा वा एषु लोकेषु संयेतिरे त एतस्यां प्राच्यां दिशि येतिरे तांस्ततो ऽसुरा अजयंस्ते दक्षिणस्यां दिशि येतिरे तांस्ततो ऽसुरा अजयंस्ते प्रतीच्यां दिशि येतिरे तांस्ततो ऽसुरा अजयंस्त उदीच्यां दिशि येतिरे तांस्ततो ऽसुरा अजयंस्त एतस्मिन्नवान्तरदेशे येतिरे य एष प्राङुदङ् ते ह ततो जिग्युस्तं यदि क्षत्रिय उपधावेत्सेनयोः समायत्योस्तथा मे कुरु यथाह मिमां सेनां जयानीति स यदि तथेति ब्रूयाद् वनस्पते वीड्वङ्गो हि भूया इत्यस्य रथोपस्थ मभिमृश्याथैनं ब्रूयादातिष्ठैतां ते दिश मभिमुखः सन्नद्धो रथो ऽभिप्रवर्त्ततां * स उदङ् स प्रत्यङ् स

* "ऽभिप्रवर्त्ततां"-इति ङ ।

दक्षिणा स प्राङ् सो ऽभ्यमित्र मित्यभीवर्त्तेन हवि-
षेत्येवैन मावर्त्तयेदथैन मन्वीक्षेतामतिरथेन शासेन
सौपर्णेनेति जयति ह तां सेनां यद्यु वा एन मुपधा-
वेत्सङ्ग्रामं संयतिष्यमाणस्तथा मे कुरु यथा ऽह मिमं
सङ्ग्रामं सञ्जयानीत्येतया मेवैनं दिशि यातयेज्जयति
ह तं सङ्ग्रामं यद्यु वा एन मुपधावेद्राष्ट्रादवरुध्यमान-
स्तथा मे कुरु यथा ऽह मिदं राष्ट्रं पुनरवगच्छानी-
त्येता मेवैनं दिश मुपनिष्क्रमयेत् तथाह राष्ट्रं पुन-
रवगच्छत्युपस्थायामित्राणां व्यपनुत्तिं ब्रुवन् गृहा-
नभ्येत्यप प्राच इन्द्र विश्वॅा अमित्रानिति सर्वतो-
हास्मा अनमित्र ममयं भवत्युत्तरोत्तरिणीं ह श्रिय
मश्नुते ऽश्नुते ह प्रजाना मैश्वर्य माधिपत्यं य एव
मेता ममित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येत्येत्य
गृहान् पश्चाद् गृह्यस्याग्नेरुपविष्टायान्वारब्धाय
ऋत्विगन्ततः कंसेन चतुर्गृहीतास्तिस्र आज्याहुती-
रैन्द्रीः प्रपदं जुहोत्यनार्त्या अरिष्टा अज्यान्या
अभयाय ॥ ६ (१०) ॥

अपराजितां दिश मुपतिष्ठत इति यदुक्तं, तत्रैशान्या दिशो मुख्यापराजितत्वं दर्शयति—"देवासुरा वा एषु लोकेषु संयेतिरे; त एतस्यां प्राच्यां दिशि येतिरे; तांस्ततो ऽसुरा अजयंस्ते दक्षिणस्यां दिशि येतिरे; तांस्ततो ऽसुरा अजयंस्ते प्रतीच्यां दिशि

येतिरे ; तांस्ततो ऽसुरा अजयंस्त उदीच्यां दिशि येतिरे ; तांस्ततो ऽसुरा अजयंस्त एतस्मिन्नवान्तरदेशे येतिरे ; य एष प्राङुदङ् ते ह ततो जिग्युः"–इति । पुरा कदाचिद् देवाश्च असुराश्च 'एषु' भूरादिलोकेषु निमित्तभूतेषु 'संयेतिरे' युद्धं कृतवन्तः । तत्र प्राच्यादिषु चतसृषु यत्रयत्र युद्धं कृतम्, तत्रतत्रासुराणा मेव विजयो ऽभूत् । 'य एष प्राङुदङ्' दिग्द्वयस्पर्शी कश्चिदवान्तरदेश ऐशान्यात्मकः, एतस्मिन् देशे यदा युद्धं कृतं, तदा 'ते' देवाः 'ततः' देशान्निमित्तभूतात् 'जिग्युः' जयं प्राप्ताः । तस्मादिय मैशानी दिगपराजिता पूर्वोक्तमन्त्रेणोपस्थेया ॥

त मेत मभिषिक्तक्षत्रियवृत्तान्तं तावदवस्थाप्य, तत्रसङ्गागतं पुरुषान्तरवृत्तान्तं दर्शयति— 'तं यदि क्षत्रिय उपधावेत् सेनयोः समायत्योस्तथा मे कुरु, यथाह मिमां सेनां जयानीति ; स यदि तथेति ब्रूयाद्, वनस्पते वीड्वङ्गो हि भूया इत्यस्य रथोपस्थ मभिमृश्याथैनं ब्रूयाद्"–इति । क्वचिद् * देशे युद्धार्थं मुभे सेने परस्परं समागच्छतः । तयोः समागच्छन्त्योः 'सेनयोः' मध्ये यः कोऽपि 'क्षत्रियः' विजयार्थी सन् 'तम्' अभिषिक्तं ऐशानीदिगुपस्थानयुक्तं राजानं यदि 'उपधावेत्' शरणं गच्छेत् । केन अभिप्रायेण ? इति, सोऽभिधीयते— हे अभिषिक्त क्षत्रिय ! यथा अहम् इमां शत्रुसेनां जयानि, तथा मे अनुग्रहं कुरु इति तदभिप्रायः । तदानीं 'सः' अभिषिक्तः क्षत्रियः यदि 'तथा–इति' अङ्गीकारं ब्रूयात्, तदानीं "वनस्पते"–इत्यृचा (सं० ६. ४७. २६. †) जयार्थिनः पुरुषस्य रथोर्ध्वभाग मभिमृश्यानन्तरम् 'एनं' जयार्थिनं प्रति वक्ष्यमाणं मन्त्रं ब्रूयात् ॥

---

* 'कस्मिंश्चिद्' ख ।

† आश्व० श्रौ० सू० २. ६. ६० ।

तं मन्त्रं दर्शयति— "आतिष्ठस्वैतां ते दिश मभिमुखः सन्नद्धो रथोऽभिप्रवर्त्ततां ; स उदङ्, स प्रत्यङ्, स दक्षिणा, स प्राङ्, सोऽभ्यमित्र मिति"–इति। हे जयार्थिन्! 'एताम्' ऐशानीं दिशम् 'आतिष्ठस्व' प्राप्नुहि। ते रथः 'एताम्' ऐशानीं दिशं प्रत्यभिमुखः 'सन्नद्धः' सर्वायुधादिसन्नाहोपेतः अभितः प्रवर्त्तताम्। ततः 'सः' रथ उदङ्मुखः प्रवर्त्तताम्; ततः 'सः' रथः प्रत्यङ्मुखः प्रवर्त्तताम्; ततः 'सः' रथः दक्षिणामुखः प्रवर्त्तताम्; ततः 'सः' रथः प्राङ्मुखः प्रवर्त्तताम्; तत जर्ङम् 'अभ्यमित्र" त्वदीयं शत्रुं प्रति प्रवर्त्तताम्॥

जयार्थिनं प्रति एतन्मन्त्रकथनादूर्ङ् मभिषिक्तस्य कर्त्तव्यं दर्शयति— "अभीवर्त्तेन हविषेत्येवैन मावर्त्तयेदथैन मन्वीक्षेताप्रतिरथेन शासेन सौपर्णेनेति"–इति। "अभीवर्त्तेन"–इत्यादिसूक्तेन (सं०१०.१७४.*) 'एनं' जयार्थिन मुक्तक्रमेण दिक्ष्वावर्त्तयेत्। 'अथ' अनन्तर मावर्त्तमान मेनं सूक्तत्रयेण अन्वीक्षेत। "आशुः शिशानः"–इति (सं० १०.१०३.†) अप्रतिरथं सूक्तम्, "शास इत्था"–इति (सं० १०. १५२.‡) शाससूक्तम्, "प्र धारा यन्तु मधुनः"–इति सौपर्णं सूक्तम् §॥

अभिषिक्तस्य कृत्य मुक्ता जयार्थिनः कृत्यं दर्शयति—"जयति ह तां सेनाम्"–इति॥

सेनाद्वययुद्धे जयार्थं प्रयोग मुक्ता पुरुषद्वन्द्वयुद्धेऽपि त माह— "यदु वा एन मुपधावेत्सङ्ग्रामं संयतिष्यमाणस्तथा मे कुरु यथाऽह मिमं सङ्ग्रामं सञ्जयानीत्येतस्या मेवैनं दिशि यातयेज्जयति ह

---

* आश्व० गृ० सू० ३. ११ द्र०। †, ‡ आश्व० गृ० ३. १२ द्र०।

§ आश्व० गृ० ३. १२. १४,— ३भा० ३५२पृ० द्र०।

तं सङ्ग्रामम्''–इति । यः कोऽपि पुमान् 'संयतिष्यमाणः' युद्धं करिष्यन् तं सङ्ग्रामं जेतुम् 'एनम्' अभिषिक्तं यदि उपधावेत्, तथा मे कुर्विति पूर्ववत् (२११ पृ०) ॥

राष्ट्राद् भ्रष्टस्य पुनरपि राष्ट्रप्राप्त्यर्थं प्रयोगं दर्शयति—" यद्यु वा एन मुपधावेद्राष्ट्रादपरुध्यमानस्तथा मे कुरु यथाऽह मिदं राष्ट्रं पुनरवगच्छानीत्येता मेवैनं दिश मुपनिष्क्रमयेत्तथा ह राष्ट्रं पुनरवगच्छति''–इति । यथा वै सेनयोर्युद्धे पुरुषयोर्युद्धे वा अभिषिक्तेन उदीचीं दिशं प्रति प्रस्थापितस्य जयः, तथैव राष्ट्रभ्रष्टोऽपि अभिषिक्तेनैशानीं दिशं प्रस्थापितो राष्ट्रं पुनः प्राप्नोति ॥

इत्थं प्रासङ्गिकं प्रयोगत्रय मुक्त्वा प्रकृत मेव अभिषिक्तविषयं प्रयोग माह—"उपस्थायामित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येत्यप प्राच इन्द्र विष्वँा अमित्रानिति सर्वतो हास्मा अनमित्र मभयं भवत्युत्तरोत्तरिणीं ह श्रिय मश्नुते; ऽश्नुते ह प्रजाना मैश्वर्य माधिपत्यं; य एव मेता ममित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येति''–इति । पूर्वत्र (२०८ पृ०) "क्लृप्तिरसि"–इत्यादिमन्त्रेण अभिषिक्तस्य पदत्रयाभ्युक्तमेणैशानदिगुपस्थानं चाभिहितम्, तां दिश मुपस्थाय, अनन्तरम् 'अमित्राणां' शत्रूणां 'व्यपनुत्तिं' विशेषेणापनोदनहेतुम्, अत एव व्यपनुत्त्यभिधानाम् "अप प्राचः"–इत्यादिका मृचं (सं०१०.१३१.१.) ब्रुवन्, स्वगृहानभिगच्छेत्। तस्या मृचि द्वितीयपादे नुदस्वेतिश्रवणादिय मृगमित्राणां व्यपनुत्तिः । 'अस्मै' एवं गृह मागच्छतोऽस्य यजमानस्य 'सर्वतः' सर्वासु दिक्षु शत्रुराहित्यलक्षण मभयं भवति । न केवलं भयराहित्यं किन्तु उत्तरोत्तराभिवृद्धिसम्यक्प्राप्त्यपायादिक मपि यथोक्तमन्त्रोच्चारणेन गृहानभ्यागतो भवति ॥

गृहप्राप्तेरूर्ध्वं कर्त्तव्यं विधत्ते — "एत्य गृहान् पश्चाद् गृह्यस्याग्नेरुपविष्टायान्वारभ्याय ऋत्विगन्ततः कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोत्यनार्त्त्या अरिष्ट्या अजन्या अभयाय"–इति। 'एत्य' गृहान् प्रत्यागत्य, योऽयं 'गृह्यः' गृहे वर्त्तमानः औपासनोऽग्निः, तस्य पश्चाद् भागे 'उपविष्टाय' आसीनाय ऋत्विजे 'अन्वारभ्याय' उपसृष्टवते क्षत्रियाय, तादृशस्य क्षत्रियस्य अनार्त्त्यादिसिद्ध्यर्थम् 'ऋत्विक्' अध्वर्युः 'अन्ततः' सर्वप्रयोगान्ते 'कंसेन' कांस्यपात्रेण 'चतुर्गृहीताः' चतुर्वारस्रोक्ताः 'ऐन्द्रीः' इन्द्रदेवताकाः वक्ष्यमाणैस्त्रिभिः मन्त्रैस्तिस्र आज्याहुतीः प्रपदं यथा भवति तथा जुहुयात्। 'प्रपद' प्रकृष्टं पदम्। तथा च आहुः—

"पादा यस्यास्तु यावन्तो यावदक्षरसम्मिताः।
ऋच्यध्ययन मेतेषां प्रपदं तद्विदुर्बुधाः"–इति॥

अतः प्रपदशब्देन अक्षरपादादिवैकल्यरहितं लाक्षणिक मुच्चारण मभिधीयते। 'अनार्त्तिः' व्याधिपीडाराहित्यम्। 'अरिष्टिः' शत्रुभिरहिंसा। 'अजानिः' द्रव्यहानिराहित्यम्। 'अभयं' चौरादिभयराहित्यम् * ॥ ६ (१०)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) षष्ठः खण्डः॥ ६ (१०)॥

---

* तै० सं० १, ८.१५, तै० ब्रा० १, ७.९, शत० ब्रा० ५, ४, ३, कात्या० श्रौ० १५, ६ द्र०।

॥ अथ सप्तमः खण्डः ॥

पर्यू षु प्र धन्व वाजसातये परि वृत्रा भूर्ब्रह्म प्राण मसृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिर्णि सद्मणिर्द्विषस्तरध्या ऋणया न ईयसे स्वाहा अनु हि त्वा सुतं सोम मदामसि महे समं भुवो ब्रह्म प्राण मसृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिर्यं राज्ये वाजाँ अभि पवमान प्रगाहसे स्वाहा अजीजनो हि पवमान सूर्यं विधारे श स्वर्ब्रह्म प्राण मसृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिः क्लना पयो गोजीरया रंहमाणः पुरन्ध्या स्वाहेत्यना-र्त्तो ह वा अरिष्टो ऽजीतः सर्वतो गुप्तस्त्रय्यै विद्यायै रूपेण सर्वा दिशो ऽनु सञ्चरत्यैन्द्रे लोके प्रतिष्ठितो यस्मा एता ऋत्विगन्ततः कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोत्यथान्ततः प्रजाति मा-शास्ते गवा मश्वानां पुरुषाणा मिह गावः प्रजायध्व मिहाश्वा इह पूरुषाः इहो सहस्रदक्षिणो वीर-स्त्राता निषीदत्विति बहुर्ह वै प्रजया पशुभिर्भवति य एव मेता मन्ततः प्रजाति माशास्ते गवा मश्वानां पुरुषाणा मेष ह वाव क्षत्रियो विक्लृप्तो य मेवंविदो

याजयन्त्यथ ह तं व्येव कर्षन्ति यथा ह वा इदं निषादा वा सेऊगा वा पापकृतो वा वित्तवन्तं पुरुष मरण्ये गृहीत्वा कर्त्त मन्वस्य वित्त मादाय द्रवन्त्येव मेव त ऋत्विजो यजमानं कर्त्त मन्वस्य वित्त मादाय द्रवन्ति य मनेवंविदो याजयन्त्येतद्ध स्म वै तद्विद्वानाह जनमेजयः पारिक्षित एवंविदं हि वै मा मेवंविदो याजयन्ति तस्मादहं जयाम्यभीत्वरीं सेनां जयाम्यभीत्वर्या सेनया न मा दिव्या न मानुष्य इषव ऋच्छन्त्येष्यामि सर्व मायुः सर्वभूमिर्भविष्यामीति न ह वा एनं दिव्या न मानुष्य इषव ऋच्छन्त्येति सर्व मायुः सर्वभूमिर्भवति य मेवंविदो याजयन्ति याजयन्ति ॥ ७ (११) ॥

इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां द्वितीयोऽध्यायः ॥२॥

उक्ताहुत्यर्थं प्रथमं मन्त्र माह— "पर्यू षु प्र धन्व वाजसातये परि द्वत्रा भूर्ब्रह्म प्राण मृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये ; सह प्रजया सह पशुभिर्णि सच्चणिर्द्विषस्तरध्या ऋणया न ईयसे स्वाहा"–इति । अत्र "पर्यूषु"–इत्यादिकाया ऋचः परि द्वत्राणि सच्चणिरिति द्वितीयः पादः* ; तस्मिन् पादे 'द्वत्राणि'–इति यत् पदं , तस्य पदस्य मध्ये भूरित्यादिकं पशुभि-

* "पर्यू षु प्र धन्व वाजसातये परि द्वत्राणि सच्चणिः । द्विषस्तरध्या ऋणया न ईयसे"–इति सं० ९. ११०. १ ।

रित्यन्तं पदजातं प्रक्षेपणीयम् । वृत्रेत्येतदक्षरद्वयं पुरस्तात् , णीत्येतत् परस्तात् , मध्ये प्रक्षेपः । अत एव अस्योच्चारणस्य प्रपद मिति नाम सम्पन्नम् । प्रक्षिप्तं पदजातं यस्मिन् उच्चारणे तदुच्चारणं 'प्रपदम्' । तत्र तावत् संहिताया आम्नाताया ऋचो ऽय मर्थः— हे इन्द्र ! 'वाजसातये' अन्नलाभाय । 'परि-उ-षु'–इति निपातत्रयसमूहेन परित इत्येतावानेवार्थो ऽभिधीयते । 'परितः' सर्वतः 'प्र धन्व' प्रकर्षेण धारय । धारणार्थो धन्वति–धातुः । अस्मभ्य मन्नं धातुं चित्तं धारयेत्यर्थः । 'वृत्राणि' शत्रून् 'परि सक्षणिः' परितः निराकरिष्णुर्भव । सक्षणि–धातुरौचित्यान्निराकरणं ब्रूते । 'हिषः' शत्रून् 'तरध्यै' तरितुम् 'ऋणयाः' प्रयत्नं प्राप्तः, 'नः' अस्मदर्थम् 'ईयसे' चेष्टसे इति । अस्या ऋचि 'वृत्राणि' –इतिपदस्य मध्ये प्रक्षिप्तस्य भूरित्यादि–पशुभिरित्यन्त–पदजातस्याय मर्थः— 'अयं' क्षत्रियः 'असौ' विष्णुगुप्तादिनामको भूरादीन् 'प्रपद्यते' शरणं गच्छति । 'भूः' पृथिवी, 'ब्रह्म' वेदः, 'प्राणः' प्रसिद्धः , 'अमृतं' मरणरहितम् । देवतारूपं भूरादिकं शरणं प्रपन्नस्य क्षत्रियस्य 'प्रजया' पुत्रादिरूपया सह, 'पशुभिः' गवादिभिश्च सह 'स्वस्तये' क्षेमार्थं, त्वं 'शर्म' सुखं, 'वर्म' कवचम्, 'अभय'' भयरहितं देवतादिरूपं स्थानञ्च, कुर्विति शेषः । एतत्सिद्ध्यर्थं 'स्वाहा' तुभ्य मिदं सुहुत मस्तु ॥

प्रपदनामकं प्रथमं मन्त्र मुक्त्वा, तन्नामकं द्वितीयं मन्त्र माह— "अनु हि त्वा सुतं सोम मदामसि महे समर्य राज्ये वाजाँ अभि पवमान प्र गाहसे स्वाहा"–इति । अत्रापि "अनु हि त्वा"–इत्येतस्या ऋचि 'महे समर्य राज्ये'–इति द्वितीयः

पादः * । तत्र 'समर्य'–इति यत् पदं, तस्य समेत्यक्षरद्वयं मध्यात् कृत्वा, र्येत्येतत् तृतीय मक्षर मुपर्यवस्थाप्य, भुव इत्यादिकं पदजातं प्रक्षेपणीयम् । तस्या ऋचो ऽय मर्थः— हे सोम ! 'सुतम्' अभिषुतं त्वाम् 'अनुमदामसि' वयं हृष्यामः । समरं युद्धम् , त मर्हति 'समर्यः' शूरः ; तथाविध हे इन्द्र ! 'महे' महति राज्ये † 'एनं' क्षत्रियं , स्थापयेति शेषः । हे 'पवमान' शोधक ! 'वाजान्' अन्नानि 'अभिप्रगाहसे' सर्वतः प्रकर्षेण गाहसे विलोड़यसि , सम्पादयसीत्यर्थः । पदमध्ये प्रक्षिप्तस्य पदजातस्य आदौ 'भुवः'–इत्यन्तरिक्ष मुच्यते ; ब्रह्मेत्यादिकं स्वाहाकारान्तं पूर्ववत् (२१७ पृ०) ॥

प्रपदनामकं तृतीयं मन्त्र माह— "अजीजनो हि पवमान सूर्यं विधारे शक्मना पयो गोजीरया रंहमाणः पुरन्ध्या स्वाहेति"–इति । अत्रापि 'विधारे शक्मना'–इति द्वितीयः पादः ‡ । तत्र तस्य शक्मनेतिपदस्य शेत्येक मक्षर मधस्तादुच्चार्य, क्मनेत्यक्षर मुपरिष्टादवस्थाप्य, मध्ये स्वरित्यादिकं पशुभिरित्यन्तं पदजातं प्रक्षेपणीयम् । तस्या ऋचो ऽय मर्थः— हे 'पवमान' शोधक ! इन्द्र ! त्वं सूर्यम् 'अजीजनः' उत्पादितवानसि । 'शक्मना' स्वशक्त्या 'पयः' जलं 'विधारे' विशेषेण

---

* "अनु हि त्वा सुतं सोम मदामसि महे समर्य राज्ये । वाजा अभि पवमान प्र गाहसे"–इति सं० ९. ११०. २ ।

† पदसंहितायां तु 'समर्यराज्ये'–इत्येकं पदम् , समनुष्यराज्ये इति च तद्व्याख्यानं कृत मनेनैवाचार्येण संहिताभाष्ये ।

‡ "अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः । गोजीरया रंहमाणः पुरन्ध्या"–इति सं० ९. ११०. ३ ।

रित्यन्तं पदजातं प्रक्षेपणीयम् । इत्रेत्येतदक्षरद्वयं पुरस्तात् , णीत्येतत् परस्तात् , मध्ये प्रक्षेपः । अत एव अस्योच्चारणस्य प्रपद मिति नाम सम्पन्नम् । प्रक्षिप्तं पदजातं यस्मिन् उच्चारणे तदुच्चारणं 'प्रपदम्' । तत्र तावत् संहिताया मान्नाताया ऋचो ऽय मर्थः—हे इन्द्र ! 'वाजसातये' अन्नलाभाय । 'परि-उ-षु'–इति निपातत्रयसमूहेन परित इत्येतावानेवार्थो ऽभिधीयते । 'परितः' सर्वतः 'प्र धन्व' प्रकर्षेण धारय । धारणार्थो धन्वति–धातुः । अस्मभ्य मन्नं धातुं चित्तं धारयेत्यर्थः । 'इत्राणि' शत्रून् 'परि सक्षणिः' परितः निराकरिष्णुर्भव । सक्षणि–धातुरौचित्यान्निराकरणं ब्रूते । 'द्विषः' शत्रून् 'तरध्यै' तरितुम् 'ऋणयाः' प्रयत्नं प्राप्तः, 'नः' अस्मदर्थम् 'ईयसे' चेष्टसे इति । अस्या ऋचि 'इत्राणि' –इतिपदस्य मध्ये प्रक्षिप्तस्य भूरित्यादि–पशुभिरित्यन्त–पदजातस्याय मर्थः— 'अयं' क्षत्रियः 'असौ' विष्णुगुप्तादिनामको भूरादीन् 'प्रपद्यते' शरणं गच्छति । 'भूः' पृथिवी, 'ब्रह्म' वेदः, 'प्राणः' प्रसिद्धः , 'अमृतं' मरणरहितम् । देवतारूपं भूरादिकं शरणं प्रपन्नस्य क्षत्रियस्य 'प्रजया' पुत्रादिरूपया सह, 'पशुभिः' गवादिभिश्च सह 'स्वस्तये' क्षेमार्थं, त्वं 'शर्म' सुखं, 'वर्म' कवचम्, 'अभय'' भयरहितं देवतादिरूपं स्थानञ्च, कुर्विति शेषः । एतत्सिद्ध्यर्थं 'स्वाहा' तुभ्य मिदं सुहुत मस्तु ॥

प्रपदनामकं प्रथमं मन्त्र मुक्त्वा, तन्नामकं द्वितीयं मन्त्र माह— "अनु हि त्वा सुतं सोम मदामसि महे सम भूवो ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिर्य राज्ये वाजाँ अभि पवमान प्र गाहसे स्वाहा"–इति । अत्रापि "अनु हि त्वा"–इत्येतस्या ऋचि 'महे समर्य राज्ये'–इति द्वितीयः

पादः * । तत्र 'समर्य'–इति यत् पदं, तस्य समेत्यक्षरद्वय मधस्तात् कृत्वा, र्येत्येतत् तृतीय मक्षर मुपर्यवस्थाप्य, भुव इत्यादिकं पदजातं प्रक्षेपणीयम् । तस्या ऋचो ऽय मर्थः— हे सोम ! 'सुतम्' अभिषुतं त्वाम् 'अनुमदामसि' वयं हृष्यामः । समरं युद्धम् , त मर्हति 'समर्यः' शूरः ; तथाविध हे इन्द्र ! 'महे' महति राज्ये † 'एनं' क्षत्रियं , स्थापयेति शेषः । हे 'पवमान' शोधक ! 'वाजान्' अन्नानि 'अभिप्रगाहसे' सर्वतः प्रकर्षेण गाहसे विलोड़यसि , सम्पादयसीत्यर्थः । पदमध्ये प्रक्षिप्तस्य पदजातस्य आदौ 'भुवः'–इत्यन्तरिक्ष मुच्यते ; ब्रह्मेत्यादिकं स्वाहाकारान्तं पूर्ववत् (२१७ पृ०) ॥

प्रपदनामकं तृतीयं मन्त्र माह— "अजीजनो हि पवमान सूर्यं विधारे शक्मना पयो गोजीरया रंहमाणः पुरन्ध्या स्वाहेति"–इति । अत्रापि 'विधारे शक्मना'–इति द्वितीयः पादः ‡ । तत्र तस्य शक्मनेतिपदस्य शेत्येक मक्षर मधस्तादुच्चार्य, क्मनेत्यक्षर मुपरिष्टादवस्थाप्य, मध्ये स्वरित्यादिकं पशुभिरित्यन्तं पदजातं प्रक्षेपणीयम् । तस्या ऋचो ऽय मर्थः— हे 'पवमान' शोधक ! इन्द्र ! त्वं सूर्यम् 'अजीजनः' उत्पादितवानसि । 'शक्मना' स्वशक्त्या 'पयः' जलं 'विधारे' विशेषेण

---

* "अनु हि त्वा सुतं सोम मदामसि महे समर्य राज्ये । वाजा अभि पवमान प्र गाहसे"–इति सं० ९. ११०. २ ।

† पदसंहितायां तु 'समर्यराज्ये'–इत्येकं पदम् , समनुष्यराज्ये इति च तद्व्याख्यानं कृत मनेनैवाचार्येण संहिताभाष्ये ।

‡ "अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः । गोजीरया रंहमाणः पुरन्ध्या"–इति सं० ९. ११०. ३ ।

मेघमध्ये धारयसि । 'गोजीरया' गवां जीवनेन निमित्तेन 'रंहमाणः' वृष्टिप्रदानार्थं सञ्चरन् , 'पुर' पूर्णफलं 'ध्या' चिन्तया * । गोजीरयेत्युपलक्षणं , सर्वप्राणिजीवन मित्यर्थः । अत्रापि 'शक्मना'-इतिपदमध्ये प्रक्षिप्तस्य पदजातस्यादौ 'स्वः'-इति द्युलोको ऽभिधीयते ; ब्रह्मेत्यादिकं स्वाहाकारान्तं पूर्ववत् (२१७ पृ०) । एतेषां प्रपदनामकानां मन्त्राणां लक्षणं पूर्व मेव 'पादा यस्यासु'-इतिश्लोकेनोदाहृतम् (२१४ पृ०) । पर्युष्टिव्या-दिकाया ऋचो मध्ये भूर्ब्रह्म प्राणेत्यादिकायाः अस्या ऋचो यावन्तः पादाः यावदक्षरसम्मिताः, तेषां सर्वेषां पतनं प्रपद मिति तस्य लक्षणवाक्यस्यार्थः ॥

उक्तमन्त्रत्रयसाध्या आहुतीः प्रशंसति— "अनार्त्तो ह वा अरिष्टो ऽजीतः सर्वतो गुप्तस्त्रय्यै विद्यायै रूपेण सर्वा दिशो ऽनु सञ्चरत्यैन्द्रे लोके प्रतिष्ठितो यस्मा एता ऋत्विगन्ततः कंसेन चतु-र्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोति"-इति । 'यस्मै' क्षत्रियाय 'ऋत्विक्' अध्वर्युः 'अन्ततः' अभिषेकप्रयोगान्ते यथोक्त-क्रमेण जुहोति । असौ क्षत्रियः 'अनार्त्तः' रोगरहितः, 'अरिष्टः' शत्रुभिरहिंसितः, तैः शत्रुभिः युद्धेऽप्यजितः†, सर्वतो 'गुप्तः' इन्द्रेण रक्षितः । केन साधनेन रक्षित इति, तदुच्यते— 'त्रय्यै विद्यायै रूपेण' वेदत्रयोक्तमन्त्रेणेत्यर्थः । तेन रक्षितः सन् , 'सर्वा दिशः' प्राच्याद्याः 'अनुसञ्चरति' अनुक्रमेण विजयार्थं प्रवर्त्तते , मरणा-दूर्ध्वम् ऐन्द्रे लोके प्रतिष्ठितो भवति ॥

होमादूर्ध्वं माशीर्मन्त्रपाठं विधत्ते— "अथान्ततः प्रजाति

---

* " 'पुरन्ध्या' बहुविधप्रज्ञानेन"-इति संहिताभाष्ये सायणः ।

† मूलपाठस्तु अजीत इति दीर्घमध्यः ; तस्यैव व्याख्यान मजित इति ।

माशास्ते,— गवा मखानां पुरुषाणा मिह गावः प्रजायध्व मिहा-खा इह पूरुषाः इहो सहस्रदक्षिणो वीरस्त्राता निषीदत्विति"-इति। 'अथ' होमानन्तरम्, 'अन्ततः' प्रयोगान्ते "इह गावः"-इत्यादिमन्त्रेण * गवादीनां 'प्रजातिम्' उत्पत्तिम् 'आशास्ते' प्रार्थयेत। मन्त्रस्याय मर्थः— गावः 'इह' मद्राष्ट्रे 'प्रजायध्वं' प्रकर्षेणोत्पन्ना भवत। एव मखाः, पुरुषाश्च। 'इहो' अस्मिन् एव राष्ट्रे 'सहस्रदक्षिण.' यागेषु सहस्रसङ्ख्यदक्षिणादानशीलो 'वीरः' पुत्रः 'त्राता' प्रजानां रक्षकः सन्, निषीदतु॥

अनेन मन्त्रेण प्रार्थनं प्रशंसति— "बहुर्ह वै प्रजया पशुभि-र्भवति य एव मेता मन्तत: प्रजाति माशास्ते गवा मखानां पुरु-षाणाम्"-इति। य एव माशास्ते क्षत्रियः, प्रजादिभिः बहुर्ह वै स्या मिति; स एव तथा भवति॥

पुनरभिषेकपर्यन्ते ऽस्मिन् क्षत्रिययागे याजयितृणा मृत्विजां वेदनं प्रशंसति— "एष ह वाव क्षत्रियो ऽविक्षष्टो य मेवंविदो याजयन्ति"-इति। 'एवम्' उक्ताभिषेकप्रकारं जानन्त ऋत्विजो 'य' क्षत्रियं याजयति, 'एष एव' क्षत्रियः सर्वेषु 'अविक्षष्टः' अनपक्षष्टः; न ह्यस्य कदाचिदप्यपकर्षो भवति॥

ऋत्विजा मभिषेकपरिज्ञानाभावं निन्दति— "अथ ह तं व्येव कर्षन्ते, यथा ह वा इदं निषादा वा सेऊगा वा पापकृतो वा वित्तवन्तं पुरुष मरण्ये गृहीत्वा कर्त्तं मन्वस्य वित्त मादाय द्रवन्त्येव मेव त ऋत्विजो यजमानं कर्त्तं मन्वस्य वित्त मादाय द्रवन्ति, य मनेवंविदो याजयन्ति"-इति। 'अनेवंविदः' अभि-षेकप्रकार मजानन्त ऋत्विजो 'य' क्षत्रियं याजयन्ति, 'तं'

---

* सा० म० ब्रा० १, ३, १३। "०णोऽपि पूषा नि०"-इति तत्र पाठः।

क्षत्रियं 'विकर्षन्ते एव' विकृष्ट मपकृष्टं कुर्वन्त्येव । तत्रेदं निदर्शन मुच्यते— 'निषादाः' नीचजातयो मनुष्याः, 'सेळगाः' चौराः । इळा अन्नं, तया सह वर्त्तन्ते इति 'सेळाः' धनिकाः, तान् धनापहारार्थं गच्छन्तीति चौराः 'सेळगाः' । 'पापकृतः' हिंसाकारिणः । त एते त्रिविधा दुष्टाः 'वित्तवन्तं' बहुधनोपेतं पुरुष मरण्यमध्ये गृहीत्वा 'कर्त्त मन्वस्य' कस्मिंश्चिदन्धकूपादिरूपे गर्ते तं प्रक्षिप्य, तदीयं धन मपहृत्य 'द्रवन्ति' पलायन्ते ; एव मेव अनभिज्ञा ऋत्विजो यजमानं नरकरूपं कर्त्त मन्वस्य, नरकहेतोरनुष्ठाने अवस्थाप्य, दक्षिणारूपेण तदीयं द्रव्य मपहृत्य, स्वर्गहेषु गच्छन्ति ॥

उक्ताभिषेकपर्यन्तक्षत्रिययाग मुदाहरणमुखेन प्रशंसति— "एतद्ध स्म वै तद्विद्वानाह जनमेजयः पारिक्षितः,— एवंविदं हि वै मा मेवंविदो याजयन्ति, तस्मादहं जयाम्यभीत्वरीं सेनां जयाम्यभीत्वर्या सेनया न मा दिव्या न मानुष्य इषव ऋच्छन्त्येष्यामि सर्वं मायुः सर्वभूमिर्भविष्यामीति"–इति । परिक्षितस्य राज्ञः पुत्रो जनमेजयः, 'तदेतत्' सर्वं प्रयोगमाहात्म्यं विद्वान्, सभामध्ये एव मुवाच— अह मप्येवंवित्, ऋत्विजो ऽप्येवंविदः ; तस्माद् अभिषेकान्तेन यागेन इन्द्रयुद्धे जयामि । किञ्च 'अभीत्वरीम्' अभितो युद्धार्थं मुद्युक्तां परकीयां सेनां सदृश्या सेनया जयामि । तथाविधं मां 'दिव्या इषवः' देवप्रेरिता वाणाः न प्राप्नुवन्ति, 'मानुष्यः' चेषवः नाप्नुवन्ति, अपमृत्युरहितः सर्वं मप्यायुः प्राप्स्यामि, सर्वा चतुस्सागरपरिवेष्टिता भूमिर्यस्याधीना सोऽयं 'सर्वभूमिः', तादृशो भविष्यामीति ॥

जनमेजयवाक्योदाहरणे दृढीकृत मर्थं निगमयति— "न ह वा एनं दिव्या न मानुष्य इषव ऋच्छन्त्येति, सर्वं मायुः

सर्वभूमिर्भवति, य मेवंविदो याजयन्ति-याजयन्ति"-इति । स्पष्टोऽर्थः । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ७ (११) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) सप्तमः खण्डः ॥ ७ (११) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः द्वितीयोऽध्यायः ॥

———

॥ अथ तृतीयाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ अथात ऐन्द्रो महाभिषेकस्तं देवा अब्रुवन्त्सप्रजापतिका अयं वै देवाना मोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतम इम मेवाभिषिञ्चामहा इति तथेति तद्वैतदिन्द्र मेव तस्मा एता मासन्दीं समभरन्नृचं नाम तस्यै बृहच्च रथन्तरञ्च पूर्वौ पादावकुर्वन् वैरूपं च वैराजं चापरौ शाक्ररैवते शीर्षण्ये नौधसञ्च कालेयं चानूच्ये ऋचः प्राचीनातानान्त्सामानि तिरश्चीनवायान् यजूंष्यतीकाशान् यश आस्तरणं श्रिय मुपबर्हणं तस्यै सविता च बृहस्पतिश्च पूर्वौ पादावधारयतां वायुश्च पूषा चापरौ मित्रावरुणौ शीर्षण्ये अश्विनावनूच्ये स एता मासन्दी मारोहदसवस्त्वा गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्ना ऽऽरोहन्तु तानन्वारोहामि साम्राज्याय रुद्रास्त्वा त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना ऽऽरोहन्तु तानन्वारोहामि भौज्यायादित्यास्त्वा जागतेन छन्दसा सप्तदशेन

स्तोमेन वैरूपेण साम्नाऽऽरोहन्तु तानन्वारोहामि स्वाराज्याय विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन वैराजेन साम्नाऽऽरोहन्तु तानन्वारोहामि वैराज्याय साध्याश्च त्वाप्नाश्च देवाः पाङ्क्तेन छन्दसा त्रिणवेन स्तोमेन शाक्करेण साम्नाऽऽरोहन्तु तानन्वारोहामि राज्याय मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्नाऽऽरोहन्तु तानन्वारोहामि पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहामीत्येता मासन्दी मारोहत् त मेतस्या मासन्द्या मासीनं विश्वे देवा अब्रुवन्न वा अनभ्युत्क्रुष्ट इन्द्रो वीर्यं कर्तुं महत्यभ्येन मुत्क्रोशामेति तथेति तं विश्वे देवा अभ्युदक्रोशन्निमं देवा अभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं राजानं राजपितरं परमेष्ठिनं पारमेष्ठ्यं त्वत्र मजनि क्षत्रियो ऽजनि विश्वस्य भूतस्याधिपतिरजनि विशा मत्ता ऽजनि पुरां भेत्ता ऽजन्यसुराणां हन्ता ऽजनि ब्रह्मणो गोप्ता ऽजनि धर्मस्य गोप्ता ऽजनीति त मभ्युत्क्रुष्ट प्रजापतिरभिषेच्यन्नेतयर्चाभ्यमन्त्रयत ॥ १ (१२) ॥

॥ श्रीगणेशाय नमः ॥

पुनः कार्योऽभिषेकोऽन्ते क्रत्वन्तत्वेन वर्णितः ।
अभिषेकः पुमर्थो यस्तस्योपोद्घात उच्यते ॥ १ ॥

तत्रादाविन्द्रस्याभिषेकं प्रतिजानीते — "अथात ऐन्द्रो महाभिषेकः"–इति । 'अथ' मानुषक्षत्रियाभिषेकोक्त्यनन्तरम्, यतो दैवोऽभिषेको बुभुत्सितः, अतः कारणादिन्द्रसम्बन्धी महाभिषेकः, कथ्यत इति शेषः । आरोहणाभ्युत्क्रोशनाभिमन्त्रणादिभिर्वक्ष्यमाणैरस्याभिषेकस्य महत्त्वं द्रष्टव्यम् ॥

तदभिषेकार्थं देवविचारं दर्शयति— "ते देवा अब्रुवन्सप्रजापतिका,— अयं वै देवाना मोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतम इम मेवाभिषिञ्चामहा इति ; तथेति ; तद्वै तदिन्द्र मेव"–इति । प्रजापतिना सह वर्त्तन्ते इति 'सप्रजापतिकाः' । 'ते' अग्न्यादयो देवाः परस्पर मिदम् 'अब्रुवन्' हस्तेन एनं प्रदर्श्य कथयन्ति । अय मेवेन्द्रो 'देवानां' मध्ये 'ओजिष्ठः' अतिशयेनाष्टमधातुयुक्तः, 'बलिष्ठः' अतिशयेन शरीरबलयुक्तः, 'सहिष्ठः' अतिशयेन वैर्यभिभवशीलः, 'सत्तमः' अतिशयेन स्वभक्तेषु साधुः, 'पारयिष्णुतमः' अतिशयेन प्रक्रान्तस्य कार्यस्य समाप्तिकृत् ; तस्मादिम मेव सर्वे वय मभिषिञ्चामहै । इति कैश्चिद् उक्ते सति, अन्ये सर्वेऽपि 'तथा–इति' अङ्गीकृत्य , 'तद्वै' तदानी मेव, 'तदिन्द्र मेव' तं सर्वैरनुमित मिन्द्र मेव, अभ्यषिञ्चन्निति शेषः ॥

तत्र प्रकारं दर्शयति — "तस्मा एता मासन्दीं समभरन्नूर्चं नाम ; तस्यै बृहच्च रथन्तरञ्च पूर्वौ पादावकुर्वन् , वैरूपं च वैराजं चापरौ, शाक्कररैवते शीर्षण्ये, नौधसञ्च कालेयं चानूचे , ऋचः प्राचीनातानान्त्सामानि शिरश्चीनवायान् , यजूंष्यतीकाशान् ,

यश आस्तरणं, श्रिय मुपबर्हणं; तस्यै सविता च बृहस्पतिश्च पूर्वौ पादावधारयतां, वायुश्च पूषा चापरौ, मित्रावरुणौ शीर्षण्ये, अश्विनावनूच्ये; स एता मासन्दी मारोहद्"-इति। 'तस्मै' इन्द्रार्थम् 'एतां' वक्ष्यमाणां वेदमयी मासन्दीं समभरन्। 'ऋचं नाम'-इति आसन्द्या विशेषणम्, ऋग्रूपा मेतन्नामिका मित्यर्थः। 'तस्यै' तस्या ऋग्रूपाया आसन्द्या बृहदादीन्यष्टसामानि पूर्वपादाद्यष्टावयवान् अकुर्वन्। आसन्द्यां शयानस्येन्द्रस्य शिरोदेशस्थं फलकं 'शीर्षण्य', तच्च पादेशावस्थितस्य फलकस्योपलक्षणम्; अत एव 'शीर्षण्ये'-इति द्विवचन मुच्यते। 'अनूच्ये' पार्श्वद्वयवर्त्तिनी फलके। ऋग्रूपा ये मन्त्राः सन्ति, तान् 'प्राचीनातानान्' प्राक्प्रत्यगायतनत्वेन विस्तारितान् दीर्घतन्तुविशेषानकुर्वन्। गीयमानानि 'सामानि' 'तिरश्चीनवायान्' तिर्यक्त्वेन वयनहेतून् ऋजुविशेषान् अकुर्वन्। यजूंषि 'अतीकाशान्' रज्वन्तरालच्छिद्रविशेषान् अकुर्वन्। 'यशः' कीर्त्तिः, देवतारूपम् तदासन्द्या उपरि आस्तरणम्। 'श्रियं' या तु श्रीः सम्पदभिमानिनी देवता, ताम् 'उपबर्हणम्' शिरस उपधान मकुर्वन्। 'तस्यै' तस्या आसन्द्याः पादादीनष्टावयवान् सवित्रादयो ऽष्टौ देवा अधारयन्। इन्द्रः 'एतां' वेदमयीं वक्ष्यमाणैः षण्मन्त्रैरारोहत्॥

तान् मन्त्रान् दर्शयति— "वसवस्त्वा गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्ना ऽऽरोहन्तु, तानन्वारोहामि साम्राज्याय; रुद्रास्त्वा त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना ऽऽरोहन्तु, तानन्वारोहामि भौज्याया; ऽऽदित्यास्त्वा जागतेन छन्दसा सप्तदशेन स्तोमेन वैरूपेण साम्ना ऽऽरोहन्तु, तानन्वारोहामि

स्वाराज्याय ; विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन वैराजेन साम्ना ऽऽरोहन्तु , तानन्वारोहामि वैराज्याय ; साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन छन्दसा त्रिणवेन स्तोमेन शाक्करेण साम्ना ऽऽरोहन्तु , तानन्वारोहामि राज्याय ; मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्ना ऽऽरोहन्तु, तानन्वारोहामि पारमेष्ठ्याय ; माहाराज्यायाधिपत्याय स्वावश्या-यातिष्ठायारोहामीत्येता मासन्दी मारोहत्"–इति । वस्वादयो देवगणाः, गायत्र्यादिच्छन्दोभिः, त्रिवृदादिस्तोमैः ; रथन्तरादि-सामभिश्च सह हे आसन्दि ! त्वां प्रथमत आरोहन्तु ; तान् 'अनु' पश्चादहं मारोहामि । 'आप्त्याः'–इत्यनेनापि वस्वादिशब्दवत् कश्चिद्देवगणविशेष उच्यते । साम्राज्यादीन्यारोहणप्रयोजनानि । एते च शब्दाः पूर्वाध्याये "व्याघ्रचर्मणा स्तृणाति"–इत्यस्मिन् खण्डे (१८६ पृ०) व्याख्याताः । एतैः षड्भिर्मन्त्रैरिन्द्र उक्ता मासन्दी मारोहत् ॥

इन्द्रारोहणादूर्ध्वं देवाना मभ्युत्क्रोशनं दर्शयति— "त मेतस्या मासन्द्या मासीनं विश्वे देवा अब्रुवन् ,— न वा अनभ्युत्क्रुष्ट इन्द्रो वीर्यं कर्तुं मर्हत्यभ्येन मुत्क्रोशामेति ; तथेति ; तं विश्वे देवा अभ्युदक्रोशन्निमं देवा अभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोज-पितरं स्वराजं स्वाराज्यं विराजं वैराज्यं राजानं राजपितरं परमेष्ठिनं पारमेष्ठ्यं , क्षत्र मजनि क्षत्रियो ऽजनि विश्वस्य भूत-स्याधिपतिरजनि विशा मत्ता ऽजनि पुरां भेत्ता ऽजन्यसुराणां हन्ता ऽजनि ब्रह्मणो गोप्ता ऽजनि धर्मस्य गोप्ता ऽजनीति"–इति । 'एतस्यां' वेदमय्या मासन्द्या मासीनं 'तम्' इन्द्रं प्रति 'विश्वे' सर्वे देवाः परस्पर मिद मब्रुवन् । यथा लोके वन्दिनो गुणकथनेन

राज्ञः कीर्त्तिं कुर्वन्ति, एव मत्रापि गुणकीर्त्तनम् 'अभ्युत्क्रोशनम्', तेन रहितः 'अनभ्युत्क्रुष्टः' इन्द्रो युद्धादौ वीर्यं कर्त्तुं नैवार्हति ; कीर्त्तिं मन्तरेण परेषां प्रीत्यनुदयात् । तस्माद् अभितः 'एनम्' इन्द्रम् 'उत्क्रोशाम' उद्घोषयामि । 'इति' एवं विचार्य, 'तथा-इति' अङ्गीकृत्य, 'तम्' इन्द्रम् सर्वे देवा अभ्युदक्रोशन्। इम मित्यादिरभ्युत्क्रोशनप्रकारः। हे देवाः ! 'इमम्' इन्द्रम् अभितः 'उक्रोशत' उद्घोषयत। कीदृश मिन्द्रम् ? सम्राट्स्वरूपम्, अत एव साम्राज्यं कर्त्तुं मर्हम् ; 'भोज" भोक्तारम्, अत एव 'भोजपितर" भोगपालकम् ; स्वराड्रूपत्वादेव स्वाराज्यं कर्तुं मर्हम् ; विराड्रूपत्वादेव वैराज्यं कर्त्तुं मर्हम् ; राजरूपत्वाद् 'राजपितर' सर्वेषां राज्ञां पालकम् ; परमेष्ठिरूपत्वात् पारमेष्ठ्य पद मनुभवितुं योग्यम्। 'क्षत्र मजनि' ईदृशी क्षत्रियजातिर्लोके समुत्पन्ना। तज्जातिमान् क्षत्रियः पुरुषः समुत्पन्नः। सर्वस्य प्राणिजातस्याधिपतिरुत्पन्नः। 'विशां' प्रजानाम् 'अत्ता' भोक्ता समुत्पन्नः। 'पुरां' परकीयानां 'भेत्ता' विदारयिता समुत्पन्नः। असुराणां 'हन्ता' घातकः समुत्पन्नः। 'ब्रह्मणः' वेदस्य 'गोप्ता' रक्षकः समुत्पन्नः। 'इति' अय मुत्क्रोशनमन्त्रः ॥

अभ्युत्क्रोशनादूर्द्धं प्रजापतिकर्त्तव्यं दर्शयति— "त मभ्युत्क्रुष्टं प्रजापतिरभिषेक्ष्यन्नेतयर्चाभ्यमन्त्रयत"-इति। 'एतया' निषत्सादेति (२२९ पृ०) वक्ष्यमाणया ॥ १ (१२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां तृतीयाध्याये
(अष्टत्रिंशाध्याये) प्रथमः खण्डः ॥ १ (१२) ॥

———

॥ अथ द्वितीयः खण्डः ॥

निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठाय सुक्रतुरिति त मेतस्या मासन्द्या मासीन प्रजापतिः पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्द्धायाभ्यषिञ्चद् इमा आपः शिवतमा इत्येतेन ऋचेन देवस्य त्वेति च यजुषा भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः ॥ २ (१३) ॥

"एतयर्चाभ्यमन्त्रयत"–इत्यत्र योऽयं मन्त्र ऋक्शब्देन विवक्षितः, तं मन्त्रं दर्शयति— "निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठाय सुक्रतुरिति"–इति । 'धृतव्रतः' स्वीकृतनियमो 'वरुणः' सर्वस्यारिष्टस्य निवारयितेन्द्रः, 'पस्त्यासु' गृहेष्वागत्य, साम्राज्यादिफलसिद्ध्यर्थं 'सुक्रतुः' शोभनसङ्कल्पो भूत्वा 'निषसाद' अस्या मासन्द्यां निषण्णवान् ॥

अनेन मन्त्रेणाभिमन्त्रितस्येन्द्रस्याभिषेकप्रकारं दर्शयति— "त मेतस्या मासन्द्या मासीनं प्रजापतिः पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्द्धायाभ्यषिञ्चद्, इमा आपः शिवतमा इत्येतेन ऋचेन, देवस्य त्वेति च यजुषा, भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः"–

इति । 'एतस्यां' पूर्वोक्तायां वेदमय्या मासन्द्या मासीनं 'तम्' इन्द्रं प्रजापतिरभ्यषिञ्चत् । किं कुर्वन् ? 'पुरस्तात्' आसन्द्याः पूर्वस्यां दिशि प्रत्यङ्मुखस्तिष्ठन् । किं कृत्वा ? 'आर्द्रया' आर्द्रपत्रोपेतया उदुम्बरशाखया सुवर्णमयेन च पवित्रेण 'अन्तर्धाय' व्यवधानं कृत्वा । केन मन्त्रेण ? "इमा आपः"-इत्यादिकेन, क्रत्वङ्गाभिषेके प्रोक्तेन (१८६ पृ०) त्रिविधेन मन्त्रजातेन ॥२(१३)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां तृतीयाध्याये
(अष्टत्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (१३) ॥

॥ अथ तृतीयः खण्डः ॥

अथैनं प्राच्यां दिशि वसवो देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय तस्मादेतस्यां प्राच्यां दिशि ये के च प्राच्यानां राजानः साम्राज्यायैव ते ऽभिषिच्यन्ते समाख्यत्वेनानभिषिक्तानाचक्षत एता मेव देवानां विहितिं मन्वथैनं दक्षिणस्यां दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्भौ-

ज्याय तस्मादेतस्यां दक्षिणस्यां दिशि ये के च सत्वतां राजानो भौज्यायैव ते ऽभिषिच्यन्ते भोजेत्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैनं प्रतीच्यां दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्याय तस्मादेतस्यां प्रतीच्यां दिशि ये के च नीच्यानां राजानो ये ऽप्राच्यानां स्वाराज्यायैव ते ऽभिषिच्यन्ते स्वराळित्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मुदीच्यां दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्याय तस्मादेतस्या मुदीच्यां दिशि ये के च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्रा इति वैराज्यायैव ते ऽभिषिच्यन्ते विराळित्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाप्राश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय तस्मादस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपञ्चालानां

राजानः सवशोशीनराणां राज्यायैव ते ऽभिषिचन्ति राजेत्येनानभिषिक्तानाचक्षत एता मेव देवानां विहितिं मन्वथैन मूर्ध्वायां दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति स परमेष्ठी प्राजापत्यो ऽभवत् स एतेन महाभिषेकेणाभिषिक्त इन्द्रः सर्वा जितीरजयत् सर्वाल्लो*कानविन्दत् सर्वेषां देवानां श्रेष्ठ्या मतिष्ठां परमता मगच्छत्साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्यं जित्वाऽस्मिँल्लोके † स्वयम्भूः स्वराळमृतो ऽमुष्मिन्त्स्वर्गे लोके सर्वान्कामानाप्त्वा ऽमृतः समभवत् समभवत् ॥ ३ (१४) ॥

इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां तृतीयोऽध्यायः॥ ३ ॥

इन्द्रस्य प्रजापतिकृताभिषेकादूर्ध्वं दिग्भेदेन देवविशेषैरभिषेकः कृतः; तत्र प्राच्यां दिशि तमभिषेकं दर्शयति—"अथैनं प्राच्यां दिशि वसवो देवाः षड्भिश्चैव पञ्चविंशैरहोभि-

* 'सर्वान्लो०'–इति क, 'सर्वाल्लो०'–इति ग, 'सर्वाल्लो०'–इति ख, ङ।
† 'ोस्मिंलोकें'–इति क, ग, 'ोस्मिंल्लोके'–इति ङ।

रभ्यषिञ्चन्नेतेन च ऋचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय"–इति । 'अथ' प्राजापत्याभिषेकानन्तरम्, 'एनम्' इन्द्रं प्राच्यां दिशि अवस्थिता वसवो देवा एकत्रिंशत्सु अहस्सु पूर्वोक्तैर्मन्त्रैः अभ्यषिञ्चत्; तच्च साम्राज्यसिद्धये भवति ॥

इदानीं लौकिकाचारप्रदर्शनेनेन्द्रस्य प्राच्यां दिशि तमभिषेकं दृढयति— "तस्मादेतस्यां प्राच्यां दिशि ये के च प्राचानां राजानः साम्राज्यायैव ते ऽभिषिच्यन्ते सम्राळित्येनानभिषिक्तानाचक्षत एता मेव देवानां विहितिं मनु"–इति । यस्माद् वसुभिः प्राच्यां दिश्यभिषेकः कृतः, 'तस्मात्' इदानीमपि 'प्राचानां' पूर्वदिग्वर्त्तिनां मनुष्याणां ये के च राजानः सन्ति, ते सर्वेऽपि 'देवानां' वसूनां सम्बन्धिनीम् 'एता मेव विहितिं' पूर्वोक्तामेव विधानम् अनु 'साम्राज्याय' साम्राज्यसिद्ध्यर्थमभिषिञ्चन्ते । अत एव अभिषिक्तान् 'एनान्' राज्ञः 'सम्राट्' 'इति' अनेन शब्देन व्यवहरन्ति ॥

दिगन्तरेषु* देवान्तरैरिन्द्राभिषेकं दर्शयति— "अथैनं दक्षिणस्यां दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च ऋचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्भौज्याय तस्मादेतस्यां दक्षिणस्यां दिशि ये के च सत्वतां राजानो भौज्यायैव ते ऽभिषिच्यन्ते भोजित्येनानभिषिक्तानाचक्षत एता मेव देवानां विहितिं मन्वथैनं प्रतीच्यां दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च ऋचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्याय तस्मादेतस्यां प्रतीच्यां दिशि ये के च नीचानां राजानो ये ऽप्राचानां स्वाराज्यायैव ते ऽभिषिच्यन्ते स्वराळित्ये-

* "दिगन्तरेऽपि"–इति ख ।

नानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मुदीच्यां दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च स्तुचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्याय तस्मादेतस्या मुदीच्यां दिशि ये के च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्रा इति वैराज्यायैव ते ऽभिषिच्यन्ते विराळित्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चासाश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च स्तुचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय तस्मादस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपञ्चालानां राजानः सवशोशीनराणां राज्यायैव ते ऽभिषिच्यन्ते राजेत्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मूर्ध्वायां दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च स्तुचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति स परमेष्ठी प्राजापत्यो ऽभवत्"–इति । प्रथमपर्यायवद् व्याख्येयम् । 'सत्वतां' दक्षिणस्यां दिशि वर्त्तमानाः प्राणिनः सत्वन्नामकाः *, तेषाम् । ये राजानोऽभिषिक्ताः, ते 'भोज' 'इति' अनेन शब्देन व्यवक्रियन्ते । प्रतीच्यां दिशि वर्त्तमानाः प्राणिनो नीच्या अपाच्याश्च† । निकर्षं मञ्चन्तीति 'नीच्याः', अपकर्षं मञ्चन्तीति 'अपाच्याः' । जात्या निकर्षः, व्यवहारेणापकर्षः । उभयविधानां प्राणिनां ये राजानः सन्ति, ते 'स्वराट्' 'इति' अनेन

---

* "तदेतद् गाथयाभिगीतम्— 'शतानीकः समन्तासु मेध्यं साचाजितो हयम् । आदत्त यज्ञं काशीनां भरतः सत्वता मिव'–इति"–इति शत० ब्रा० १३. ५. ४. २१ ।

† 'उड्राः कुन्तलाश्च अपाच्याः'–इति हे० अभि० चि० ९६१ ।

शब्देन व्यवक्रियन्ते । उदीच्यां दिशि 'हिमवन्तं परेण' हिमवत्पर्वतस्य परभागे 'जनपदाः' ग्रामविशेषाः 'उत्तरकुरवः' उत्तरकुरुनामकाः *, 'उत्तरमद्राः' उत्तरमद्रनामकाः सन्ति, तत्रत्या राजानो 'विराट्' 'इति' अनेन शब्देन व्यवक्रियन्ते । 'मध्यमा दिक्' मध्यदेशः । स च प्राच्यादिभिर्दिग्भिः सर्वाभिरपेक्ष्यत्वेन 'ध्रुवः' भवति ; तदपेक्षयैव पूर्वा पश्चिमेत्यादिः व्यवहारः । स च देशः सर्वेषां वैदिकाना माश्रयः । तत्र ये वशदेशैः † उशीनरदेशैश्च सहिताः कुरुपञ्चालदेशाः सन्ति, तेषां देशानां ये राजानः, ते 'राजा' 'इति' अनेन शब्देन व्यवक्रियन्ते । 'ऊर्ध्वायां दिशि' स्वर्गरूपायाम्, मनुष्यस्य सञ्चाराभावात् तत्र राजानो नोदाहृताः, किन्तु इन्द्रस्यैवाभिषेक उक्तः । तस्यां दिश्यभिषेकेण 'सः' इन्द्रः 'परमेष्ठी' परमपदे अवस्थितः, 'प्राजापत्यः' प्रजापतिसम्बन्धी अभवत् ॥

कृत्स्न मिन्द्राभिषेकं निगमयति— "स एतेन महाभिषेकेणाभिषिक्त इन्द्रः सर्वा जितीरजयत् सर्वाँल्लोकानविन्दत् सर्वेषां देवानां श्रैष्ठ्य मतिष्ठां परमता मगच्छत्साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्यं जित्वास्मिँल्लोके स्वयम्भूः स्वराळमृतो ऽमुष्मिन्त्स्वर्गे लोके सर्वान् कामानाप्त्वा ऽमृतः समभवत्–समभवत्"–इति । पूर्वोक्ताभिषेकेण अभिषिक्तः

---

* 'अहो सह शरीरेण प्राप्तोऽस्मि परमां गतिम् । उत्तरान् वा कुरून् पुण्यानथ वाप्यमरावतीम्"–इति महा० भा० १३ प० २८४१ । 'नैवेशिकं सर्वगुणोपपन्नं ददाति वै यस्तु नरो द्विजाय । स्वाध्यायचारित्रगुणान्विताय तस्यापि लोकाः कुरुषूत्तरेषु'—इति च तत्रैव २९५८ ।

† वश इत्यस्यैवाचरविपर्ययेणोकारत्रययोगेन च महाभारतादौ प्रसिद्धः किं शिवि-रिति ? । तथा ह्यादिपर्वणि 'शिविरौशीनरः'–इति २६६९ ।

इन्द्रः 'जितीः' जेतव्याः सर्वा युद्धभूमीः अजयत् । तेन जयेन सर्वान् लोकान् 'अविन्दत्' अलभत ; देवानां मध्ये 'श्रैष्ठ्यम्' अतिशयेन प्रशस्तत्वम् , 'अतिष्ठां' सर्वानतिक्रम्यावस्थानं 'परमताम्' उत्कृष्टत्व मगच्छत् । जातितः उत्तमत्वं श्रैष्ठ्यम् , गुणैरुत्तमत्वं परमत्वम् । साम्राज्यादीनि पदानि अस्मिंल्लोके 'जित्वा' प्राप्य 'स्वयम्भूः' प्रजापतिरूपः , 'स्वराट्' स्वतन्त्रराजः , 'अमृतः' इतरमनुष्यवदल्पकाले मरणरहितः सन् 'अमुष्मिन्' परोक्षे स्वर्गे लोके सर्वान् 'कामान्' भोगान् प्राप्य 'अमृतः' मरणरहितो मुक्तः समभवत् ॥ अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ३ (१४) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां तृतीयाध्याये
(अष्टत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (१४) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः तृतीयोऽध्यायः ॥

———

॥ अथ चतुर्थाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ स य इच्छेदेवंवित्क्षत्रिय मयं सर्वा जितीर्जयेतायं सर्वाँल्लोकान् * विन्देतायं सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छेत साम्राज्यं भौज्यं स्वाराज्य वैराज्यं पारमेष्ठ्य राज्यं माहाराज्य माधिपत्य मयं समन्तपर्यायी स्यात्सार्वभौमः सार्वायुष † आन्तादा परार्द्धात् पृथिव्यै समुद्रपर्यन्ताया एकराळिति त मेतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वा ‡ ऽभिषिञ्चेद् याञ्च राज्ञी मजायेथां याञ्च प्रेतासि तदुभय मन्तरेणेष्टापूर्त्तं ते लोकं सुकृत मायुः प्रजां वृञ्जीयं यदि मे द्रुह्येरिति स य इच्छेदेवंवित्क्षत्रियो ऽहं सर्वा जितीर्जयेय महं सर्वाँल्लोकान् विन्देय महं सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छेयं साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्य राज्यं माहाराज्य माधिपत्य महं

---

* "सर्वान् लोकान्" क, 'सर्वालोकान्' ग, "सर्वाँल्लोकान्" ङ ।

† "सर्वायुषः" क, ख । ‡ "शापयित्वा" ङ ।

समन्तपर्यायी स्यां सार्वभौमः सार्वायुष आन्तादा परार्द्धात् पृथिव्यै समुद्रपर्यन्ताया एकराळिति स न विचिकित्सेत्स ब्रूयात्सह श्रद्धया यां च रात्रीं मजाये ऽहं यां च प्रेतास्मि तदुभयमन्तरेणेष्टापूर्त्तं मे लोकं सुकृत मायुः प्रजां वृङ्क्तां यदि ते द्रुह्येय मिति ॥ १ (१५) ॥

॥ श्रीगणेशाय नमः ॥

पुरुषार्थाभिषेकार्थं मादावैन्द्राभिषेचनम् ।
उक्त मत्र पुमर्थोऽय मभिषेक उदीर्यते ॥ १ ॥

त मभिषेकं विधत्ते— "स य इच्छेदेवंवित् क्षत्रिय मयं सर्वो जितीर्जयेतायं सर्वाँल्लोकान् विन्देतायं सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छेत सास्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्य राज्यं माहाराज्य माधिपत्य मयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्तादा परार्द्धात् पृथिव्यै समुद्रपर्यन्ताया एकराळिति त मेतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वा ऽभिषिञ्चेद्"— इति । 'एवंवित्' इन्द्रसम्बन्धिमहाभिषेकविद् 'यः' आचार्यः क्षत्रियं प्रति सर्वजयादिफल मिच्छेत्, 'सः' आचार्यः क्षत्रिय मेतं 'शापयित्वा' शपथं कारयित्वा, 'एतेन' पूर्वोक्तेन इन्द्र-सम्बन्धिना महाभिषेकविधानेन 'तं' क्षत्रिय मभिषिञ्चेत् । कीदृशी फलेच्छा ? इति, साभिधीयते— 'अयं' क्षत्रियो जेतव्याः सर्वा युद्धभूमीर्जयेत् ; तथा 'सर्वान् लोकान्' देशविशेषान् लभेत ; 'सर्वेषां' राज्ञां मध्ये श्रैष्ठ्याद्याधिपत्यान्तगुणयुक्तो भवेत् ; 'समन्त-पर्यायी' देशतः कालतः सर्वव्यापी स्यात् ; 'आ अन्तात्' समुद्र-

तीरपर्यन्तं सार्वभौमत्वं देशव्याप्तिः, 'आ परार्द्धात्' परार्द्धशब्दाभिधेयकालसङ्ख्यापर्यन्तं सर्वायुषत्वं कालव्याप्तिः ; एवंविधो भूत्वा समुद्रपर्यन्तायाः पृथिव्याः एक एव राजा अस्तु ; 'इति' अनयेच्छया आचार्यो महाभिषेकेण त मभिषिञ्चेत् ॥

शापयित्वेति यदुक्तं, त मेव शपथप्रकारं दर्शयति— "याञ्च रात्रीं मजायेथा, याञ्च प्रेतासि, तदुभय मन्तरेणेष्टापूर्त्तं ते लोकं सुकृत मायुः प्रजां हञ्जीयं यदि मे द्रुह्येरिति"–इति । अभिषिच्यमान ! हे क्षत्रिय ! यद्याचार्याय मे 'द्रुह्येः' द्रोहं कुर्याः, तदानीं त्वं 'यां रात्रि मजायेथाः' यस्यां रात्रावुत्पन्नोऽसि, 'याञ्च रात्रिं प्रेतासि' यस्यां रात्रौ मरिष्यसि, 'तदुभय मन्तरेण' उत्पत्तिमरणदिनयोर्द्वयोर्मध्ये 'ते' तव 'इष्टापूर्त्तं' श्रौतस्मार्त्तकर्मद्वयं, तथा सुखलोकं, तद्धेतुभूत मन्यदपि सुकृतं, दीर्घं मायुः, 'प्रजां' पुत्रादिकां 'हञ्जीय" त्वत्तो वर्जयेयम् ; 'इति' एतद् आचार्यस्य वाक्यम् । तदेतदङ्गीकारयित्वा पश्चादभिषिञ्चेत् आचार्यः ॥

क्षत्रियार्थं यादृशीं फलपरम्परां कामयित्वा शपथं कारयति, क्षत्रियोऽपि तादृशीं फलपरम्परां कामयमानः शपथं कुर्यात् । तदेतत् क्षत्रियवाक्यं दर्शयति— "स य इच्छेदेवंवित् क्षत्रियोऽहं सर्वां जितीर्जयेय महं सर्वाँल्लोकान् विन्देय महं सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छेयं साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्य महं समन्तपर्यायी स्यां सार्वभौमः सार्वायुष आन्तादा परार्द्धात् पृथिव्यै समुद्रपर्यन्ताया एकराळिति, स न विचिकित्सेत्, स ब्रूयात् सह श्रद्धया, याञ्च रात्रीं मजाये ऽहं याञ्च प्रेतास्मि, तदुभय मन्तरेणेष्टापूर्त्तं मे लोकं सुकृत मायुः प्रजां हञ्जीथा यदि ते द्रुह्येय मिति"–इति । 'यः' क्षत्रियः

'एवंवित्' महाभिषेकमाहात्म्याभिज्ञः, सर्वजयादिकं समुद्रपर्यन्तं, पृथिव्या मेकराजत्वपर्यन्तं फलजात मिच्छेत् (पूर्वत्राचार्यवाक्यत्वात् जयेत विन्देतेत्यादिः प्रथमपुरुषप्रयोगः , अत्र तु क्षत्रियवाक्यत्वात् जयेय मित्यादिः उत्तमपुरुषप्रयोगः), 'सः' क्षत्रियः फलकामी 'न विचिकित्सेत्' आचार्योक्ते ऽर्थे संशयं न कुर्यात् । 'सः' क्षत्रिय आचार्यस्याभीष्टं शपथ मेवं कुर्यात् ,— हे आचार्य ! अहं यदि ते द्रुह्येयम् , तदानीं त्वं मम जन्ममरणमध्यवर्त्तीष्टापूर्त्तादिकं सर्वं 'द्रुह्नीथाः' नाशयेः , इति श्रद्धया सहितं शपथं ब्रूयात् ॥ १ (१५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) प्रथमः खण्डः ॥ १ (१५) ॥

॥ अथ द्वितीयः खण्डः ॥

अथ ततो ब्रूयाच्चतुष्टयानि वानस्पत्यानि सम्भरत नैय्यग्रोधान्यौदम्बराण्याश्वत्थानि प्लाक्षाणीति क्षत्रं वा एतद् वनस्पतीनां यन्न्यग्रोधो यन्नैय्यग्रोधानि सम्भरन्ति क्षत्र मेवास्मिंस्तद्दधाति भौज्यं वा एतद् वनस्पतीनां यदुदुम्बरो यदौदुम्बराणि सम्भरन्ति भौज्य मेवास्मिंस्तद्दधाति साम्राज्यं वा एतद्

वनस्पतीनां यदश्वत्थो यदाश्वत्थानि सम्भरन्ति साम्राज्य मेवास्मिंस्तद्दधाति स्वाराज्यञ्च ह वा एतद् वैराज्यञ्च वनस्पतीनां यत् प्लक्षो यत्प्लाक्षाणि सम्भरन्ति स्वाराज्यवैराज्ये एवास्मिंस्तद्दधात्यथ ततो ब्रूयाच्चतुष्टयान्यौषधानि सम्भरत तोक्मकृतानि व्रीहीणां महाव्रीहीणां प्रियङ्गूनां यवाना मिति क्षत्रं वा एतदोषधीनां यद् व्रीहयो यद् व्रीहीणां तोक्म सम्भरन्ति क्षत्र मेवास्मिंस्तद्दधाति साम्राज्यं वा एतदोषधीनां यन् महाव्रीहयो यन्महाव्रीहीणां तोक्म सम्भरन्ति साम्राज्य मेवास्मिंस्तद्दधाति भौज्यं वा एतदोषधीनां यत् प्रियङ्गवो यत् प्रियङ्गूनां तोक्म सम्भरन्ति भौज्य मेवास्मिंस्तद्दधाति सैनान्यं वा एतदोषधीनां यद्यवा यद्यवानां तोक्म सम्भरन्ति सैनान्य मेवास्मिंस्तद्दधाति ॥ २ (१६) ॥

सम्भारान् विधत्ते— "अथ ततो ब्रूयाच्चतुष्टयानि वानस्पत्यानि सम्भरत,— नैय्यग्रोधान्यौदुम्बराण्याश्वत्थानि प्लाक्षाणीति" —इति । 'अथ' क्षत्रियशपथानन्तरम्, यत आचार्येणाभिषेकः कर्त्तव्यः, 'ततः' कारणादाचार्यः परिचारकान् ब्रूयात्,— वनस्पतिसम्बन्धीनि न्यग्रोधादीनि (फलानि चतुर्विधानि *) हे परिचारकाः ! सम्पादयतेति ॥

* वन्यनीचिह्नान्तःकृतंपदद्वयं घ-च-पुस्तकयोर्नास्ति ।

तत्र ह्यत्रचतुष्टयं क्रमेण प्रशंसति— "क्षत्रं वा एतद् वनस्पतीनां यन्न्यग्रोधो ; यन्नैय्यग्रोधानि सम्भरन्ति, क्षत्र मेवास्मिंस्तद्दधाति ; भौज्यं वा एतद् वनस्पतीनां यदुदुम्बरो ; यदौदुम्बराणि सम्भरन्ति, भौज्य मेवास्मिंस्तद्दधाति ; साम्राज्यं वा एतद् वनस्पतीनां यदश्वत्थो ; यदाश्वत्थानि सम्भरन्ति, साम्राज्य मेवास्मिंस्तद्दधाति ; स्वाराज्यञ्च ह वा एतद् वैराज्यञ्च वनस्पतीनां यत् प्लक्षो ; यत् प्लाक्षाणि सम्भरन्ति , स्वाराज्यवैराज्ये एवास्मिंस्तद्दधाति"—इति । न्यग्रोधस्य वनस्पतीनां मध्ये राजवद् व्याप्त्राधिक्यात् क्षत्रत्वम् ; उदुम्बरादीनां भौज्यादिसाधनत्वात् तद्रूपत्वम् । अतश्चतुर्विधफलसम्पादनेन यजमाने क्षत्रभौज्यादीनि फलानि सम्पादयति ॥

सम्भारान्तराणि विधत्ते— "अथ ततो ब्रूयाच्चतुष्टयान्यौषधानि सम्भरत तोकमक्षतानि,— व्रीहीणां , महाव्रीहीणां , प्रियङ्गूनां , यवाना मिति"—इति । 'अथ' नैयग्रोधादिफलसम्पादनानन्तरम् , यतो व्रीह्याद्यङ्कुरसम्पादन मपेक्षितम् , 'ततः' आचार्य एवं ब्रूयात्,— हे परिचारकाः ! 'तोकमक्षतानि' अङ्कुरनिमित्तान्यौषधिद्रव्याणि चतुर्विधानि सम्पादयत । सूक्ष्मबीजरूपा व्रीहयः , प्रौढबीजरूपा महाव्रीहयः , प्रियङ्गवो यवाश्च प्रसिद्धाः ॥

चतुर्विध मौषधिद्रव्यं प्रशंसति— "क्षत्रं वा एतदोषधीनां यद् व्रीहयो ; यद् व्रीहीणां तोकम सम्भरन्ति , क्षत्र मेवास्मिंस्तद्दधाति ; साम्राज्यं वा एतदोषधीनां यन्महाव्रीहयो ; यन्महाव्रीहीणां तोकम सम्भरन्ति , साम्राज्य मेवास्मिंस्तद्दधाति ; भौज्यं वा एतदोषधीनां यत् प्रियङ्गवो ; यत् प्रियङ्गूनां तोकम सम्भरन्ति ; भौज्य मेवास्मिंस्तद्दधाति ; सैनान्यं वा एतदोषधीनां यद्यवा ;

यद्यवानां तोक्म सम्भरन्ति, सैनान्य मेवास्मिंस्तद्दधाति"–इति । ओषधीनां मध्ये व्रीहीणां बलहेतुत्वात् क्षत्रत्वम्, महाव्रीह्यादीना मपि अनुष्ठानद्वारा साम्राज्यहेतुत्वात् तद्रूपत्वम् ; अतो व्रीह्यादि-तोक्मानां मङ्कुराणां सम्पादनेन यजमाने क्षत्रसाम्राज्यादिकं सर्वं सम्पादयति ॥ २ (१६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (१६) ॥

॥ अथ तृतीयः खण्डः ॥

अथास्मा औदुम्बरी मासन्दीं सम्भरन्ति तस्या उक्तं ब्राह्मणं औदुम्बरश्चमसो वा पात्री वौदुम्बरशाखा तानेतान्त्सम्भारान्त्सम्भृत्यौदुम्बर्यां पात्र्यां वा चमसे वा समावपेयुस्तेषु समोप्तेषु दधि मधु सर्पिरा-तपवर्ष्या आपो ऽभ्यानीय प्रतिष्ठाप्यैता मासन्दी मभिमन्त्रयेत बृहच्च ते रथन्तरञ्च पूर्वौ पादौ भवतां वैरूपञ्च वैराजं चापरौ शाक्कररैवते शीर्षण्ये नौध-सञ्च कालेयं चानूच्ये ऋचः प्राचीनातानाः सामानि तिरश्चीनवाया यजूंष्यतीकाशा यश आस्तरणं श्रीरूप-

बर्हणं सविता च ते बृहस्पतिश्च पूर्वौ पादौ धारयतां वायुश्च पूषा चापरौ मित्रावरुणौ शीर्षण्ये अश्विनावनूच्ये इत्यथैन मेता मासन्दी मारोहयेद् वसवस्त्वा गायत्रेण छन्दसा * त्रिवृता स्तोमेन रथन्तरेण साम्ना ऽऽरोहन्तु तानन्वारोह साम्राज्याय रुद्रास्त्वा त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना ऽऽरोहन्तु तानन्वारोह भौज्यायादित्यास्त्वा जागतेन छन्दसा सप्तदशेन स्तोमेन वैरूपेण साम्ना ऽऽरोहन्तु तानन्वारोह स्वाराज्याय विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन वैराजेन साम्ना ऽऽरोहन्तु तानन्वारोह वैराज्याय मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्ना ऽऽरोहन्तु तानन्वारोह पारमेष्ठ्याय साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन छन्दसा त्रिणवेन स्तोमेन शाक्करेण साम्ना ऽऽरोहन्तु तानन्वारोह राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहेत्येता मासन्दी मारोहयेत् त मेतस्या मासन्द्या मासीनं राजकर्त्तारो ब्रूयुर्न वा अनभ्युत्क्रुष्टः क्षत्रियो वीर्यं कर्त्तुमर्हत्यभ्येन मुत्क्रोशामेति तथेति तं राजकर्त्तारो ऽभ्युत्क्रोशन्तीमं जना अभ्युत्क्रोशत समृजं

* "छन्दसा"-इति ङ। एव मिहोत्तरत्रापि।

साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं परमेष्ठिनं पारमेष्ठ्यं राजानं राजपितरं च्च मजनि क्षत्रियो ऽजनि विश्वस्य भूतस्याधिपतिरजनि विशा मत्ता ऽजन्यमित्राणां हन्ता ऽजनि ब्राह्मणानां गोप्ता ऽजनि धर्मस्य गोप्ता ऽजनीति त मभ्युत्कृष्ट मेवंविदभिषेच्यन्नेतयर्चाभिमन्त्रयेत ॥ ३ ❋ (१७) ॥

आसन्द्यादिसम्भारान् विधत्ते—"अथास्मा औदुम्बरी मासन्दीं सम्भरन्ति ; तस्या उक्तं ब्राह्मण मौदुम्बरश्चमसो वा पात्री वोदुम्बरशाखा ; तानेतान्त्सम्भारान्त्सम्भृत्यौदुम्बर्यां पात्र्यां वा चमसे वा समावपेयुस्तेषु समोप्तेषु दधि मधु सर्पिरातपवर्षा आपो ऽभ्यानीय प्रतिष्ठाप्यैता मासन्दी मभिमन्त्रयेत"—इति । 'अथ' वानस्पत्यौषधिसम्भारानन्तरम् , 'अस्मै' क्षत्रियायौदुम्बरी मासन्दीं सम्भादयेयुः । 'तस्याः' चासन्द्या विधायकं 'ब्राह्मणं' "प्रादेशमात्राः पादाः"—इत्यादिना पूर्व मेवोक्तम् † । चतुष्कोणो दण्डयुक्तः पात्रविशेषश्चमसः ‡ । आकारनियमरहिता

❋ प्राय एष एव खण्डः किञ्चिद्पाठव्यत्ययेन पूर्व मपि श्रुतः (२२३पृ०) ।

† १८२पृ० ९पं०, १८४पृ० १०पं० ।

‡ 'चमसो देवपानः'—इति ऋ० सं० १०. १६. ८ । 'औदुम्बरेण चमसेन चतुःस्रक्तिना'—इति शत० ब्रा० ७. २. ११. २ । न्यग्रोध-रोहितक-पर्णान्यतमकाष्ठनिर्मितश्च स भवति । 'दश चमसान्त्सहस्रानधः'—इति का० श्रौ० ९. २. २२ । 'त्सरुमतः'—इति च मानवसूत्रम् । तथाच ते सृष्टियुक्ताः ; किञ्च होतुः , ब्रह्मणः , उद्गातुः , सुन्वतः , प्रशास्तुः , ब्राह्मणाच्छंसिनः , पोतुः , नेष्टुः , आग्नीध्रस्य , अच्छावाकस्येति दश । कात्या० श्रौ० (९. ९. २५ ; १२. ३.) भाष्यं द्रष्टव्यम् ।

'पात्री' * । तयोः पात्रीचमसयोरन्यतर मौदुम्बरं सम्मादयेत् । यद्वा, पात्री मृन्मयी, शाखा चौदुम्बरी सम्मादनीया । ततः पात्रीचमसयोरन्यतरस्मिन् वानस्पत्यौषधिसम्भारान् समावपेयुः । समीप्तेषु तेषु सम्भारेषु दध्यादीनां सेचनं कृत्वा चमसं भूमौ प्रतिष्ठाप्य एता मासन्दीं वक्ष्यमाणमन्त्रेणाभिमन्त्रयेत् ॥

तं मन्त्रं दर्शयति— "बृहच्च ते रथन्तरञ्च पूर्वौ पादौ भवतां, वैरूपञ्च वैराजं चापरौ, शाक्वररैवते श्रोणिभ्ये, नौधसञ्च कालेयं चानूच्ये, ऋचः प्राचीनातानाः, सामानि तिरश्चीनवाया, यजूंष्यन्तीकाशा, यज्ञ आस्तरणं, श्रीरुपबर्हणं, सविता च ते बृहस्पतिश्च पूर्वौ पादौ धारयतां, वायुश्च पूषा चापरौ, मित्रावरुणौ श्रोणिभ्ये, अश्विनावनूच्ये इति"–इति । इन्द्रासन्दीप्रतिपादकवाक्यवदयं मन्त्रो व्याख्येयः † ॥

अभिमन्त्रणादूर्ध्वं माचार्यकर्त्तव्यं दर्शयति— "अथैन मेता मासन्दी मारोहयेद्"–इति । 'अथ' अभिषिक्तम् 'एनं' क्षत्रियं एतस्या मासन्द्यारूढं कुर्यात् ॥

तत्र मन्त्रं दर्शयति— "वसवस्त्वा गायत्रेण छन्दसा, त्रिवृता स्तोमेन, रथन्तरेण साम्नाऽऽरोहन्तु, तानन्वारोह साम्राज्याय; रुद्रास्त्वा त्रैष्टुभेन छन्दसा, पञ्चदशेन स्तोमेन, बृहता साम्नाऽऽरोहन्तु, तानन्वारोह भौज्याय; आदित्यास्त्वा जागतेन छन्दसा,

---

* पात्री त्रिविधा भवति । तत्र 'इडापात्री' अरत्निमात्री मध्यसङ्गृहीता; 'पुरोडाशपात्री' प्रादेशमात्री समचतुरस्रा अर्थात् षडङ्गुलपरिमितपरिमण्डलखातवती; 'पिष्टपात्री' हविर्धारणी अतिविपुला; सेवाकारनियमरहिता इति विवेकः । कात्या० श्रौ० १. ३. ३६ सू० या० ह० द्र० ।

† २२५पृ० २१पं० आरभ्य द्रष्टव्यम् ।

सप्तदशेन स्तोमेन, वैरूपेण साम्ना ऽऽरोहन्तु ; तानन्वारोह स्वाराज्याय ; विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन, वैराजेन साम्ना ऽऽरोहन्तु ; तानन्वारोह वैराज्याय ; मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा , त्रयस्त्रिंशेन स्तोमेन , रैवतेन साम्ना ऽऽरोहन्तु ; तानन्वारोह पारमेष्ठ्याय ; साध्याश्च त्वाप्ताश्च देवाः पाङ्क्तेन छन्दसा , त्रिणवेन स्तोमेन , शाक्करेण साम्ना ऽऽरोहन्तु ; तानन्वारोह राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहेत्येता मासन्दी मारोहयेत्"–इति । इन्द्रारोहणमन्त्रवत् व्याख्येयम् * । तत्र आरोहणकर्त्तुः अप्रयोज्यत्वात् 'आरोहामि'–इत्युत्तमपुरुषः, अत्र त्वाचार्यप्रयोज्यत्वात् 'आरोह' –इति मध्यमपुरुषः । तत्त्वयोः पञ्चमषष्ठमन्त्रयोः अत्र क्रमविपर्यासो ऽध्ययनसम्प्रदायप्राप्तः (२२४पृ०) । अनेन मन्त्रेण आचार्यः आसन्द्यां क्षत्रिय मारोहयेत् ॥

आरोहणादूर्ध्वमभ्युत्क्रोशनं विधत्ते— "त मेतस्या मासन्द्या मासीनं राजकर्त्तारो ब्रूयुर्न वा अनभ्युत्क्रुष्टः क्षत्रियो वीर्यं कर्त्तुमर्हत्यभ्येन मुत्क्रोशामेति ; तथेति ; तं राजकर्त्तारो ऽभ्युत्क्रोशन्तीमं जना अभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं परमेष्ठिनं पारमेष्ठ्यं राजानं राजपितरं ; क्षत्र मजनि, क्षत्रियो ऽजनि, विशस्य भूतस्याधिपतिरजनि, विशा मत्ता ऽजन्यमित्राणां हन्ता ऽजनि, ब्राह्मणानां गोप्ता ऽजनि, धर्मस्य गोप्ता ऽजनीति"–इति । राज्ञः कर्त्तारो 'राजकर्त्तारः' पितृभ्रात्रादयः । इन्द्रविषयाभ्युत्क्रोशनवाक्यवदिदं वाक्यं व्याख्येयम् † ॥

---

* २२६पृ० २०पं० आरभ्य द्रष्टव्यम् । † २२७पृ० १५पं० आरभ्य द्रष्टव्यम् ।

आचार्यस्य क्षत्रियाभिमन्त्रणं विधत्ते — "त मभ्युत्क्रुष्ट मेवं-विदभिषेक्ष्यन्नेतयर्चाभिमन्त्रयेत"–इति । पूर्ववद् (२२८ पृ०) व्याख्येयम् ॥ ३ (१७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये (एकोनत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (१७) ॥

॥ अथ चतुर्थः खण्डः ॥

निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठाय सुक्रतुरिति त मेतस्या मासन्द्या मासीन मेवंवित् पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभिषिञ्चतीमा आपः शिवतमा इत्येतेन तृचेन देवस्य त्वेति च यजुषा भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः * ॥ ४ (१८) ॥

---

* पुरस्तादध्यात्मात एष खण्डः । अस्मिं च तत्र त्रयीः पाठभेदः (२२९पृ०) ।

एतयर्चेत्युक्तं (२४५पृ० ६पं०) मन्त्रं दर्शयति— "निषसाद धृतव्रतो वरुणः पस्त्यास्वा , साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्या-यातिष्ठाय सुक्रतुरिति"–इति । पूर्ववद् (२२९पृ०) व्याख्येयम् ॥

अभिमन्त्रणादूर्ध्वमभिषेकप्रकारं दर्शयति— "त मेतस्या मासन्द्या मासीन मेवंवित् पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदु-म्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्त-र्धायाभिषिञ्चतीमा आपः शिवतमा इत्येतेन ऋचेन , देवस्य त्वेति च यजुषा, भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः"–इति । इन्द्राभि-षेकवाक्यवद् (२३०पृ०) व्याख्येयम् ॥ ४ (१८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) चतुर्थः खण्डः ॥ ४ (१८) ॥

॥ अथ पञ्चमः खण्डः ॥

प्राच्यां त्वा दिशि वसवो देवाः षड्भिश्चैव पञ्च-विंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनेतेन च यजुषै-ताभिश्च व्याहृतिभिः साम्राज्याय दक्षिणस्यां त्वा दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभि-षिञ्चन्त्वेतेन च ऋचैनेतेन च यजुषैताभिश्च व्याहृ-

तिभिर्भौज्याय प्रतीच्यां त्वा दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनेतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्यायोदीच्यां त्वा दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनेतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्यायोर्ध्वायां त्वा दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनेतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्यायाध्रुवायां त्वा ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाप्त्याश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनेतेन च यजुषैताभिश्च व्याहृतिभी राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति स परमेष्ठी प्राजापत्यो भवति स एतेनैन्द्रेण महाभिषेकेणाभिषिक्तः क्षत्रियः सर्वां जितीर्जयति सर्वाँल्लोकान् * विन्दति सर्वेषां राज्ञां श्रैष्ठ्यं मतिष्ठां परमतां गच्छति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्यं जित्वा ऽस्मिँल्लोके † स्वयम्भूः स्वराळमृतो ऽमुष्मिन्स्वर्गे लोके सर्वान् कामानाप्त्वा ऽमृतः सम्भ-

---

* "सर्वाल्लोकान्" घ, "सर्वान् लोकान्" क, ङ। "सर्वाल्लोकान्" ख।

† "ऽस्मिंलोके" घ, "ऽस्मिंल्लोके" क, ङ।

वति य मेतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वा ऽभिषिञ्चति ॥ ५ (१९) ॥

अभिषेकादूर्ध्वं मभिमन्त्रण माह—"प्राच्यां त्वा दिशि वसवो देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय ; दक्षिणस्यां त्वा दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनैतेन च यजुषैताभिश्च व्याहृतिभिर्भौज्याय ; प्रतीच्यां त्वा दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्याय ; उदीच्यां त्वा दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्याय ; ऊर्ध्वायां त्वा दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्याय ; अस्यां त्वा ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाप्तयश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च ऋचैनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति ; स परमेष्ठी प्राजापत्यो भवति"—इति । उक्तेन मन्त्रेणाभिमन्त्रितः क्षत्रियः परमेष्ठिपदस्य योग्यो भूत्वा प्रजापतेः सम्बन्धीति ॥

महाभिषेक मुपसंहरति— "स एतेनैन्द्रेण महाभिषेकेणाभिषिक्तः क्षत्रियः सर्वां जितीर्जयति , सर्वाँल्लोकान् विन्दति , सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छति ; साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्यं जित्वा ऽस्मिँल्लोके

स्वयम्भूः स्वराळमृतो ऽमुष्मिन्त्स्वर्गे लोके सर्वान् कामानाप्ता ऽमृतः सम्भवति, य मेतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वा ऽभिषिञ्चति"-इति । 'यं' क्षत्रियं आचार्यः स्वद्रोहराहित्याय शपथं कारयित्वा इन्द्रसम्बन्धिना महाभिषेकेण अभिषिञ्चति, सोऽभिषिक्तः क्षत्रियः इन्द्रवत् सर्वं जयादि फलं प्राप्नोति ॥ ५ (१९) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) पञ्चमः खण्डः ॥ ५ (१९) ॥

॥ अथ षष्ठः खण्डः ॥

इन्द्रियं वा एतदस्मिँल्लोके * यद्दधि यद्घृता ऽभिषिञ्चतीन्द्रिय मेवास्मिंस्तद्दधाति रसो वा एष ओषधिवनस्पतिषु यन् मधु यन् मध्वाभिषिञ्चति रस मेवास्मिंस्तद्दधाति तेजो वा एतत्पशूनां यद् घृतं यद् घृतेनाभिषिञ्चति तेज एवास्मिंस्तद्दधात्यमृतं वा एतदस्मिँल्लोके † यदापो यदङ्गिरभिषिञ्चत्यमृतत्व मेवास्मिंस्तद्दधाति सो ऽभिषिक्तो ऽभिषेक्ते ब्राह्मणाय हिरण्यं दद्यात् सहस्रं दद्यात् क्षेत्रं चतुष्पाद्

---

*, † "०स्मिन् लोके" क, "०स्मिंल्लोके" ख, ङ, "०स्मिंलोके" घ ।

दद्यादधाप्याहुरसङ्ग्रात मेवापरिमितं दद्यादपरिमितो वै क्षत्रियो ऽपरिमितस्यावरुद्ध्या इत्यथास्मै सुराकंसं हस्त आदधाति स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इन्द्राय पातवे सुत इति तां पिबेद् यदत्र शिष्टं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः इदं तदस्य मनसा शिवेन सोमं राजान मिह भक्षयामि अभि त्वा वृषभा सुते सुतं सृजामि पीतये तृम्पा व्यश्नुही मद मिति यो ह वाव सोमपीथः सुरायां प्रविष्टः सहैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य भक्षितो भवति न सुरा तां पीत्वा ऽभिमन्त्रयेतापाम सोम मशन्नो भवेति तद्यथैवादः प्रियः पुत्रः पितरं प्रिया वा जाया पतिं सुखं शिव मुपस्पृशत्यावित्तस एवं हैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वान्यद्वान्नाद्यं सुखं शिव मुपस्पृशत्यावित्तसः ॥ ६ (२०) ॥

अभिषेकसाधनानि दध्यादिद्रव्याणि प्रशंसति— "इन्द्रियं वा एतदस्मिँल्लोके यद्दधि, यद्भ्रा ऽभिषिञ्चतीन्द्रिय मेवास्मिंस्तद्दधाति; रसो वा एष ओषधिवनस्पतिषु यन् मधु, यन् मध्वाभिषिञ्चति रस मेवास्मिंस्तद्दधाति; तेजो वा एतत् पशूनां यद् घृतं, यद् घृतेनाभिषिञ्चति तेज एवास्मिंस्तद्दधाति; अमृतं वा एतदस्मिन् लोके यदापो, यदद्भिरभिषिञ्चत्यमृतत्व मेवास्मिंस्तद्-

धाति"–इति। दध्न इन्द्रियपाटवहेतुत्वाद् इन्द्रियत्वम्। मधुनः पुष्पजन्यत्वेन ओषधिवनस्पतिरसत्वम्। घृतस्य स्निग्धभास्वरत्वेन पशुतेजस्त्वम्। अपां चाप्यायनहेतुत्वादमृतत्वम्। एतैर्द्रव्यैरभिषिक्ते सति यजमान इन्द्रियादिकं सम्पादयति॥

आचार्याय दक्षिणादानं विधत्ते—"सो ऽभिषिक्तो ऽभिषेक्ते ब्राह्मणाय हिरण्यं दद्यात्, सहस्रं दद्यात्, क्षेत्रं चतुष्याद्यादु; अथाप्याहुरसङ्ख्यात मेवापरिमितं दद्यादपरिमितो वै क्षत्रियो ऽपरिमितस्यावरुद्ध्या इति"–इति। हिरण्यस्यैव सङ्ख्या सहस्र मिति, सहस्रनिष्कपरिमित मित्यर्थः*। चतुष्याच्छब्देन गवादिक मभिधीयते। पूर्वोक्तसहस्रपक्ष मपेक्ष्याधिकाभिप्रायेण असङ्ख्यात मिति पक्षान्तर मुक्तम्; तस्यैव व्याख्यान मपरिमित मिति। इयदेवेति सङ्ख्यानियमो नास्ति किन्तु स्वशक्त्यनुसारेण प्रभूत मेव दद्यात्। क्षत्रियो हि देशाधिपतित्वेन 'अपरिमितः' बहुधनयुक्तः, अतः 'अपरिमितस्य' प्रभूतस्य फलस्य सिद्ध्यर्थ मित्यभिप्रायेण पक्षान्तरम्॥

दक्षिणायां दत्तायां माचार्यकर्त्तव्यं दर्शयति—"अथास्मै सुराकंसं हस्त आदधाति, स्वादिष्ठया मदिष्ठया पवस्व सोमधारया इन्द्राय पातवे सुत इति"–इति। 'अथ' दक्षिणास्वीकारादनन्तरम्, 'अस्मै' अस्य क्षत्रियस्य हस्ते सुरया पूर्णं कांस्यपात्रं

---

* "सर्षपाः षट् यवो मध्यस्, त्रियवं त्वेककृष्णलम्।
पञ्चकृष्णलको माषस्, ते सुवर्णस्तु षोडश।
* * * *। चतुस्सौवर्णिको निष्कः"–इत्यादि म० सं० ८, १३३–३८। "अभिषेचनीये तु द्वाविंशतं–द्वाविंशतं सहस्राणि पृथङ् मुख्येभ्यः, षोडश-षोडश द्वितीयेभ्यः, अष्टावष्टौ तृतीयेभ्यः, चत्वारि-चत्वारि पादिभ्यः"–इति आश्व० श्रौ० ९, ३, ३–५।

दद्यादथाप्याहुरसङ्ख्यात मेवापरिमितं दद्यादपरिमितो वै क्षत्रियो ऽपरिमितस्यावरुद्ध्या इत्यथास्मै सुराकंसं हस्त आदधाति स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इन्द्राय पातवे सुत इति तां पिबेद् यदत्र शिष्टं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः इदं तदस्य मनसा शिवेन सोमं राजान मिह भक्षयामि अभि त्वा वृषभा सुते सुतं सृजामि पीतये तृम्पा व्यश्नुही मद मिति यो ह वाव सोमपीथः सुरायां प्रविष्टः सहैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य भक्षितो भवति न सुरा तां पीत्वा ऽभिमन्त्रयेतापाम सोम मशन्नो भवेति तद्यथैवादः प्रियः पुत्रः पितरं प्रिया वा जाया पतिं सुखं शिव मुपस्पृशत्यावित्तस एवं हैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वान्यद्वान्नाद्यं सुखं शिव मुपस्पृशत्यावित्तसः ॥ ६ (२०) ॥

अभिषेकसाधनानि दध्यादिद्रव्याणि प्रशंसति— "इन्द्रियं वा एतदस्मिँल्लोके यद्दधि, यद्भ्रा ऽभिषिञ्चतीन्द्रिय मेवास्मिंस्तद्दधाति ; रसो वा एष ओषधिवनस्पतिषु यन् मधु, यन् मध्वाभिषिञ्चति रस मेवास्मिंस्तद्दधाति ; तेजो वा एतत् पशूनां यद् घृतं, यद् घृतेनाभिषिञ्चति तेज एवास्मिंस्तद्दधाति ; अमृतं वा एतदस्मिन् लोके यदापो, यदद्भिरभिषिञ्चत्यमृतत्व मेवास्मिंस्तद्-

स्वादिष्ठयेति मन्त्रेण स्थापयेत् । स च मन्त्रः क्रत्वङ्गाभिषेके व्याख्यातः (२०२पृ० ५पं०) ॥

क्षत्रियकर्त्तव्यं दर्शयति— "तां पिबेद्, यदत्र शिष्टं रसिनः सुतस्य, यदिन्द्रो अपिबच्छचीभिः, इदं तदस्य मनसा शिवेन, सोमं राजान मिह भक्षयामि; अभि त्वा वृषभा सुते, सुतं सृजामि पीतये, तृम्पा व्यश्नुही मद मिति"–इति । 'तां' कांस्यपात्रस्थां सुरां क्षत्रियो यदत्रेतिमन्त्रद्वयेन पिबेत् । 'अत्र' कांस्यपात्रे 'रसिनः' रसयुक्तस्य 'सुतस्य' अभिषुतस्य व्रीह्याद्यङ्कुरजस्य पेयद्रव्यस्य यत् 'शिष्ट" योऽवशिष्टो भागः, 'यत्' च द्रव्यं 'शचीभिः' कर्मविशेषैः संस्कृत मिन्द्रो ऽपिबत् । शचीशब्दः कर्मनाम * । 'इह' अस्मिन्नभिषेककर्मणि 'सोमं राजानं' सोमसदृशं 'अस्य' पेयद्रव्यस्य, 'तदिदं' स्वरूपं 'शिवेन' शान्तेन भक्तियुक्तेन मनसा भक्षयामि । सोऽय मेको मन्त्रः । (वा० सं० १९. ३५.) हे 'वृषभ' श्रेष्ठ ! इन्द्र ! त्वा मभिलक्ष्य 'सुते' अस्मिन् द्रव्ये अभिषुते सति 'पीतये' तव पानार्थं 'सुतम्' अभिषुतं द्रव्यं 'सृजामि' त्वदस्ते ददामि । 'तृम्प' तेन द्रव्येण तृप्तो भव । 'मद" हर्षं 'व्यश्नुहि' विशेषेण प्राप्नुहि । अयं द्वितीयो मन्त्रः (सं० ८. ४५. २२.) ॥

तदिदं पानं प्रशंसति— "यो ह वाव सोमपीथः सुरायां प्रविष्टः, सहैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य भक्षितो भवति; न सुरा"–इति । 'यो ह वाव' यः खलु 'सोमपीथः' सोमस्य पानविशेषः 'सुरायां' सुराद्रव्ये प्रविष्टोऽस्ति, 'एतेन' सोमपानविशेषेण सहैव पूर्वोक्तेन्द्राभिषेकविधानेन अभिषिक्तस्य

* निघ० २. २. २२ । निरु० ३. १. १; १२. ३. ८।

क्षत्रियस्य द्रव्यविशेषो भक्षितो भवति ; न तु सुरा भक्षिता भवति * । सोऽयं मन्त्रद्वयस्य महिमा † ॥

पानादूर्ध्वमभिमन्त्रणं विधत्ते— "तां पीत्वा ऽभिमन्त्रयेतापाम सोमं, अमृता अभूमेति"–इति । "अपाम सोमम्"–इत्यृगेका (सं० ८. ४८. ३. ‡), "अमृता अभूव"–इति द्वितीया (सं० ८. ४८. ४. §) ; ताभ्यामभिमन्त्रयेत ॥

इदानीं दृष्टान्तेन पानं प्रशंसति— "तद्यथैवादः प्रियः पुत्रः पितरं, प्रिया वा जाया पतिं, सुखं शिव मुपस्पृशत्यावित्रसः, एवं हैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वान्यद्वान्नाद्यं सुखं शिव मुपस्पृशत्यावित्रसः"–इति । 'तत्' तत्र पाने, आदौ लौकिकं निदर्शन मुच्यते,— यथैव प्रियः पुत्रः शिवं सुखं यथा भवति तथा पितर मुपस्पृशति, प्रिया वा जाया च पतिं यथा स्पृशति । 'शिवं' शान्तम् ; शास्त्रनिषिद्धमार्गेण यत् सुखं, तत् नरकहेतुत्वादुग्रम् ; विहितमार्गेण तु तदभावाच्छान्तम् । सुखस्पर्शस्यावधिर्नेत्यावित्रस इत्यनेनोच्यते । 'आ अवित्रसः' आ अविस्रंसनाद्, देहपातपर्यन्त मित्यर्थः । यथा

---

* "न वा एतदयो न हिरण्यं, यत् सोमः ; न स्त्री न पुमान्, यत् क्लीवः ; न सोमो न सुरा, यत् सौत्रामणीसमृद्ध्यै"–इति तै० ब्रा० १. ८. ५. ३ । "सुरा सुनोतेः"–इति निरु० १. ४. १ ।

† "आम्नायवचनादहिंसा प्रतीयेत"–इति, "आम्नायवचनादेतत् भवति"–इति च निरु० १. ५. १ ; ७. ७. १ ।

‡ "अपाम सोम ममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नून मस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य"–इति तत्पाठः ।

§ "अं नो भव हृद आ पीत इन्दो पितेव सोम सूनो सुशेवः ।
सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः"–इति तत्पाठः ।

स्वर्गहेतुः, 'एवं हैव' अनेनैव प्रकारेण पूर्वोक्तैन्द्रमहाभिषेकविधिना अभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वा अन्यान्यद्रव्याणि वा देहपातपर्यन्तं शान्तसुखस्वर्गप्रदानि ॥ ६ (२०) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) षष्ठः खण्डः ॥ ६ (२०) ॥

॥ अथ सप्तमः खण्डः ॥

एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः कावषेयो जनमेजयं पारिक्षित मभिषिषेच तस्मादु जनमेजयः पारिक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन * च मेध्येनेजे तदेषाभियज्ञगाथा गीयते आसन्दीवति धान्यादं रुक्मिणं हरितस्रजम् अश्वं बबन्ध सारङ्गं देवेभ्यो जनमेजय इत्येतेन ह वा ऐन्द्रेण महाभिषेकेण च्यवनो भार्गवः शार्यातं मानव मभिषिषेच तस्मादु शार्यातो मानवः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे देवानां हापि सचे गृहपतिरासैतेन ह वा ऐन्द्रेण

* "परियायाश्वेन" घ । एव मिह सर्वत्र, उत्तरखण्डे ऽपि ।

महाभिषेकेण सोमशुष्मा वाजरत्नायनः शतानीकं सात्राजित मभिषिषेच तस्माद् शतानीकः सात्राजितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदावाम्बाष्ठ्य मभिषिषिचतुस्तस्माद्ाम्बाष्ठ्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदौ युधांश्रौष्टि मौग्रसैन्य मभिषिषिचतुस्तस्माद् युधांश्रौष्टिरौग्रसैन्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण कश्यपो विश्वकर्माणं भौवन मभिषिषेच तस्माद् विश्वकर्मा भौवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे भूमिर्ह जगावित्युदाहरन्ति न मा मर्त्यः कश्चन दातु मर्हति विश्वकर्मन् भौवन मां दिदासिथ निमङ्क्ष्ये ऽहं सलिलस्य मध्ये मोघस्त एष कश्यपायास सङ्गर इत्येतेन ह वा ऐन्द्रेण महाभिषेकेण वसिष्ठः सुदासं पैजवन मभिषिषेच तस्माद् सुदाः पैजवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण संवर्त्त आङ्गिरसो मरुत्त

माविक्षित मभिषिषेच तस्माद्दु मरुत्त आविक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे तदप्येषः* श्लोको ऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे आविक्षितस्य कामप्रेर्विश्वे देवाः सभासद इति ॥ ७ (२१) ॥

उक्तं महाभिषेकं चिरन्तनशिष्टाचारोदाहरणेन प्रशंसति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः कावषेयो जनमेजयं पारिक्षित मभिषिषेच ; तस्माद्दु जनमेजयः पारिक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"—इति । कवषस्य पुत्रः, तुरनामको महर्षिः , परिक्षितपुत्रं जनमेजयम् , उक्तविधानेन अभिषिषेच ; तस्मादेव कारणात् जनमेजयः 'सर्वतः' सर्वासु दिक्षु पृथिवीं 'समन्तम्' अन्तेन समुद्रतीरेण संयुक्तं यथा भवति तथा 'जयन्' विजयं प्राप्नुवन् 'परीयाय' परितश्चचार । अभिषेकमाहात्म्येनैव दिग्विजयं कृतवानित्यर्थः । अभिषेकप्रसादादेव 'मेध्येन' यागयोग्येन अश्वेन च 'ईजे' इष्टवान् , अश्वमेधं कृतवानित्यर्थः ॥

अस्मिन्नर्थे काञ्चिद् गाथा मुदाहरति— "तदेषाभियज्ञगाथा गीयते"—इति । 'तत्' तस्मिन् जनमेजयवृत्तान्ते 'एषा' वक्ष्यमाणा 'गाथा' यज्ञविषया गीतिः वैदिकैः अभितो गीयते ॥

तां गाथां दर्शयति— "आसन्दीवति धान्यादं रुक्मिणं हरितस्रजम् , अश्वं बबन्ध सारङ्गं देवेभ्यो जनमेजय इति"—इति । आसन्दीवानिति देशविशेषस्य नामधेयम् । तस्मिन् देशे जनमे-

* क-ख-पुस्तकयोरिह निर्विसर्गपाठः ।

जयो 'देवेभ्यो' देवार्थं यागयोग्य मश्वं बबन्ध। कीदृश मश्वम् ? 'धान्यादं' धान्य मेवात्ति, 'रुक्मिणं' रुक्मशब्देन ललाटगतं श्वेत-लाञ्छन मुपलक्ष्यते, तदुक्तम्, हरितवर्णा स्रक् यस्यासौ 'हरित-स्रक्' पुष्पमाला इव वर्णो देहं व्याप्य वर्त्तत इत्यर्थः, सारं कर्मसु श्रेष्ठं यागं गच्छतीति 'सारङ्गः'। 'इति' अनया गाथया जनमे-जयस्य अभिषेकमहिमोदाहृतः ॥

जनमेजयवत् शार्यातनामकं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण च्यवनो भार्गवः शार्यातं मानव मभि-षिषेच; तस्मादु शार्यातो मानवः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे; देवानां हापि सत्रे गृहपतिरास"-इति। भृगोः पुत्रः, च्यवननामको महर्षिः, मनुवंशोत्पन्नं शार्यातनामकं राजानम् अभिषिषेच। तस्मात् फलं पूर्ववत्। किञ्च देवानां सम्बन्धिनि सत्रेऽपि शार्यातो गृहपतिरभूत् ॥

शतानीकनामानं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण सोमशुष्मा वाजरत्नायनः शतानीकं सात्राजित मभिषिषेच; तस्मादु शतानीकः सात्राजितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"-इति। सोमशुष्म-नामकः कश्चिन् महर्षिः, स च वाजरत्नस्य पौत्रः। तथाविधो मुनिः, सत्राजितः पुत्रं शतानीकनामकं क्षत्रियम् अभिषिषेच। शेषं पूर्ववत् ॥

आम्बाष्ठनामानं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदावाम्बाष्ठ मभिभिषिषिचतुस्त-स्मादाम्बाष्ठः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"-इति ॥

युधांश्रौष्टिनामक मुग्रसेनस्य पुत्रं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदौ युधांश्रौष्टि मौग्रसैन्य मभिषिषिचतुस्तस्मादु युधांश्रौष्टिरौग्रसैन्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति ॥

भुवनाख्यस्य पुत्रं विश्वकर्मनामकं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण कश्यपो विश्वकर्माणं भौवन मभिषिषेच ; तस्मादु विश्वकर्मा भौवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति ॥

भौवनाभिषेकमाहात्म्यं प्रशंसितुं पुरातनमहर्षिप्रोक्त मुदाहरणं दर्शयति— "भूमिर्ह जगावित्युदाहरन्ति"–इति । 'भूमिः' देवता 'जगौ' भौवनं प्रति किञ्चिद् वाक्यं गाथारूप मुक्तवती, 'इति' एवं पूर्वे महर्षयः उदाहरन्ति ॥

तां गाथां दर्शयति— "न मा मर्त्यः कश्चन दातु मर्हति विश्वकर्मन् भौवन मां दिदासिथ, निमङ्क्ष्ये ऽहं सलिलस्य मध्ये मोघस्त एष कश्यपायास सङ्गर इति"–इति । भुवनाख्यस्य पुत्र ! हे विश्वकर्मन् ! कश्चिदपि मनुष्यः 'मां' भूमिं दातुं नार्हति । अत एव मीमांसका विचार्य सर्वस्वदाने महाभूमिदानं निवारितवन्तः* । एवं सति, त्वं 'मां' भूमिं 'दिदासिथ' कश्यपाय त्वदीयाचार्याय दातु मिच्छसि, अहं तु 'सलिलस्य' समुद्रस्य मध्ये 'निमङ्क्ष्ये' निमज्जनं करिष्ये ; तथा सति, 'ते कश्यपाय' त्वदीयाचार्यस्य कश्यपस्य 'एष सङ्गरः' भूमिप्रतिग्रहविषयः 'मोघः आस' व्यर्थ एव बभूव । 'इति' ईदृशम पि महाभूमिमज्जनं महाभिषेकमहिम्ना निवारित मिति तात्पर्यार्थः ॥

---

* मी० द० ६. ७. ३ सू० २ अधि० द्रष्टव्यम् ।

सुदा इत्येतन्नामकं पिजवनस्य पुत्रं राजान मुदाहरति—"एतेन ह वा ऐन्द्रेण महाभिषेकेण वसिष्ठः सुदासं पैजवन मभिषिषेच ; तस्मादु सुदाः पैजवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति ॥

अविक्षिन्नामकस्य पुत्रं मरुत्तनामानं राजान मुदाहरति—"एतेन ह वा ऐन्द्रेण महाभिषेकेण संवर्त्त आङ्गिरसो मरुत्त मावित्त मभिषिषेच ; तस्मादु मरुत्त आवित्तः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति । संवर्त्तनामको महर्षिः , अङ्गिरसः पुत्रः ॥

तेन कृतं मरुत्ताभिषेकं प्रशंसितुं श्लोक मुदाहरति— "तदप्येषः श्लोको ऽभिगीतः"–इति । 'तत्' तस्मिन् अपि मरुत्ताभिषेकमाहात्म्ये 'एषः' वक्ष्यमाणः 'श्लोकः' पादबद्धो मन्त्रः 'अभिगीतः' अभितः सर्वैः पठितः ॥

तं श्लोकं दर्शयति – "मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे, आवित्तस्य कामप्रेर्विश्वे देवाः सभासद इति"–इति । मरुत्तनाम्नो राज्ञो गृहे मरुत्संज्ञका देवाः भोजनकाले परिवेषणस्य कर्त्तारो भूत्वा अवसन् ; तथैव 'आवित्तस्य' अवित्त्–पुत्रस्य 'कामप्रेः' सर्वकामपूरितस्य मरुतस्य गृहे 'विश्वे' सर्वे देवाः 'सभासदः' सभाया मुपविष्टाः, सेवन्त इति शेषः । 'इति' एष सर्वो ऽपि महाभिषेकस्य महिमेत्यभिप्रायः ॥ ७ (२१) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) सप्तमः खण्डः ॥ ७ (२१) ॥

———

॥ अथ अष्टमः खण्डः ॥

एतेन ह वा ऐन्द्रेण महाभिषेकेणोदमय आत्रेयो ऽङ्ग मभिषिषेच तस्मादङ्गः * समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे स होवाचालोपाङ्गो दश नागसहस्राणि दश दासीसहस्राणि ददामि ते ब्राह्मणोप मा ऽस्मिन् यज्ञे ह्वयस्वेति

तदप्येते श्लोका अभिगीताः

याभिर्गीभिरुदमय प्रैयमेधा † अयाजयन्
द्वे द्वे सहस्रे बद्धाना ‡ मात्रेयो मध्यतो ददात्
अष्टाशीतिसहस्राणि § श्वेतान् वैरोचनो हयान्
प्रष्टीन् ¶ निस्रृत्य प्रायच्छद् यजमाने पुरोहिते
देशादेशात्समीळ्हानां सर्वासा माढादुहितॄणाम्
दशाददात्सहस्राण्यात्रेयो निष्ककण्ठ्राः
दश नागसहस्राणि दत्त्वात्रेयो ऽवचलुके
श्रान्तः पारिकुटान् प्रैषद् दानेनाङ्गस्य ब्राह्मणः
शतं तुभ्यं शतं तुभ्य मिति स्मैव प्रताम्यति
सहस्रं तुभ्य मित्युक्त्वा प्राणान्त्स्म प्रतिपद्यत

इति ॥ ८ (२२) ॥

---

* "तस्मादङ्गः" क ।
† "प्रयमेधा" ख, घ, ङ ।
‡ "बद्धाना" च ।
§ "अष्टाशीतिः सहस्राणि" ख, घ, ङ, च, ठ ।
¶ "प्रष्ठीन्" क ।

अङ्गनामकं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेणोदमय आत्रेयो ऽङ्ग मभिषिषेच ; तस्माद्दङ्गः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति । उदमय-नामकः कश्चित् महर्षिः अत्रेः पुत्रः, अङ्ग मभिषिषेच ॥

तस्याङ्गाभिषेकस्य माहात्म्यं दर्शयितुं कञ्चिद् वृत्तान्त माह— "स होवाचालोपाङ्गो,— दश नागसहस्राणि दश दासी-सहस्राणि ददामि ते , ब्राह्मणोप मा ऽस्मिन् यज्ञे ह्वयस्वेति"–इति । यो ऽय मङ्गनामको राजा उक्तः , 'सः' अयम् 'अलोपाङ्गः' महदस्याङ्गसौष्ठवः , सम्पूर्णावयव इत्यर्थः । स कदाचित् स्वकीया-भिषेककर्त्तरि उदमयनामके पुरोहिते स्वार्थं यागं कुर्वाणे सति, तं प्रत्येव मुवाच । हे ब्राह्मण ! 'अस्मिन्' त्वदीये यज्ञे माम् 'उपह्वयस्व' समाह्वानं कुरु ; अह मागत्य त्वदीययज्ञे दक्षिणा-सम्पूर्त्त्यर्थं तुभ्यं गजसहस्राणि दासीसहस्राणि च ददामीति * । सेयं बहुदानसम्पत्तिः , सद्युद्दिश्य महाभिषेकप्रसादलब्धा ॥

एव मेवार्थं प्रपञ्चयितुं श्लोकानुदाहरति— "तदप्येते श्लोका अभिगीताः"–इति । 'तत्' तस्मिन्नप्यङ्गराजपुरोहितस्य यागे दानप्रतिपादकाः 'एते' पञ्च श्लोकाः 'अभिगीताः' सर्वतो ऽभिज्ञैः पठिताः ॥

तत्र प्रथमं श्लोक माह — "याभिर्गोभिरुदमय' प्रैयमेधा अयाजयन् , द्वे द्वे सहस्रे बद्हाना मात्रेयो मध्यतो ऽददात्"–इति । प्रियमेधस्य पुत्राः 'प्रैयमेधाः' महर्षयः , उदमयनामकं अङ्गराजपुरोहित' 'याभिर्गोभिः' दक्षिणारूपाभिः 'अयाजयन्', ता गावो वक्ष्यन्त इति शेषः । 'बद्हम्'–इति शतकोटिसङ्ख्याया

* मूले तु "दश नागसहस्राणि, दश दासीसहस्राणि"–इति विद्यते ।

नामधेयम् * । 'बद्हानां' शतकोटिसङ्ख्याकानां गवां मध्ये, प्रतिदिनं हे हे सहस्रे 'मध्यतः' मध्यन्दिनसवने अत्रिपुत्र उदमयो दत्तवान् ॥

द्वितीयं श्लोक माह— "अष्टाशीतिसहस्राणि श्वेतान् वैरोचनो हयान्, प्रष्टीन् निर्मृत्य प्रायच्छद् यजमाने पुरोहिते"—इति । 'वैरोचनः' विरोचनस्य पुत्रः अङ्गनामको राजा, स्वकीयपुरोहिते उदमयनामके 'यजमाने' यागं कुर्वाणे, स्वय मागत्य अष्टाशीतिसहस्रसङ्ख्यानश्वान् श्वेतवर्णान् 'प्रष्टीन्' पृष्ठवाहनयोग्यवयस्कान् 'निर्मृत्य' स्वकीयाश्वबन्धनस्थानान्निस्सार्य 'प्रायच्छत्' दत्तवान् ॥

तृतीयं श्लोक माह— "देशाद्देशात्समोळ्हानां सर्वासा माढ्यदुहितृणाम्, दशाददात्सहस्राण्याचेयो निष्ककण्ठ्यः"—इति ।

---

* दश, [शतं], सहस्रम्, अयुतम्, प्रयुतम्, निर्युतम्, अर्बुदम्, न्यर्बुदम्, निखर्वम्, बद्हम्, अक्षितम् । एताश्च सङ्ख्याः क्रमाद् दशगुणोत्तरा वैदिक्यः । ता० ब्रा० १७. १४. २ द्रष्टव्यम् । तथाच प्रयुत मिति लक्षस्यैव नामान्तरम्, अर्बुद मिति च कोटेर्नामान्तरम्; एवं शतकोटेर्नाम स्यान्निखर्व मिति, तथा बद्ह मिति तु स्यात् सहस्रकोटेरेव नामधेय मिति विचार्यम् । कस्यचिन्मते त्विह बद्हशब्दः स्यात् बद्हन्निति नान्तस्यार्थे । तथा च 'बद्हानां' स्थिराणां दानार्थरक्षितानां गवा मिति, देवयजनमार्गस्थानां गवा मिति वार्थः सम्भाव्येत । नान्तबद्हव्याख्यानं ता० ब्रा० १. १. ६ सा० भा० द्रष्टव्यम् । " चतुरशीत्यधिकैस्त्रयोदशसहस्रैरेकं बद्हं (बद्हं) भवति । तथाहि— 'हिरण्येन ०—० सप्त च (३६७पृ० ७, ८पं०)'—इति श्रुत्युक्तानि सप्ताधिकशतं बद्हानि श्रीशुकेनोत्तरश्लोके चतुर्दशलक्षत्वेन सङ्गृहीतानि,— 'अदात् कर्मणि मण्डारे नियुतानि चतुर्दश'—इति (२८ श्लो०) । एवं चतुर्दशलक्षाणां सप्ताधिकशतभागो बद्ह मित्युक्तं भवति । इयञ्च बद्हसङ्ख्या श्लोकेन सङ्गृह्यते— 'चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः । बद्हं चतुरशीत्यग्रसहस्राणि त्रयोदश'—इति"—इति भाग० पु० ९.२०.२६ श्लोकस्य १०. ७०. ९ श्लोकस्य च व्याख्याने स्वामी श्रीधरः ।

'देशादेशात्' दिग्विजयकाले तत्तद्देशविशेषात् 'समोळ्हानां' सम्यक् 'आ' समन्तात् 'ऊढानाम्' आनीतानाम् 'आढ्यदुहितॄणां' धनिकपुत्रीणां सर्वासां 'दश सहस्राणि' 'आत्रेयः' 'अङ्गराजपुरोहितो दत्तवान्। ताश्च दुहितरो 'निष्ककण्ठाः' आभरणोपेतकण्ठयुक्ताः ॥

चतुर्थं श्लोक माह— "दश नागसहस्राणि दत्त्वात्रेयो ऽवचत्नुके, श्रान्तः पारिकुटान् प्रैषद् दानेनाङ्गस्य ब्राह्मणः"—इति। अङ्गराजस्य पुरोहितो ब्राह्मणः आत्रेयः, अवचत्नुकनामदेशे गजसहस्राणि दशसङ्ख्याकानि दत्त्वा, दानेन श्रान्तः सन् 'पारिकुटान्' परिचारकान् 'प्रैषत्' प्रेषितवान्, हे परिचारकाः! यूयं दत्तेत्येव मुक्तवानित्यर्थः ॥

पञ्चमं श्लोक माह— "शतं तुभ्यं शतं तुभ्य मिति स्मैव प्रताम्यति, सहस्रं तुभ्य मित्युक्त्वा प्राणान्त्स्म प्रतिपद्यत इति"—इति। परिचारकाणा मध्यगे एकैकशो वक्तु मशक्तः, तुभ्यं शतं तुभ्यं शत मिति शतसङ्ख्या प्रोक्ता; तत्रापि 'प्रताम्यति स्मैव' ग्लानि मेव प्राप्तवान्। ततः शतसङ्ख्यां परित्यज्य सहस्रं तुभ्य मित्युक्त्वा, तस्या मपि सङ्ख्यायां बहुशः प्रोक्तायां श्रान्तः सन्, 'प्राणान् प्रतिपद्यते स्म' मध्ये मध्ये श्रमपरिहाराय दीर्घश्वासं कृतवान् इत्यर्थः। अङ्गराजस्य पुरोहितयागे तादृशसामर्थ्यं महाभिषेकप्रसादलब्ध मिति तात्पर्यार्थः ॥ ८ (२२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) अष्टमः खण्डः ॥ ८ (२२) ॥

———

॥ अथ नवमः खण्डः ॥

एतेन ह वा ऐन्द्रेण महाभिषेकेण दीर्घतमा मामतेयो भरतं दौष्षन्ति * मभिषिषेच तस्मादु भरतो दौष्षन्तिः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वैरु च मेध्यैरीजे

तदप्येते श्लोका अभिगीताः

हिरण्येन परीवृतान् कृष्णाञ्छुक्लदतो † मृगान्
मष्णारे भरतो ऽददाच्छतं बद्वानि सप्त च
भरतस्यैष दौष्षन्तेरग्निः साचीगुणे ‡ चितः
यस्मिन्त्सहस्रं ब्राह्मणा बद्वशो गा विभेजिरे
अष्टासप्ततिं भरतो दौष्षन्तिर्यमुना मनु
गङ्गायां वृत्रघ्ने ऽबध्नात् पञ्चपञ्चाशतं हयान्
त्रयस्त्रिंशच्छतं राजा ऽश्वान् बध्वाय मेध्यान्
दौष्षन्तिरत्यगाद्राज्ञो मायां मायवत्तरः §
महाकर्म भरतस्य न पूर्वे नापरे जनाः
दिवं मर्त्य इव हस्ताभ्यां नोदापुः पञ्चमानवा

इत्येतं ह वा ऐन्द्रं महाभिषेकं बृहदुक्थ ऋषिर्दुर्मुखाय पाञ्चालाय प्रोवाच तस्मादु दुर्मुखः

* "दौष्यन्ति" क, "दौःषन्ति" ख, घ, ञ, ठ। एव मिहोत्तरत्रापि।

† "कृष्णान् शुक्लदतो" क, "कृष्णांछुक्लदतो" ख, ग।

‡ "साचिगुणे" क।

§ "मायावत्तरः" क।

पाञ्चालो राजा सन् विद्यया समन्तं सर्वतः पृथिवीं जयन् परीयायैतं ह वा ऐन्द्रं महाभिषेकं वासिष्ठः साल्यहव्यो ऽत्यरातये जानन्तपये प्रोवाच तस्मादत्यरातिर्जानन्तपिरराजा सन् विद्यया समन्तं सर्वतः पृथिवीं जयन् परीयाय स होवाच वासिष्ठः साल्यहव्यो ऽजैषीवै समन्तं सर्वतः पृथिवीं महन् मा गमयेति स होवाचात्यरातिर्जानन्तपिर्यदा ब्राह्मणोत्तरकुरून् जयेय मथ त्व मु हैव पृथिव्यै राजा स्याः सेनापतिरेव ते ऽहं स्या मिति स होवाच वासिष्ठः साल्यहव्यो देवक्षेत्रं वै तन्न वैतन्मर्त्यो जेतु मर्हत्यद्रुचो वै म आ ऽत इदं दद इति ततो हात्यरातिं जानन्तपिं मात्तवीर्यं निःशुक्र ममित्रतपनः शुष्मिणः शैव्यो * राजा जघान तस्मादेवं विदुषे ब्राह्मणायैवं चक्रुषे न क्षत्रियो दुह्येन्नेद्राष्ट्रादव पद्येयन्नेदा म प्राणो जहदिति-जहदिति ॥ ९ (२३) ॥

॥इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां चतुर्थोऽध्यायः ॥ ४॥

दुष्षन्तस्य पुत्रं † भरताख्यं राजान मुदाहरति—"एतेन ह वा ऐन्द्रेण महाभिषेकेण दीर्घतमा मामतेयो भरतं दौष्षन्ति मभिषिषेच ; तस्माद् भरतो दौष्षन्तिः समन्तं सर्वतः पृथिवीं

* "शैव्यो" क, ङ, ञ । † "दुःषन्तपुत्रं" ञ ।

जयन्, परीयायाश्वैरु च मेध्यैरीजे"–इति। ममताख्यायाः स्त्रियाः पुत्रो 'दीर्घतमाः' इत्येतन्नामा मुनिर्भरत मभिषिषेच। भरतोऽपि दिग्विजयेन पृथिवीं परीत्य, मेध्यैरश्वैरपीजे। 'उ च' –इति निपातयोः समूहः समुच्चयार्थः॥

भरताभिषेकमाहात्म्यं दर्शयितुं श्लोकान् उदाहरति— "तदप्येते श्लोका अभिगीताः"–इति। 'तत्' तस्मिन् भरताभिषेकमाहात्म्ये अपि 'एते' वक्ष्यमाणाः पञ्च श्लोकाः परिगीयन्ते॥

तत्र प्रथमं श्लोक माह— "हिरण्येन परीवृतान् कृष्णाञ्छुक्लदतो मृगान्; मण्डारे भरतो ऽददाच्छतं बद्धानि सप्त च"–इति। मृगशब्देनात्र गजा विवक्षिताः; मृगवदिति बाहुल्यविवक्षया वा मृगशब्दः। ते च गजाः 'हिरण्येन परीवृताः' सर्वाभरणयुक्ताः, शरीरपुष्ट्या वर्णोत्कर्षे सत्यत्यन्तं कृष्णाः प्रतिभासन्ते, शुक्लाभ्यां दन्ताभ्यां युक्ताः। तादृशान् गजान्, मण्डारनामके देशे, भरतनामको राजा दत्तवान्। शत मित्यादिना तत्सङ्ख्योच्यते। 'बद्धम्'–'वृन्दम्'–इत्येतौ पर्यायौ *। वृन्दशब्दश्च शतकोटिवाचित्वेन गणितग्रन्थकारैर्दर्शितः॥

"एकं दश च शतं च सहस्रञ्चायुतनियुते तथा।
प्रयुतकोट्यर्बुदवृन्दं स्थानं स्थानाद् दशगुणात्"–इति †।

---

* नात्र मानं किञ्चित् पश्यामः।

† "एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः। अर्बुद मब्जः (शङ्खः) खर्वनिखर्वौ महापद्मशङ्कवस्तस्मात्। जलधिश्चान्त्यं मध्यं परार्द्ध मिति दशगुणोत्तराः संज्ञाः सङ्ख्याया व्यवहारार्थं कृताः पूर्वैः"–इति लीला०। "एकं दश शतं चैव सहस्र मयुतं तथा। लक्षं च नियुतं चैव कोटिरर्बुद मेव च। वृन्दः खर्वो निखर्वश्च शङ्खपद्मौ च सागरः। अन्त्यं मध्यं परार्द्धं च दशवृद्ध्या यथोत्तरम्"–इति ब्रह्माण्ड पु०।

तानि च शतकोटिरूपाणि 'बहानि' सप्ताधिकशतसङ्ख्याकानि । तावतो गजान् दत्तवानित्यर्थः * ॥

द्वितीयं श्लोक माह— "भरतस्यैष दौष्पन्तेरग्निः साचीगुणे चितः ; यस्मिन्त्सहस्रं ब्राह्मणा बहवो गा विभेजिरे"—इति । साचीनामगुणके कस्मिंश्चिद् देशे दुष्पन्तपुत्रस्य भरतस्य एषोऽग्निश्चितः, अग्निचयनं कृतवानित्यर्थः । 'यस्मिन्' अग्निचयने सहस्रसङ्ख्याका ब्राह्मणाः 'बहवः' प्रत्येकं शतकोटिसङ्ख्या † 'गाः विभेजिरे' गवां विभागं कृतवन्तः ॥

तृतीयं श्लोक माह— "अष्टासप्ततिं भरतो दौष्पन्तिर्यमुना मनु ; गङ्गायां हृत्नघ्ने ऽबध्नात् पञ्चपञ्चाशतं हयान्"—इति । 'मेध्यैरश्वैरीजे'—इत्युक्तम् (२६९पृ० १,३पं०), तेषा मश्वानां सङ्ख्या अत्रोच्यते । अष्टाधिका सप्ततिः 'अष्टासप्ततिः' ताम्, अश्वाना मष्टासप्ततिं दुष्पन्तपुत्रो भरतः 'यमुना मनु' यमुनायास्तीरे 'अबध्नात्' बद्धवान्, तावतो ऽश्वमेधान् कृतवानित्यर्थः । 'गङ्गायां' गङ्गातीरे हृत्नघ्ननामके देशे च पञ्चाधिकपञ्चाशत्सङ्ख्याकान् हयान् 'अबध्नात्' बद्धवान्, तावतो ऽश्वमेधान् कृतवानित्यर्थः ॥

चतुर्थं श्लोक माह — "त्रयस्त्रिंशच्छतं राजा ऽश्वान् बध्वाय मेध्यान्; दौष्पन्तिरत्यगाद्राज्ञो मायां मायवत्तरः"—इति । यमुनातीरे गङ्गातीरे च अनुष्ठिताः अश्वाः त्रयस्त्रिंशदधिकशतसङ्ख्याकाः । तावतो ऽश्वान् 'मेध्यान्' यज्ञयोग्यान् विध्युक्तक्रमेण बन्धनं कृत्वा, सोऽयं राजा दौष्पन्तिः 'मायवत्तरः' अतिशयेन मायावी सन्, 'राज्ञः' स्वकीयशतोर्मायाम् 'अत्यगात्' अतिक्रान्तवान् ॥

---

* 'बहानि'—इत्यस्य स्थिराणि गजरूपद्रव्याणि देवयजनस्थितानि वेति चार्थः स्यात् ।

† 'बहवः'—इत्यस्य बन्धनक्रमेणेत्यर्थः स्यात् सुकरः, स्थिरभावत इति वा ।

पञ्चमं श्लोक माह— "महाकर्म भरतस्य न पूर्वे नापरे जनाः ; दिवं मर्त्य इव हस्ताभ्यां नोदापुः पञ्चमानवा इति"—इति । 'भरतस्य' राज्ञो यदेतत् 'महाकर्म', तदेतत् 'पूर्वे' पित्रादयो न कर्त्तुं शक्ताः , 'अपरे' जनाः पुत्रपौत्रादयश्च न कर्त्तुं शक्ताः । तत्र दृष्टान्तः । यथा मनुष्यो 'दिवं' स्वर्गं हस्ताभ्यां स्प्रष्टुमशक्तः , एवं 'पञ्चमानवाः' निषादपञ्चमाः चत्वारो वर्णाः * 'नोदापुः' तदीयं कर्म प्राप्तुं शक्ताः । सोऽयं सर्वोऽपि महाभिषेकस्य महिमेत्यर्थः ॥

अथ सम्प्रदायकथनमुखेन महाभिषेकं प्रशंसति— "एतं ह वा ऐन्द्रं महाभिषेकं बृहदुक्थ ऋषिर्दुर्मुखाय पाञ्चालाय प्रोवाच ; तस्माद् दुर्मुखः पाञ्चालो राजा सन् , विद्यया समन्तं सर्वतः पृथिवीं जयन् , परीयाय"—इति । बृहदुक्थनामकः कश्चन ऋषिः , पञ्चालदेशस्वामिने दुर्मुखनाम्ने राज्ञे तमेतम् इन्द्रसम्बन्धिनं महाभिषेकं प्रोवाच । तस्मादेव कारणात् स राजा सन् 'विद्यया' महाभिषेकज्ञानेनैव सर्वासु दिक्षु समन्तं समग्रां पृथिवीं जयन् , 'परीयाय' परितः सञ्चचार ॥

अथ ब्राह्मणस्योक्ताभिषेकाधिकाराभावेऽपि तद्विद्याधिकारसद्भावात् तत्फलसिद्धिं दर्शयति— "एतं ह वा ऐन्द्रं महाभिषेकं वासिष्ठः सात्यहव्योऽत्यरातये जानन्तपये प्रोवाच ; तस्माद्दत्यरातिर्जानन्तपिरराजा सन् , विद्यया समन्तं सर्वतः पृथिवीं जयन् , परीयाय"—इति । वसिष्ठगोत्रोत्पन्नो 'वासिष्ठः', सत्यहव्यस्य पुत्रः 'सात्यहव्यः', तादृशो मुनिः , अत्यरातिनामकाय जनन्तपपुत्राय

---

* "गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके , चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः"—इति निरु० ३. २. २ ।

ब्राह्मणाय, त मेतं महाभिषेकं प्रोवाच । तस्मादेव कारणादय मत्यरातिर्जानन्तपिः स्वय मराजा सन्नप्यभिषेकविद्यया जयं प्राप्तः परितो गतवान् ॥

यथा अभिषेके शपथं कृत्वा गुरुद्रोहो न कर्त्तव्यः , एवं विद्याया मपीति दर्शयति— "स होवाच वासिष्ठः सात्यहव्यो ऽजैषीर्वै समन्तं सर्वतः पृथिवीं महन् मा गमयेति ; स होवाचात्यरातिर्जानन्तपिर्यदा ब्राह्मणोत्तरकुरून् जयेय मथ त्व मु हैव पृथिव्यै राजा स्याः , सेनापतिरेव ते ऽहं स्या मिति ; स होवाच वासिष्ठः सात्यहव्यो देवक्षेत्रं वै तन्न वैतन् मर्त्तो जेतु मर्हत्यद्रुग्धो वै म आ ऽत इदं दद इति ; ततो हात्यरातिं जानन्तपि मात्तवीर्यं निःशुक्र ममित्रतपनः शुष्मिणः शैव्यो राजा जघान"–इति। सात्यहव्यो वासिष्ठो गुरुः , अत्यरातिं शिष्य मेव मुवाच,— हे अत्यराते ! विद्यासामर्थ्यात् पृथिवीं जितवानसि । अतो 'मां' गुरुं 'महद् गमय' महत्वम् ऐश्वर्यं प्रापय । ततः शिष्यो ऽत्यराति रेव मुवाच— मा भूदिदानीं तव महत्त्वम् , हे 'ब्राह्मण' आचार्य ! यदा अहम् 'उत्तरकुरून्' एतन्नामकान् हिमवत्पर्वतस्योत्तरदेशान् जयेयम् , तदानीं त्व मेव पृथिव्याः राजा भव , अहं तु त्वदीयसेनापतिरेव भवामीति । ततः सात्यहव्यो वासिष्ठः 'सः' गुरुरेव मुवाच,— हे अत्यराते ! हिमवत्पर्वतस्योत्तरतो* यदस्ति, तद्देवक्षेत्रम् , अतः तत् क्षेत्रं मनुष्यो जेतुं नैवार्हति ; त्वं तु 'मे' मह्यम् 'अद्रुग्धो वै' द्रोहं कृतवानेव ; मदपेक्षितं महत्त्वं दातु मनिच्छुः सन् वचनार्थं यत् किञ्चिद् उक्तवानसि ; अतः शपथोल्लङ्घिनो गुरुद्रोहिणः तव 'इदं' सामर्थ्यम् 'आ ददे' अपहरामीति । 'ततः'

* "मेरोरुत्तरतो" ठ ।

सामर्थ्यापहरणात् अत्यरातिं जानन्तपिम् 'आत्तवीर्यं' गुरुणापहृतवीर्यम् 'निःशुक्रम्' अपहृततेजस्कं, कश्चित् शत्रुतापनः शिविपुत्रः शुष्मिणाख्यो * राजा 'जघान' हतवान् ॥

एतदुपाख्यानकथनफलं दर्शयति—"तस्मादेवं विदुषे ब्राह्मणायैवं चक्रुषे न क्षत्रियो द्रुह्येन्नेद्राष्ट्रादव पद्येयं नेहा मा प्राणो जहदिति—जहदिति"—इति। यस्माद् गुरुद्रोहे महती हानिरुक्ता, 'तस्मात्' 'एवं विदुषे' महाभिषेकाभिज्ञाय, 'एवं चक्रुषे' अभिषेककर्त्रे, 'ब्राह्मणाय' आचार्याय क्षत्रियो न द्रुह्येत्। केनाभिप्रायेणेति, सोऽभिधीयते— 'राष्ट्राद्' अस्माद् देशात् 'न इत् अव पद्येयम्' नैवापगो भूयासम्। अथवा मां प्राणो 'न इत् जहत्' नैव परित्यजत्वित्यभिप्रायः। अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ९ (२३) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) नवमः खण्डः ॥ ९ (२३) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'—नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः चतुर्थोऽध्यायः ॥

———

* "शुष्माख्यो" ञ ।

॥ अथ पञ्चमाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ अथातः पुरोधाया एव न ह वा अपुरोहितस्य राज्ञो देवा अन्न मदन्ति तस्माद्राजा यक्ष्यमाणो * ब्राह्मणं पुरो दधीत देवा मे ऽन्न मदन्नित्यग्नीन्वा एषः स्वर्ग्यान् राजोद्धरते यत् पुरोहितं तस्य पुरोहित एवाहवनीयो भवति जाया गार्हपत्यः पुत्रोऽन्वाहार्यपचनः स यत् पुरोहिताय करोत्याहवनीय एव तज्जुहोत्यथ यज्जायायै करोति गार्हपत्य एव तज्जुहोत्यथ यत् पुत्राय करोत्यन्वाहार्यपचन एव तज्जुहोति त एनं शान्ततनवो ऽभिहुता अभिप्रीताः स्वर्गं लोक† मभिवहन्ति क्षत्रं च बलं च राष्ट्रं च विशं च त एवैन मशान्ततनवो ऽनभिहुता अनभिप्रीताः स्वर्गाल्लोकान्नुदन्ते‡ क्षत्राच्च बलाच्च राष्ट्राच्च विशश्चाग्निर्वा एष वैश्वानरः पञ्चमेनिर्यत् पुरोहि-

---

* "ऽयक्ष्यमाणो" क । भाष्ये च पक्षान्तरत्वेन स्वीकृतः ।

† "स्वर्गंल्लोक" ङ ।

‡ "स्वर्गालोकां नुदन्ते" ख, "स्वर्गाल्लोकां" नुदन्ते" घ, "स्वर्गाल्लोकान्नुदन्ते" ङ । इहोत्तरत्र चैव मेव पाठाः ।

तस्तस्य वाच्येवैका मेनिर्भवति पादयोरेका त्वच्येका हृदय एकोपस्थ एका ताभिर्ज्वलन्तीभिर्दीप्यमानाभिरुपोदेति राजानं स यदाह क्व भगवो ऽवात्सीस्तृणान्यस्मा आहरतेति तेनास्य तां शमयति या ऽस्य वाचि मेनिर्भवत्यथ यदस्मा उदक मानयन्ति पाद्यं तेनास्य तां शमयति यास्य पादयोर्मेनिर्भवत्यथ यदेन मलङ्कुर्वन्ति तेनास्य तां शमयति यास्य त्वचि मेनिर्भवत्यथ यदेनं तर्पयन्ति तेनास्य तां शमयति यास्य हृदये मेनिर्भवत्यथ यदस्यानाऋजो वेश्मसु वसति तेनास्य तां शमयति यास्योपस्थे मेनिर्भवति स एनं शान्ततनुरभिहुतो ऽभिप्रीतः स्वर्गं लोक * मभिवहति क्षत्रं च बलं च राष्ट्रं च विशं च स एवैन मशान्ततनुरनभिहुतो ऽनभिप्रीतः स्वर्गाल्लोकान्नुदते क्षत्राच्च बलाच्च राष्ट्राच्च विशश्च ॥ १ (२४) ॥

॥ श्रीगणेशाय नमः ॥

महाभिषेक ऐन्द्रो यः क्षत्रस्यासौ पुरोहितः ।
पौरोहित्यं ब्राह्मणस्य वक्तव्य मधुनोच्यते ॥ १ ॥

तदेतत् प्रतिजानीते— "अथातः पुरोधाया एव"–इति । 'अथ' क्षत्रियस्य महाभिषेककथनानन्तरम् , यतो ब्राह्मणस्य

* "स्वर्गंल्लोक" ङ ।

पौरोहित्यं बुभुत्सितं भवति, 'अतः' कारणात् 'पुरोधाया एव' पौरोहित्यस्यैव विधिः, उच्यत इति शेषः ॥

तद्विधिं दर्शयति—"न ह वा अपुरोहितस्य राज्ञो देवा अन्न मदन्ति, तस्माद्राजा यक्ष्यमाणो ब्राह्मणं पुरो दधीत,—देवा मे ऽन्न मदन्निति"–इति। यस्मात् अपुरोहितस्य राज्ञः अन्नं देवाः 'न अदन्ति' न भक्षयन्ति, 'तस्मात्' राजा यक्ष्यमाणो ब्राह्मणं पुरोहितं कुर्यात्। केनाभिप्रायेणेति, सोऽभिधीयते—देवाः मदीय मन्न मदन्विति तस्याभिप्रायः। 'अयक्ष्यमाणः' इति वा पदच्छेदः। यागाभावेऽपि प्रजापालने धर्मबोधनाय पुरोहितः सम्पादनीयः ॥

तदेतत् प्रशंसति—"अग्नीन्वा एषः स्वर्ग्यान् राजोद्धरते, यत् पुरोहितम्"–इति। पुरोहितं सम्पादयतीति यदस्ति, तेन 'एषः' राजा स्वर्गहेतून् अग्नीनेवोद्धरते ॥

तानग्नीन् दर्शयति—"तस्य पुरोहित एवाहवनीयो भवति, जाया गार्हपत्यः, पुत्रो ऽन्वाहार्यपचनः; स यत् पुरोहिताय करोत्याहवनीय एव तज्जुहोत्यथ यज्जायायै करोति गार्हपत्य एव तज्जुहोत्यथ यत् पुत्राय करोत्यन्वाहार्यपचन एव तज्जुहोति; त एनं शान्ततनवो ऽभिहुता अभिप्रीताः स्वर्गं लोक मभिवहन्ति,—क्षत्रं च बलं च राष्ट्रं च विशं च"–इति। 'तस्य' ह राज्ञः पुरोहितादय एव आहवनीयाद्यग्निस्थानीयाः। अन्वाहार्यपचनो दक्षिणाग्निः। 'सः' राजा पुरोहितादिभ्यो 'यत्' अपेक्षितं करोति, तदेतदाहवनीयादिषु होमसमानम्। अतः पुरोहित-द्वारा 'ते' अग्नयः 'शान्ततनवः' स्वकीय मुग्ररूपत्वं परित्यज्य अभीष्टहोमेन प्रीताः 'एनं' क्षत्रियं स्वर्गादिकं प्रापयन्ति। 'क्षत्रं'

मानसोत्साहरूपं शौर्यम्, 'बलं' शारीरम्, 'राष्ट्रं' देशः, 'विट्' प्रजाः; पुरोहितादिप्रीत्या तदेतत् सर्वं प्राप्यते ॥

विपक्षे बाधक माह— "त एवैन मशान्ततनवो ऽनभिहुता अनभिप्रीताः स्वर्गाल्लोकान्नुदन्ते, चत्राच्च बलाच्च राष्ट्राच्च विशश्च" –इति । 'त एव' पुरोहितादयो ऽभीष्टहोमाभावेन प्रीतिरहिताः 'अशान्ततनवः' स्वर्गादेः 'एनं' राजानम् मपनुदन्ते ॥

पुनरपि पुरोहितं प्रकारान्तरेण प्रशंसति— "अग्निर्वा एष वैश्वानरः पञ्चमेनिर्यत् पुरोहितस्तस्य वाचेवैका मेनिर्भवति, पादयोरेका, त्वचेका, हृदय एकोपस्थ एका, ताभिर्ज्वलन्तीभिर्दीप्यमानाभिरुपोदेति राजानं; स यदाह क्व भगवो ऽवात्सीस्तृणान्यस्मा आहरतेति, तेनास्य तां शमयति यास्य वाचि मेनिर्भवत्यथ यदस्मा उदक मानयन्ति पाद्यं, तेनास्य तां शमयति यास्य पादयोर्मेनिर्भवत्यथ यदेन मलङ्कुर्वन्ति, तेनास्य तां शमयति यास्य त्वचि मेनिर्भवत्यथ यदेनं तर्पयन्ति, तेनास्य तां शमयति यास्य हृदये मेनिर्भवत्यथ यदस्यानारुद्धो वेश्मसु वसति, तेनास्य तां शमयति यास्योपस्थे मेनिर्भवति"–इति । परोपद्रवकारिणी क्रोधरूपा शक्तिः 'मेनिः'–इत्युच्यते, यथाग्नेर्ज्वाला, तद्वत् । अतो यः पुरोहितोऽस्ति, सोऽयं पञ्चविधमेन्युपेतो वैश्वानरनामकाग्निसमानः; वागादीनि पञ्च मेनिस्थानानि च । अतः पुरोहितः 'ताभिः' मेनिभिः 'ज्वलन्तीभिः' ज्वालासदृशीभिः, 'दीप्यमानाभिः' परेषु दीप्तिं सन्तापं कुर्वन्तीभिः सह राजानम् 'उपोदेति' समीपे प्राप्नोति । तदा 'सः' राजा हे भगवन्! एतावन्तं कालं कुत्रावात्सीः? एतस्य पुरोहितस्योपवेशनार्थं हे परिचारकाः! 'तृणानि' तृणनिर्मितानि कुशाद्यासनानि आहरत; 'इति'

अनेन राजसम्बन्धिना प्रियवाक्येन, वाचि एका या 'मेनिः' बाधिका शक्तिः, तां स राजा शमयति। पाद्यार्घोदकानयनेन पादगता मेनिः शाम्यति। वस्त्रगन्धाद्यलङ्करणेन त्वग्गता मेनिः शाम्यति। धनादिना सन्तर्पणेन हृदयगता मेनिः शाम्यति। 'अस्य' राज्ञो वेश्मसु 'अनारुद्धः' विरोधरहितः शयनादिकं कुर्वन् विस्रम्भेण वसतीति यदस्ति, तेनोपस्थगता मेनिः शाम्यति। गृहे समागतस्य पुरोहितस्य एतावन्त उपचाराः कर्त्तव्या इत्यर्थः॥

अन्वयव्यतिरेकाभ्यां मुक्तोपचारं प्रशंसति— "स एनं शान्ततनुरभिहुतोऽभिप्रीतः स्वर्गं लोकमभिवहति, क्षत्रं च बलं च राष्ट्रं च विशं च; स एवैनमशान्ततनुरनभिहुतोऽनभिप्रीतः स्वर्गाल्लोकान्नुदते, क्षत्राच्च बलाच्च राष्ट्राच्च विशश्च"–इति। उक्तोपचारहोमेन प्रीतौ सत्यां शान्ततनुः स्वर्गादिकं प्रापयतीत्यन्वयः। उक्तोपचारहोमाभावे स्वर्गादेरपनुदतीति व्यतिरेकः॥ १ (२४)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) प्रथमः खण्डः॥ १ (२४)॥

॥ अथ द्वितीयः खण्डः॥

अग्निर्वा एष वैश्वानरः पञ्चमेनिर्यत् पुरोहितस्तामी राजानं परिगृह्य तिष्ठति समुद्र इव भूमिं-

मयुव मार्यस्य* राष्ट्रं भवति नैनं पुरायुषः प्राणो जहात्याजरसं जीवति सर्वं मायुरेति न पुनर्म्रियते यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः क्षत्रेण क्षत्रं जयति बलेन बल मश्नुते यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितस्तस्मै विशः सञ्जानते सम्मुखा एकमनसो यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः ॥ २ (२५) ॥

उक्तोपचारेण प्रीतं पुरोहितं दृष्टान्तेन प्रशंसति — "अग्निर्वा एष वैश्वानरः, पञ्चमेनिर्यत् पुरोहितस्ताभी राजानं परिगृह्य तिष्ठति, समुद्र इव भूमिम्"–इति । योऽयं पुरोहितोऽस्ति, स एषः 'पञ्चमेनिः' पञ्चविधोग्रशक्तियुक्तो वैश्वानरनामकोऽग्निरेव ; निग्रहानुग्रहयोः अग्निवच्छक्तिमत्त्वात् । स पुरोहितः 'ताभिः' अग्न्तिाभिः शक्तिभिः तं राजानं 'परिगृह्य' परितः स्वीकृत्य तिष्ठति । यथा समुद्रो भूमिं परितः स्वीकृत्य तिष्ठति, तद्वत् ॥

पुरोहितवशादनिष्टपरिहारं दर्शयति— "अयुव मार्यस्य राष्ट्रं भवति, नैनं पुरायुषः प्राणो जहात्याजरसं जीवति, सर्वं मायुरेति, न पुनर्म्रियते, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"–इति । 'यस्य' राज्ञः 'एवं विद्वान्' वेदशास्त्रोक्तप्रकारेण धर्माधर्मौ बोधयितु मभिज्ञो ब्राह्मणो 'राष्ट्रगोपः' राष्ट्रपरिपालनक्षमः पुरोहितो भवति, ईदृशस्यार्यस्य राज्ञो राष्ट्रम् 'अयुतं' कदाचिदपि पृथग्भावरहितं भवति । "यु मिश्रणामिश्रणयोः"

* "मयुवमार्यस्य"–इत्येवं च पाठो भाष्यसम्मतः ।

–इति धातुः (अदा० प०) अमिश्रणेऽपि वर्त्तते , अयुवमितिपदेन स निषिध्यते ; राष्ट्र मस्थिरं न भवतीत्यर्थः । अथ वा 'अस्य' राष्ट्रम् 'अयुवमारि' युवमरणरहितं भवतीत्यर्थः । 'एनं' राजानम् 'आयुषः पुरा' प्राणो न परित्यजति , अपमृत्युः न भवतीत्यर्थः । अत एव 'आ जरसं' जरापर्यन्तं सुखेन जीवति ; 'सर्व मायुरेति' प्राप्ताया मपि जराया मवशिष्टं सर्व मायुः प्राप्नोति । ततः सकृत् मृत्वा 'पुनर्न म्रियते' पुरोहितमुखेन तत्त्वज्ञानं सम्प्राप्य मुच्यते इत्यर्थः ॥

अनिष्टपरिहारं दर्शयित्वा इष्टप्राप्तिं दर्शयति— "क्षत्रेण क्षत्रं जयति, बलेन बल मश्नुते, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"–इति । उक्तविधपुरोहितयुक्तो राजा स्वकीयेन 'क्षत्रेण' कुमारादिना, परकीयं 'क्षत्रं' कुमारादिकं जयति । यथा स्वकीयेन 'बलेन' सैन्येन , परकीयं 'बलं' सैन्यम् 'अश्नुते' व्याप्नोति, अभिभवतीत्यर्थः ॥

इष्टप्राप्त्यनिष्टपरिहारौ दर्शयित्वा प्रजानुरागं दर्शयति— "तस्मै विशः सञ्जानते , सम्मुखा एकमनसो यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"–इति । उक्तविधपुरोहितयुक्ताय 'तस्मै' तस्य राज्ञो 'विशः' प्रजाः 'सञ्जानते' राज्ञा सहैकमत्यं प्राप्नुवन्ति ; प्राप्य च परस्पर मप्येकमनस्का राज्ञः सम्मुखा भवन्ति ; न तु कस्मिन्नपि कार्ये विमुखाः ॥ २ (२५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) द्वितीयः खण्डः ॥ २ (२५) ॥

———

॥ अथ तृतीयः खण्डः ॥

तदप्येतदृषिणोक्तं स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येणेति सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानेव तच्छुष्मेण वीर्येणाधितिष्ठति बृहस्पतिं यः सुभृतं बिभर्त्तीति बृहस्पतिर्ह वै देवानां पुरोहितस्त मन्वन्ये मनुष्यराज्ञां पुरोहिता बृहस्पतिं यः सुभृतं बिभर्त्तीति यदाह पुरोहितं यः सुभृतं बिभर्त्तीत्येव तदाह वल्गूयति वन्दते पूर्वभाज मित्यपचिति मेवास्मा एतदाह स इत् क्षेति सुधित ओकसि स्व इति गृहा वा ओकः स्वेष्वेव तद्गृहेषु सुहितो वसति तस्मा इळा पिन्वते विश्वदानी मित्यन्नं वा इळान्न मेवास्मा एतदूर्जस्वच्छश्वद्भवति तस्मै विशः स्वय मेवा नमन्त इति राष्ट्राणि वै विशो राष्ट्राण्येवैन तत् स्वय मुपनमन्ति यस्मिन् ब्रह्मा राजनि पूर्व एतीति पुरोहित मेवैतदाहाप्रतीतो जयति स धनानीति राष्ट्राणि वै धनानि तान्यप्रतीतो जयति प्रतिजन्यान्युत या सजन्येति सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानप्रतीतो जयत्यवस्यवे यो वरिवः कृणोतीति यदाहावसीयसे यो वसीयः करोतीत्येव तदाह

ब्रह्मणे राजा त मवन्ति देवा इति पुरोहित मेवै-तदभिवदति ॥ ३ (२६) ॥

पुरोहितमहिमानं दृढयितुं * मन्त्र मुदाहरति— "तदप्येत-दृषिणोक्तम्"–इति । 'तदेतत्' पुरोहितमाहात्म्य मपि 'ऋषिणा' मन्त्रदर्शिना तिसृभिः ऋग्भिरुक्तम् (सं० ४. ५०. ७–९.) ॥

तत्र प्रथमाया ऋचः पूर्वार्द्धं दर्शयति— "स इद्राजा प्रति-जन्यानि विश्वा, शुष्मेण तस्थावभि वीर्येणेति"–इति । 'स इत्' स एव पुरोहितयुक्तो राजा 'प्रतिजन्यानि' प्रतिपक्षबलानि 'विश्वा' सर्वाणि 'शुष्मेण' वीर्येण स्वकीयेनाधिकेन बलेन 'अभि-तस्थौ' अभितिष्ठति, अभिभवतीत्यर्थः ॥

अस्यार्द्धस्य तात्पर्यं दर्शयति— "सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानेव तच्छुष्मेण वीर्येणाधितिष्ठति"–इति । 'जन्यानि' –इत्यनेन सपत्ना एव अभिधीयन्ते ; सपत्नशब्दस्य व्याख्या द्विष-न्तो भ्रातृव्या इति । तानेव भ्रातृव्यान् 'तत्' तेन 'शुष्मेण' अधिकेन 'वीर्येण' सामर्थ्येन 'अधितिष्ठति' अभिभवति ॥

तृतीयं पाद मनूद्य व्याचष्टे— "बृहस्पतिं यः सुभृतं बिभ-र्त्तीति ; बृहस्पतिर्ह वै देवानां पुरोहितस्त मन्वन्ये मनुष्यराज्ञां पुरोहिता ; बृहस्पतिं यः सुभृतं बिभर्त्तीति यदाह, पुरोहितं यः सुभृतं बिभर्तीत्येव तदाह"–इति । यो हितोपदेशेन राजान' सुष्ठु बिभर्त्तीति 'सुभृत्' । तादृशं 'बृहस्पतिं' बृहस्पतिसमानं पुरोहितं 'बिभर्त्ति' पोषयति, स इद्राजेति पूर्वत्रान्वयः । "बृह-स्पतिर्ह वै देवानां पुरोहितः" । यो बृहस्पतिः देवानां पुरो-

* "दर्शयितुं" ठ ।

हितः, तं बृहस्पतिम् 'अनु' पश्चात् मनुष्यराज्ञाम् अन्ये पुरोहिता वर्त्तन्ते ; अतः पुरोहितानां बृहस्पत्यनुसारित्वात् बृहस्पति मित्यृदेन पुरोहितविषय मेवैतद् वाक्यं मन्त्र माह ॥

चतुर्थं पाद मनूद्य व्याचष्टे — "वल्गूयति वन्दते पूर्वभाज मित्यपचिति मेवास्मा एतदाह"–इति । स राजा 'पूर्वभाजं' प्रथमतो भजनयुक्तं पुरोहितं (स हि राजानं तदीयहितविचारेण प्रथमतो भजति , तादृशं) 'वल्गूयति' राजा अर्चयति , 'वन्दते' नमस्करोति । 'एतत्' एतेन पादेन 'अस्मै' अस्मिन् यजमाने 'अपचिति मेव' पूजा मेव मन्त्र आह ॥

द्वितीयस्या ऋचः प्रथमपाद मनूद्य व्याचष्टे — "स इत् चेति सुधित ओकसि स्व इति ; गृहा वा ओकः स्वेष्वेव तद् गृहेषु सुहितो वसति"–इति । 'स इत्' स एव राज्ञा पूजितः पुरोहितः 'सुधितः' सुप्रीतः 'स्वे' स्वकीये एव 'ओकसि' गृहे 'चेति' निवसति । 'ओकः'-शब्देनात्र 'गृहाः' एवोच्यन्ते । ततः स्वेष्वेव गृहेषु सुप्रीतो वसतीत्युक्तं भवति ॥

द्वितीय' पाद मनूद्य व्याचष्टे — "तस्मा इळा पिन्वते विश्वदानी मित्यन्नं वा इळान्न मेवास्मा एतदूर्जस्वच्छश्वद्भवति"–इति । 'तस्मै' पुरोहितयुक्ताय राज्ञे 'इळा' अन्नं 'विश्वदानीं' सर्वस्मिन्नपि काले (इदानीं तदानी मित्यादिवदवगन्तव्यम्*) 'पिन्वते' वर्द्धते, अन्नसमृद्धिर्भवति । अस्मिन् पादे 'इळा'-शब्देन अन्न मेवोच्यते ; 'एतत्' अन्नम् 'अस्मै' अस्मिन् राजनि 'ऊर्जस्वत्' क्षीरादिरसोपेतं 'शश्वत्' सर्वदा तिष्ठति ॥

तृतीयं पाद मनूद्य व्याचष्टे — "तस्मै विशः स्वय मेवा नमन्त

* अथ० प्रातिः ४, २३ । विश्वदानीं = सर्वदा निरु० ११, ४, १० ।

इति ; राष्ट्राणि वै विशो राष्ट्राण्येवैनं तत् स्वय मुपनमन्ति"–इति । 'तस्मै' पुरोहितयुक्ताय राज्ञे 'विशः' प्रजाः 'स्वय मेव तदीयप्रयत्ननिरपेक्षा एव 'आ नमन्ते' आनतिं प्राप्ता भवन्ति । अस्मिन् पादे 'विट्'-शब्देन 'राष्ट्राण्येव' प्रजोपेता देशा एव विवक्षिताः । तादृशानि राष्ट्राण्येव 'एनं' पुरोहितयुक्तं क्षत्रियं स्वय मेव प्राप्नुवन्ति ॥

चतुर्थं पाद मनूद्य व्याचष्टे— "यस्मिन् ब्रह्मा राजनि पूर्व एतीति ; पुरोहित मेवैतदाह"–इति । 'यस्मिन्' राजनि 'ब्रह्मा' ब्राह्मणः हित मुपदिशन् 'पूर्व एति' प्रथमतो गच्छति , स इत् क्षेतीति पूर्वत्रान्वयः । अनेन पादेन पूर्व एतीत्येतं पुरोहित मेव मन्त्रो ब्रूते ॥

तृतीयस्या ऋचः प्रथमपाद मनूद्य व्याचष्टे— "अप्रतीतो जयति सं धनानीति ; राष्ट्राणि वै धनानि तान्यप्रतीतो जयति"–इति । अयं पुरोहितयुक्तो राजा 'अप्रतीतः' प्रतिकूलैः शत्रुभिः इतः प्राप्तः प्रतीतः , तद्विपरीतो ऽप्रतीतः , शत्रुप्राप्तिरहित एव भूत्वा धनोपेतानि राष्ट्राणि सम्यक् 'जयति' सम्पादयति । अस्मिन् पादे 'धन'-शब्देन राष्ट्राण्येव विवक्षितानि ; तानि स्वयं प्रतिपक्षरहित एव जयति ॥

द्वितीयं पाद मनूद्य व्याचष्टे— "प्रतिजन्यान्युत या सजन्येति ; सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानप्रतीतो जयति"–इति । 'जन्यानि' शत्रून् , 'अप्रतीतः' स्वय मप्रतिपक्षो जयतीत्यनुवर्त्तते । किञ्च 'या' सेना 'सजन्या' शत्रुसहिता , ता मपि जयति । अस्मिन् पादे 'जन्य'-शब्देन सपत्ना अभिधीयन्ते, तस्य व्याख्यानं 'द्विषन्तो भ्रातृव्याः'–इति । 'तान्' भ्रातृव्यान् 'अप्रतीतः' प्रतिपक्षरहितो जयति ॥

तृतीयं पाद मनूद्य व्याचष्टे— "अवस्यवे यो वरिवः कृणोतीति यदाहावसीयसे यो वसीयः करोतीत्येव तदाह"–इति । 'अवस्यवे' वसुरहिताय ब्राह्मणाय पुरोहिताय 'यः' राजा 'वरिवः कृणोति' परिचर्यां करोति 'इति' मन्त्रो यदाह, तत्र 'अवसीयसे' अत्यन्तदरिद्राय धनरहिताय 'यः' राजा 'वसीयः' अतिशयेन धनवन्तं करोति 'इति' अनेनैव प्रकारेण मन्त्रो ब्रूते ॥

चतुर्थं पाद मनूद्य व्याचष्टे— "ब्रह्मणे राजा त मवन्ति देवा इति ; पुरोहित मेवैतदभिवदति"–इति । 'ब्रह्मणे' ब्राह्मणाय पूर्वोक्तेन अवस्यव इति चतुर्थ्यन्तेन अन्वेति, तथा राजेति पदं य इत्यनेन अन्वेति । 'तं' तादृशं पुरोहितपूजकं राजानं देवाः 'अवन्ति' पालयन्ति । 'एतद्' एतेन ब्रह्मण इति पदेन पुरोहित मेव मन्त्रः अभिवदति ॥ ३ (२६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) तृतीयः खण्डः ॥ ३ (२६) ॥

॥ अथ चतुर्थः खण्डः ॥

यो ह वै त्रीन् पुरोहितांस्त्रीन् पुरोधातॄन् वेद स ब्राह्मणः पुरोहितः स वदेत पुरोधाया अग्निर्वाव पुरोहितः पृथिवी पुरोधाता वायुर्वाव पुरोहितो

ऽन्तरिक्षं पुरोधाता ऽऽदित्यो वाव पुरोहितो द्यौः पुरोधातैष ह वै पुरोहितो य एवं वेदाथ स तिरोहितो य एवं न वेद तस्य राजा मित्रं भवति द्विषन्त मप बाधते यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः क्षत्रेण क्षत्रं जयति बलेन बल मश्नुते यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितस्तस्मै विशः सञ्जानते सम्मुखा एकमनसो यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितो भूर्भुवस्वरो ममो ऽह मस्मि स त्वं स त्व मस्यमो ऽहं द्यौरहं पृथिवी त्वं सामाहमृक् त्वं तावेह संवहावहै पुराण्यस्मान् महाभयात् तनूरसि तन्वं मे पाहि या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ता मह्य मस्मिन्नासने ऽक्षिद्रं शर्म यच्छत या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ता मह्य मस्मिन्नासने ऽक्षिद्रं शर्म यच्छत अस्मिन्नाष्ट्रे श्रिय मावेशयाम्यतो देवीः प्रति पश्याम्यापः दक्षिणं पाद मवनेनिजे ऽस्मिन् राष्ट्र इन्द्रियं दधामि सव्यं पाद मवनेनिजे ऽस्मिन् राष्ट्र इन्द्रियं वर्द्धयामि पूर्व मन्य मपर मन्यं पादावनेनिजे देवा राष्ट्रस्य गुप्त्या अभयस्यावरुद्ध्यै आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे ॥ ४ (२७) ॥

अथ पौरोहित्यस्य योग्यायोग्यौ ब्राह्मणौ विविनक्ति— "यो ह वै त्रीन् पुरोहितांस्त्रीन् पुरोधातॄन् वेद, स ब्राह्मणः पुरोहितः; स वदेत पुरोधाया ; अग्निर्वाव पुरोहितः , पृथिवी पुरोधाता ; वायुर्वाव पुरोहितो, ऽन्तरिक्षं पुरोधाता ; ऽऽदित्यो वाव पुरोहितो, द्यौः पुरोधातैष ह वै पुरोहितो य एवं वेदाथ स तिरोहितो य एवं न वेद"–इति । राजा स्वहितोपदेशार्थं स्वस्य पुरोहितो ऽवस्थापितः ; तस्य पुरोहितस्य योऽय मवस्थापयिता राजा, स पुरोधाता । देवतासु मध्ये ये त्रयः पुरोहिताः सन्ति, ये च त्रयः पुरोधातारः सन्ति , तानुभयविधान् 'यो वेद' तत्प्रतिपादकं मन्त्रं सर्वदानुसन्धत्त इत्यर्थः । 'सः' तादृशो ब्राह्मणः 'पुरोहितः' पुरोहितो भवितुं योग्यः । 'सः' च ब्राह्मणः 'पुरोधायै' पौरोहित्यार्थम् "अग्निः"–इत्यादिकं मन्त्रं जपेत् । अग्नि-वायवादित्याः पुरोहितरूपाः, पृथिव्यन्तरिक्षद्युलोकाः पुरोधारूपा इति मन्त्रार्थः । 'यः' पुमान् 'एवं वेद' मन्त्रार्थं मनुसन्धत्ते ; 'एषः' एव योग्यः पुरोहितः ; 'अथ' तद्वैलक्षण्येन 'यः' पुमान् एवं न वेद , स 'तिरोहितः' पौरोहित्यादन्तर्हितः , तदयोग्य इत्यर्थः ॥

योग्यं पुरोहितं प्रशंसति— "तस्य राजा मित्रं भवति द्विषन्त मप बाधते , यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"–इति । यस्य 'एव' मन्त्रादिवेदित्वगुणयुक्तः पुरोहितो भवेत् ; 'तस्य' राज्ञो देशान्तरवर्त्ती 'राजा' 'मित्र" बन्धुर्भवति । तथा 'द्विषन्तम्' अन्यं राजानं पुरोहितयुक्तो राजा 'बाधते' विनाशयति ॥

पुनरपि द्वेधा प्रशंसति – "क्षत्रेण क्षत्रं जयति , बलेन बल मश्नुते, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितस्तस्मै विशः

सञ्जानते, सम्मुखा एकमनसो, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"–इति। पूर्ववद् (२८७पृ०) व्याख्येयम् ॥

अथ राज्ञः पुरोहितवरणमन्त्रं माह— "भूर्भुवस्स्वरो ममो ऽह मस्मि, स त्वं; सत्व मस्यमो ऽहं; द्यौरहं पृथिवी त्वं; सामाहमृक् त्वं; तावेह संवहावहै, पुराण्यस्मान् महाभयात् तनूरसि तन्वं मे पाहि"–इति। 'भूर्भुवस्स्वः'–इतिशब्दैर्लोकत्रयाभिमानिन्य देवता उच्यन्ते, प्रणवेन परमात्मा। एते सर्वे अनुगृह्णन्त्वित्यभिप्रायः। पुरोहितः 'अहम्' 'अमः' द्युलोकरूपो ऽस्मि, त्वन्तु 'सः' भूलोकरूपोऽसि। पुनरपि 'स त्व मसि, अमोहम्'–इत्यभिधानं दार्ढ्यार्थम्। तस्यैव व्याख्यानं 'द्यौरहं पृथिवी त्वम्'–इति। तथा सामस्वरूपोऽहम्, ऋक्स्वरूपस्त्व मसि। 'तौ' उभावावाम् 'इह' राष्ट्रे 'आ' समन्तात् 'पुराणि' तदुपलक्षितग्रामाश्च 'संवहावहै' सम्यग् वहनं पुरादिनिर्वाहं करवावहै। त्वं मम 'तनूः' शरीर मसि, अतो मदीयां 'तन्वं' शरीरं 'अस्मात्' ऐहिकात्, आमुष्मिकात् च 'महाभयात्' 'पाहि' रक्ष ॥

अनेन मन्त्रेण राज्ञा कृतो यः पुरोहितः, तस्य राजदत्तविष्टराभिमन्त्रण माह— "या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः, ता मह्य मस्मिन्नासने ऽक्षिद्रं शर्म यच्छत"–इति *। सोमो राजा यासा मोषधीनां ताः 'सोमराज्ञः', 'बह्वः' बहुजातीयाः, 'शतविचक्षणाः' शतशाखाभिन्नाः। तादृश्य ओषधयो याः सन्ति, तास्तथाविधाः हे ओषधयः! 'अस्मिन्नासने' तृणादिनिर्मिते कटादिरूपे 'मह्यं' पुरोहिताय 'छिद्ररहितं शर्म' दुखस्पर्शरहितं सुखं 'यच्छत' दत्त ॥

* सं० १०. ९७. १८। म० ब्रा० २. ८. ३। गो० गृ० सू० ४. १०. ४।

Nyāya Kusumāñjali Prakaraṇa, (Text) Vol. I, Fasc. 1—6 ; Vol. II, Fsasc. 1—3 @ /6/ each	Rs.	3	
Padumawati		2	0
Pariçiṣṭa Parvan, (Text) Fasc. 1—5 @ /6/ each		1	14
Pṛthivīrāj Rāsā, (Text) Part I, Fasc.1, Part II, Fasc.1—5 @ /6/		2	4
Ditto (English) Part II, Fasc. 1		0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1—8 ; Vol. II, Fasc. 1—6 ; Vol. III, Fasc. 1—4 @ /6/ each		6	12
Parāçara, Institutes of (English)		0	12
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5—10 ; II, 1—6 ; III, 1—7 ; IV, 1—6 ; V, 1—8, @ /6/ each Fasc.		12	6
Sāṇkhya Sūtra Vṛtti (Text) Fasc. 1—4 @ /6/ each		1	8
Ditto (English) Fasc. 1—3 @ /12/ each		2	4
Suçruta Saṁhitā, (Eng.) Fasc. 1 & 2 @ /12/ each		1	8
*Taittirīya Āraṇyaka, (Text) Fasc. 2—11 @ /6/ each		3	12
* Ditto Saṁhitā, (Text) Fasc. 9—41 @ /6/ each		12	6
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1—19 @ /6/ each		7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1—9 ; Vol. II, Fasc. 1—10, Vol. III, Fasc. 1—2, Vol. IV, Fasc. 1, Vol. V,Fasc. 1-5 @ /6/ each		10	2
Tul'si Sat'sai, (Text) Fasc. 1—5 @ /6/ each		1	14
Uvāsagadasāo, (Text and English) Fasc. 1—6 @ /12/ each		4	8
Varāha Purāṇa, (Text) Fasc. 1—14 @ /6/ each		5	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2—6 ; Vol. II, Fasc. 1—7, @ /6/ each		4	8
Viṣṇu Smṛti, (Text) Fasc. 1—2 @ /6/ each		0	12
Vivādaratnākara (Text) Fasc. 1—7 @ /6/ each		2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1—6 @ /6/ each		2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1—5		1	14

Tibetan Series.

Pag-Sam Thi Siñ, Fasc. 1—4 @ 1/ each		4	0
Rtogs *brjod dpag bkhri* Siñ (Tib. & Sans.) Vol. I, Fasc. 1—5 ; Vol. II. Fasc. 1—5 @ 1/ each		10	0
Sher Phyin, Vol. I, Fasc. 1—5 ; Vol. II, Fasc. 1—3 ; Vol. III, Fasc. 1—2 @ 1/ each		10	0

Arabic and Persian Series.

Al Mugaddin, (English) Fasc. 1		0	12
'Ālamgīrnāmah, with Index, (Text) Fasc. 1—13 @ /6/ each		4	14
Āīn-i-Akbarī, (Text) Fasc. 1—22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1—7 ; Vol. II, Fasc. 1—5 ; Vol. III, Fasc. 1—5 @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1—37 @ 1/ each		37	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshānāmah, with Index, (Text) Fasc. 1—19 @ /6/ each		7	2
Catalogue of the Persian books and Manuscripts in the Library of the Asiatic Society of Bengal, Fasc. 1 & 3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms and Appendix, Fasc. 1—21 @ 1/ each		21	0
Farhang-i-Rashīdī (Text), Fasc. 1—14 @ 1/ each		14	0
Fihrish-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1—4 @ /12/ each		3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1—9 @ /6/ each		3	6
Ditto of Āzādī, (Text) Fasc. 1—4 @ /6/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1		0	12
History of the Caliphs, (English) Fasc. 1—6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1—3 @ /6/ each		1	2
Iṣābāh, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1—9 ; Vol. II, 1—9 ; Vol. III, 1—10 ; Index to Vol. I, Fasc. 10 & 11 ; Index to Vol. II, Fasc. 10—12 ; & Index to Vol. III, Fasc. 11 & 12 @ /6/ each		13	2
Maghāzi of Wāqidī, (Text) Fasc. 1—5 @ /6/ each		1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhab-ut-Tawārīkh, (Text) Fasc. 1—15 @ /6/ each ..	Rs. 5	10
Muntakhab-ut-Tawārīkh, (English) Vol. I, Fasc. 1—4 ; Vol. II, Fasc. 1—5 @ /12/ each	6	12
Muntakhab-ul-Lubāb, (Text) Fasc. 1—19 @ /6/ each	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1—6 @ /6/ each	2	4
Nukhbat-ul-Fikr, (Text) Fasc. 1	0	6
Niẓāmī's Khiradnāmah-i-Iskandari. (Text) Fasc. 1 and 2 @ /12/ each	1	8
Riyāẓu-s-Salātīn (Text) Fasc. 1—4 @ /6/ each	1	8
*Suyūṭy's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7—10 @ 1/ each	4	0
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1—5 @ /6/ each	1	14
Ditto (English) Fasc. 1—14 @ /12/ each	10	8
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of ẓiyāu-d-dīn Barni, (Text) Fasc. 1—7 @ /6/ each	2	10
Tārīkh-i-Fīrūzshāhi of Shams-i-Sirāj-Aif, (Text) Fasc. 1—6 @ /6/ each	2	4
Ten Ancient Arabic Poems, Fasc. 1 & 2 @ 1/8/ each	3	0
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1	0	12
Wīs o Rāmīn, (Text) Fasc. 1—5 @ /6/ each	1	14
Zafarnāmah, Vol. I, Fasc. 1—9 ; Vol. II, Fasc. 1—8 @ /6/ each ..	6	6

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vol. VII, Vols. XIII and XVII, and Vols. XIX and XX @ 10/ each Rs. 50 0
2. Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @/6/ per No. ; and from 1870 to date @ /8/ per No.
3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7) 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883	3	0
General Cunningham's Archæological Survey Report for 1863—64 (Extra No., J. A. S. B., 1864)	2	0
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868)	2	0
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875)	4	0
Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., J. A. S. B., 1882)	4	0
5. Anis-ul-Musharrahin	3	0
6. Catalogue of Fossil Vertebrata	3	0
7. Catalogue of the Library of the Asiatic Society, Bengal by W. A. Bion	3	8
8. Iṣṭilāḥāt-us-ṣūfiyah, edited by Dr. A. Sprenger, 8vo. ..	1	0
9. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each	32	0
10. Jawāmi-ul-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I	2	0
11. Khizānat-ul-'ilm	4	0
12. Mahābhārata, Vols. III and IV, @ 20/ each	40	0
13. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—III, with 8 coloured Plates, 4to. @ 6/ each ..	18	0
14. Sharaya-ool-Islām	4	0
15. Tibetan Dictionary, by Csoma de Kōros	10	0
16. Ditto Grammar "	8	0
17. Kāçmīraçabdāmṛta, Part I "	1	8

Notices of Sanskrit Manuscripts, Fasc. 1—26 @ 1/ each .. 26 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra .. 5 0

N. B.—All Cheques, Money Orders &c., must be made payable to the "Treasurer, Asiatic Society," only.

Books are supplied in V. P. P.

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 926.

7303



॥ ऐतरेयब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE AITARĒYA BRĀHMAṆA
OF THE ṚG-VEDA,

WITH THE
COMMENTARY OF SĀYAṆA ĀCARYA.

EDITED BY
PANDIT SATYAVRATA SĀMAŚRAMĪ.

VOL. IV.

FASCICULUS IV.

CALCUTTA:
PRINTED BY H. V. CHATTERJEE,
AT THE SATYA PRESS, 16/1 GHOSH'S LANE,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.
1898.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.

46, GREAT RUSSEL STREET, LONDON, W. C. AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1—4 @ /6/ each	..	Rs. 1	8
*Agni Purāṇa, (Text) Fasc. 4—14 @ /6/ each	..	.. 4	2
Aitarēya Āraṇyaka of the Rg Veda, (Text) Fasc. 1—5 @ /6/ each		1	14
Aitarēya Brāhmaṇa, (Text) Vol. I, Fasc. 1—5 ; Vol. II, Fasc. 1—5 ; and Vol. III, Fasc. 1—5 ; Vol. IV, Fasc. 1—4 @ /6/ each		7	2
Aṇu Bhāṣyam, (Text) Fasc. 1—5 @ /6/ each ..	.. ..	1	14
Aphorisms of Çāṇḍilya, (English) Fasc. 1 ..	.. ..	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1—6 @ /6/ each	..	2	4
Açvavaidyaka, (Text) Fasc. 1—5 @/6/ each ..	.. ..	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1—5 ; Vol. II, Fasc. 1—5 @ 1/ each	..	10	0
*Bhāmati, (Text) Fasc. 4—8 @ /6/ each ..	.. ..	1	14
Brahma Sūtra, (English) Fasc. 1	.. ..	0	12
Bṛhaddēvatā, (Text) Fasc. 1—4 @ /6/ each ..	.. ..	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1—6 @ /6/ each ..	..	2	4
*Caturvarga Cintāmaṇi, (Text) Vols. II, 1—25 ; III, Part I, Fasc. 1—18, Part II, Fasc. 1—10 @ /6/ each ..	..	19	14
Çrauta Sūtra of Āpastamba, (Text) Fasc. 2—14 @ /6/ each	..	4	14
Ditto Āçvalāyana (Text) Fasc. 1—11 @ /6/ each ..	..	4	2
* Ditto Lāṭyāyana (Text) Fasc. 4—9 @ /6/ each ..	..	2	4
Ditto Çāṅkhāyana (Text) Vol. I, Fasc. 1—7 ; Vol. II, Fasc. 1—4 ; Vol. III, Fasc. 1—4 @ /6/ each	..	5	10
Çri Bhāṣyam, (Text) Fasc. 1—3 @ /6/ each ..	.. ..	1	2
Kāla Mādhava, (Text) Fasc. 1—4 @ /6/ each ..	.. ..	1	8
Kāla-Vivēka, (Text) Fasc. 1—3	.. ..	1	2
Kātantra, (Text) Fasc. 1—6 @ /12/ each ..	.. ..	4	8
Kathā Sarit Sāgara, (English) Fasc. 1—14 @ /12/ each	..	10	8
Kūrma Purāṇa (Text) Fasc. 1—9 @ /6/ each ..	.. ..	3	6
*Lalita-Vistara, (Text) Fasc. 4—6 @ /6/ each	..	1	2
Ditto (English) Fasc. 1—3 @ /12/ each	..	2	4
Madana Pārijāta, (Text) Fasc. 1—11 @ /6/ each	..	4	2
Manuṭīkā Saṅgraha, (Text) Fasc. 1—3 @ /6/each	.. ..	1	2
*Mārkaṇḍēya Purāṇa, (Text) Fasc. 4—7 @ /6/ each	.. ..	1	8
Mārkaṇḍēya Purāṇa, (English) Fasc. 1—5 @ /12/ each	.. ..	3	12
*Mīmāṁsā Darçana, (Text) Fasc. 7—19 @ /6/ each	.. ..	4	14
Nārada Smṛti (Text) Fasc. 1—3 @ /6/ each ..	.. ..	1	2
Nyāyavārtika, (Text) Fasc. 1—4 @ /6/ each ..	.. ..	1	8
*Nirukta, (Text) Vol. III, Fasc. 1—6 ; Vol. IV, Fasc. 1—8 @/6/each		5	4
*Nītisāra, or The Elements of Polity, By Kāmandakī (Sans.) Fasc. 3—5 @ /6/ each	..	1	2
Nyāyabinduṭīkā, (Text)	.. ..	0	10

अभिमन्त्रिते विष्टरे उपवेशन माह — "या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवी मनु, ता मह्य मस्मिन्नासने ऽच्छिद्रं शर्म यच्छत"–इति *। वंशदलादिनिर्मितविष्टरगताः 'ओषधयः' पृथिवी मनु 'विष्ठिताः' विशेषेण स्थापिताः, ता मह्य मित्यादि पूर्ववत् (२८८पृ०) ॥

पुरोहितस्य पाद्यार्थं समानीताना मपा मभिमन्त्रणमन्त्रं दर्शयति — "अस्मिन् राष्ट्रे श्रिय मावेशयाम्यतो देवीः प्रति पश्याम्यापः"–इति †। हे आपः! पुरोहितोऽह मस्मिन् राष्ट्रे 'श्रियम् आवेशयामि' धनादिसम्पदं सम्पादयामि । अतः कारणाद् 'देवीः' द्योतनात्मिकाः युष्मान् प्रति पश्यामि ॥

ताभिरद्भिः पुरोहितस्य पादप्रक्षालनमन्त्र माह— "दक्षिणं पाद मवनेनिजे ऽस्मिन् राष्ट्र इन्द्रियं दधामि ; सव्यं पाद मवनेनिजे ऽस्मिन् राष्ट्र इन्द्रियं वर्द्धयामि ; पूर्व मन्य मपर मन्यं पादाववनेनिजे देवा राष्ट्रस्य गुप्त्या अभयस्यावरुद्ध्यै"–इति ‡। मदीयं दक्षिणं पादम् 'अवनेनिजे' प्रक्षालयामि । तेन अस्मिन् राष्ट्रे प्राणिना मिन्द्रियपाटवहेतुं धनं सम्पादयामि । वामपादप्रक्षालनेन च तद् वर्द्धयामि । 'पूर्वं' प्रथमम् 'अन्यं' दक्षिणं पादं शोधयित्वा, 'अपरं' पश्चात् 'अन्यं' वामं पादं शोधयामि । हे देवाः ! एव मुभौ पादौ प्रक्षालयामि, तच्च राष्ट्रस्य 'गुप्त्यै' रक्षार्थम्, 'अभयस्य' चौरादिभयराहित्यस्य 'अवरुद्ध्यै' सम्पादनाय भवति ॥

---

* सं० १०. ९७. १९ । वा० सं० १२. ९३ (एतत्पूर्वा ऋगपि तत्र ९२) । म० ब्रा० २. ८. ४ । गो० गृ० ४. १०. ५ ।

† म० ब्रा० २. ८. ५, ६ । गो० गृ० ४. १०. ७, ८ ।

‡ म० ब्रा० २. ८. ७, ८ । गो० गृ० ४. १०. ९, १० ।

KENDRIYA SANSKRIT VIDYA PEETHA TIRUPATI 7363

पादप्रक्षालनावशिष्टाना मपा मभिमन्त्रणमन्त्र माह— "आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे"–इति। 'पादावनेजनीः' पादशुद्धिकरणभूता इमा आपो 'मे' मदीयं 'द्विषन्तं' शत्रुं निःशेषेण दहन्तु ॥ ४ (२७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये (चत्वारिंशाध्याये) चतुर्थः खण्डः ॥ ४ (२७) ॥

॥ अथ पञ्चमः खण्डः ॥

अथातो ब्रह्मणः परिमरो' यो ह वै ब्रह्मणः परिमरं वेद' पर्येन' द्विषन्तो भ्रातृव्याः' परि सपत्नां म्रियन्ते' ऽयं वै ब्रह्म योऽयं पवते' त मेताः पञ्च देवताः परिम्रियन्ते' विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निर्विद्युद्वै विद्युत्यं वृष्टि मनुप्रविशति' सान्तर्धीयते' तां न निर्जानन्ति' यदा वै म्रियते ऽथान्तर्धीयते' ऽथैनं न निर्जानन्ति' स ब्रूयाद्विद्युतो मरणे' द्विषन्मे म्रियतां सो ऽन्तर्धीयतां' तं मा निर्ज्ञासिषुरिति' क्षिप्रं हैवैनं न निर्जानन्ति' वृष्टिर्वै वृष्ट्वा चन्द्रमस मनुप्रविशति' सान्तर्धीयते' तां न निर्जानन्ति' यदा वै म्रियते ऽथा-

न्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयाद् वृष्टेर्मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञांसिषुरिति क्षिप्रं हैवैनं न निर्जानन्ति चन्द्रमा वा अमावास्याया मादित्य मनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयाच्चन्द्रमसो मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञांसिषुरिति क्षिप्रं हैवैनं न निर्जानन्त्यादित्यो वा अस्तं यन्नग्नि मनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति यदा वै म्रियते ऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयादादित्यस्य मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञांसिषुरिति क्षिप्रं हैवैनं न निर्जानन्त्यग्निर्वा उद्वान् वायु मनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति यदा वै म्रियते ऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयादग्नेर्मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञांसिषुरिति क्षिप्रं हैवैनं न निर्जानन्ति ता वा एता देवता अत एव पुनर्जायन्ते वायोरग्निर्जायते प्राणाद्धि बलान् मथ्यमानोऽधिजायते तं दृष्ट्वा ब्रूयादग्निर्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघ्रत्येत्यतो ह्येव पराङ् प्रजिघ्रत्यग्नेर्वा

आदित्यो जायते तं दृष्ट्वा ब्रूयादादित्यो जायतां मा मे द्विषन् जन्यत एवं पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघात्यादित्याद्वै चन्द्रमा जायते तं दृष्ट्वा ब्रूयाच्चन्द्रमा जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघाति चन्द्रमसो वै वृष्टिर्जायते तां दृष्ट्वा ब्रूयाद् वृष्टिर्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघाति वृष्टेर्वै विद्युज्जायते तां दृष्ट्वा ब्रूयाद्विद्युज्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघाति * स एष ब्रह्मणः परिमरस्तं मेतं ब्रह्मणः परिमरं मैत्रेयः कौषारवः सुत्वने कैरिशये भार्गायणाय राज्ञे प्रोवाच तं ह पञ्च राजानः परिममुस्ततः सुत्वा महज्जगाम तस्य व्रतं न द्विषतः पूर्व उपविशेद् यदि तिष्ठन्तं मन्येत तिष्ठतैव न द्विषतः पूर्वः संविशेद् यद्यासीनं मन्येतासीतैव न द्विषतः पूर्वः प्रस्वप्याद् यदि जाग्रतं मन्येत जाग्रियादेवापि ह यद्यस्याश्ममूर्ज्ञा द्विषन् भवति क्षिप्रं हैवैनं स्तृणुते-स्तृणुते ॥ ६ (२८) ॥

॥इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां पञ्चमोध्यायः॥ ५ ॥

---

* "प्रजिघ्यत्वित्यतो०—० प्रजिघ्यति" क। एवं पूर्वत्र चेह सर्वत्र।

अथोक्तपुरोहितसहितस्य शत्रुक्षयार्थं कश्चित् प्रयोग माह— "अथातो ब्रह्मणः परिमरो ; यो ह वै ब्रह्मणः परिमरं वेद, पर्येनं द्विषन्तो भ्रातृव्याः परि सपत्ना म्रियन्ते"–इति । 'अथ' पौरोहित्यविधानानन्तरम् , यतः पुरोहितेन सम्पाद्यः शत्रुक्षयो ऽपेक्षितः , 'अतः' कारणाद् 'ब्रह्मणः परिमरः' एतन्नामकः कर्मविशेषः, अभिधीयत इति शेषः । ब्रह्मशब्देनात्र वायुर्विवक्षितः* ; "अयं वै ब्रह्म, योऽयं पवते"–इति वक्ष्यमाणत्वात् (१४पं०) । तस्य वायोः परितो विद्युदादीनां मरणप्रकारः 'परिमरः'–इत्युच्यते † । तद्भावनारूपस्य कर्मविशेषस्य तदेव नामधेयम् । 'यः' पुमान् ब्राह्मणः परिमरं 'वेद' मनसा भावयति , 'एनं परि' एतस्य परितो ऽवस्थितासु सर्वासु दिक्षु , इदानीम् एनं 'द्विषन्तः' द्वेषं कुर्वन्तः शत्रवो म्रियन्ते ; जात्या शत्रवः 'सपत्नाः', तेऽपि परितो म्रियन्ते ‡ ; तस्मादेतद् वदनं सम्पादनीयम् ॥

वेद्यस्वरूप माह— "अयं वै ब्रह्म , योऽयं पवते , त मेताः

---

* "तद् ब्रह्मणः परिमर इत्युपासीत"–इति तै० आ० ९. १०. ४ । "ब्रह्मणः परिमरः । परिम्रियन्ते ऽस्मिन् पञ्च देवता विद्युद् वृष्टिश्चन्द्रमा आदित्यो ऽग्निरित्येताः ; अतो वायुः परिमरः , मृत्यन्तरप्रसिद्धेः (ऐ० ब्रा० ८. ५. ५.) । स एष एवायं वायुराकाशेनानन्य इत्याकाशो ब्रह्मणः परिमरः , त माकाशं वायुात्मानं ब्रह्मणः परिमर इत्युपासीत"–इति तत्र शां० भा० ।

† "परिमरौ उभयतो मरणयुक्तौ ; यस्य पशोः अग्रजोऽपि मृतः , अनुजोऽपि मृतः , तादृशौ"–इति तै० सं० ५. ६. २१. सा० भा० ।

‡ "पर्येनं म्रियन्ते द्विषन्तः सपत्नाः परि येऽप्रिया भ्रातृव्याः"–इति तै० आ० ९. १०. ४ । "परि एन मेवंविदं प्रतिस्पर्द्धिनो द्विषन्तोऽद्विषन्तोऽपि सपत्ना यतो भवति , अतो विशेष्यन्ते द्विषन्तः सपत्ना इति । य एनं द्विषन्तः सपत्नाः , ते परिम्रियन्ते प्राणान् जहति । किञ्च ये चाप्रिया अस्य भ्रातृव्याः अद्विषन्तोऽपि , ते च परिम्रियन्ते" –इति तत्र शां० भा० ।

पञ्च देवताः परिम्रियन्ते,— विद्युद् वृष्टिश्चन्द्रमा आदित्योऽग्निः" –इति। यः 'अयं' वायुः 'पवते' अन्तरिक्षे सञ्चरति, अय मेव ब्रह्मशब्देन विवक्षितः। 'एताः' विद्युदादयः पञ्च देवताः 'तं' वायुं 'परिम्रियन्ते' तस्य परितो विनाशं गच्छन्ति। तदेतदनुसन्धेयस्वरूपम् ॥

तत्रादौ विद्युतो मृतिं प्रतिपादयति— "विद्युद्वै विद्युत्य वृष्टि मनुप्रविशति, सान्तर्धीयते, तां न निर्जानन्ति"–इति। येयं विद्युदस्ति, सा 'विद्युत्य' प्रकाशं कृत्वा, पश्याद् वृष्टि मनुप्रविशति; अत एव सा 'अन्तर्धीयते' अस्माभिर्न दृश्यते। 'तां' वृष्टौ प्रविष्टां विद्युतं क्व गता, कुत्र स्थिता? इति मनुष्या निःशेषेण न जानन्ति ॥

तत्र दृष्टान्त माह— "यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति"–इति। लोके कश्चित् पुरुषो यस्मिन् क्षणे म्रियते, तस्मिन्नेव क्षणे अन्यैर्न दृश्यते, ततो जना विचार्यापि क्व गतः कुत्रावस्थित इति 'एनं' पुरुषं मृतं 'न निर्जानन्ति'; यद्यपि कुणपं पश्यन्ति, तथापि जीवात्मानं न जानन्त्येव। तथैव विद्युद्विनाश इति द्रष्टव्यम् ॥

यथोक्तध्यानवतो जप्यं मन्त्र* माह— "स ब्रूयाद्विद्युतो मरणे द्विषन् मे म्रियतां, सोऽन्तर्धीयतां, तं मा निर्ज्ञासिषुरिति"–इति। विद्युतो मरणे सत्युपासको द्विषदित्यादिकं मन्त्रं ब्रूयात्। तस्याय मर्थः— इयं विद्युदिव मदीयः शत्रुः म्रियताम्, स पुनः केनापि न दृश्यताम्, अतो विचार्यापि क्व गतः, क्वास्ते? इति 'तं' शत्रुं तदीया बन्धवो निःशेषेण मा जानन्त्विति ॥

---

* "जपमन्त्र" ज।

जपफलं दर्शयति— "क्षिप्रं ह्येवैनं न निर्जानन्ति"–इति । शीघ्र मेव मृत मेनं शत्रुं तदीया बन्धवो नैव जानन्ति ॥

विद्युत इव वृष्टेर्विनाशं दर्शयति— "वृष्टिर्वै वृष्ट्वा चन्द्रमस मनुप्रविशति, सान्तर्धीयते, तां न निर्जानन्ति ; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति , स ब्रूयाद् वृष्टेर्मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं ह्येवैनं न निर्जानन्ति"–इति । येयं वृष्टिरस्ति, सेयं 'वृष्ट्वा' भूमौ जलं पातयित्वा, स्वय माप्यमण्डलरूपं चन्द्रमस मनुप्रविशति । अन्यत् पूर्ववद् योज्यम् ॥

चन्द्रमसो विनाशं दर्शयति— "चन्द्रमा वा अमावास्याया मादित्य मनुप्रविशति, सोऽन्तर्धीयते, तं न निर्जानन्ति; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति, स ब्रूयाच्चन्द्रमसो मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं ह्येवैनं न निर्जानन्ति"–इति । अयं चन्द्रमाः 'अमावास्यायां' तिथौ साकल्येन आदित्य मनुप्रविशति । अन्यत् पूर्ववत् ॥

आदित्यस्य विनाशं दर्शयति— "आदित्यो वा अस्तं यन्नग्नि मनुप्रविशति , सोऽन्तर्धीयते, तं न निर्जानन्ति ; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति, स ब्रूयादादित्यस्य मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं ह्येवैनं न निर्जानन्ति"–इति । आदित्यो यदास्त मेति, तदानी मग्नि मनुप्रविशति । तदेतत् तैत्तिरीयैः समाम्नातम्— "अग्निं वावादित्यः सायं प्रविशति, तस्मादग्निर्दूरात्तं दृष्ट्वा ; उभे हि तेजसी सम्पद्येते"–इति (ब्रा० ८. १. ३. *) अन्यत् पूर्ववत् ॥

---

* "उद्यन्तं वावादित्य मग्निरनुसमारोहति , तस्माद्धूम एवाग्नेर्दिवा दृष्ट्वा"–इति तत्परांशः ।

अग्नेर्विनाशं दर्शयति— "अग्निर्वा उद्वान् वायु मनुप्रविशति, सोऽन्तर्धीयते, तं न निर्जानन्ति ; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति, स ब्रूयादग्नेर्मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञांसिषुरिति ; क्षिप्रं ह्येवैनं न निर्जानन्ति"–इति। 'उद्वान्' अग्नेरुपशमः, तं प्राप्नुवन्नग्निर्वायु मनुप्रविशति ; वायुबाहुल्ये दीपविनाशदर्शनात्। अन्यत् पूर्ववत्॥

वायोः परितो म्रियमाणानां देवतानां पुनर्वायोरेव जन्म दर्शयति— "ता वा एता देवता अत एव पुनर्जायन्ते"–इति। 'वायोः' जगत्कारणभूतसूत्रात्मरूपत्वात् जगदेकदेशानां विद्युदादीनां जन्मविनाशौ वायुधीनौ॥

पूर्वं विद्युदादीना मग्न्यन्तानां क्रमेण विनाशो दर्शितः ; इदानी मग्नादीनां विद्युदन्तानां क्रमेण उत्पत्तिं विवक्षुरग्नेरुत्पत्तिं दर्शयति— "वायोरग्निर्जायते ; प्राणाद्धि बलान्मथ्यमानोऽधिजायते ; तं दृष्ट्वा ब्रूयादग्निर्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघ्यत्वित्यतो ह्येव पराङ् प्रजिघ्यति"–इति। योऽयमग्निः, सोऽयं वायोर्जायते। कथमेतदिति, तदुच्यते — 'प्राणाद्' बलात् प्राणवायुसम्बन्धिशक्तिवशान्मथ्यमानोऽयमग्निः अधिकत्वेन जायते*। 'तं' जायमानमग्निं दृष्ट्वा सोऽयमग्नादिजन्माध्याता अग्निरित्यादिकं मन्त्रं जपेत्। अयमग्निर्वायोः सकाशात् सुखेन जायतां, 'मे द्विषन्' मदीयः शत्रुः 'मा जनि' मोत्पद्यताम्। अत एव मन्त्रः 'पराङ् प्रजिघ्यतु' विमुखो भूत्वा प्रकर्षेण गच्छतु। 'इति' एतस्मिन् मन्त्रे जपिते सति 'अतः' जपितुः सकाशात् शत्रुः विमुखो भूत्वा दूरे गच्छति॥

---

* "शमीगर्भादग्निं मन्थते"–इति तै० ब्रा० १. १. ९. १ द्रष्टव्यम्।

आदित्यस्योत्पत्तिं दर्शयति— "अग्नेर्वा आदित्यो जायते ; तं दृष्ट्वा ब्रूयादादित्यो जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघ्यत्सित्यतो ह्येव पराङ् प्रजिघ्यति"–इति । रात्रावग्निं प्रविष्ट आदित्यः परेद्युरग्नेर्जायते । अत एव अहनि अग्निस्तेजो-रहितः, सूर्योऽधिकतेजा भासते * । अन्यत् पूर्ववत् ॥

चन्द्रमस उत्पत्तिं दर्शयति— "आदित्याद्वै चन्द्रमा जायते† ; तं दृष्ट्वा ब्रूयाच्चन्द्रमा जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघ्यत्सित्यतो ह्येव पराङ् प्रजिघ्यति"–इति । अमावास्याया मादित्ये प्रविष्टश्चन्द्रमाः शुक्लपक्षप्रतिपदि आदित्यात् जायते । अन्यत् पूर्ववत् ॥

वृष्टेरुत्पत्तिं दर्शयति— "चन्द्रमसो वै वृष्टिर्जायते ‡ ; तां दृष्ट्वा ब्रूयाद् वृष्टिर्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजि-

---

* २९५ पृष्ठगता टीप्पनी द्रष्टव्यावलोक्या ।

† "अयं सोमो वृष्णो अश्वस्य रेतः"–इति सं० १. १६४. ३५ । किञ्च "अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते ; तदेतेनोपेक्षितव्यम्, आदित्यतोऽस्य दीप्तिर्भवतीति । 'सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः (वा० सं० १८. ४० .)'–इत्यपि निगमो भवति ०—० । 'अत्राह गोरमन्वत'–इति (सं० १. ८४. १५.)"–इति निरु० २. २. २ ।

‡ "पर्जन्याद् वै वृष्टिर्जायते"–इति शत० ब्रा० १२. १. १. १ । "रसात्मकत्वात् चन्द्रमसः रसानुप्रदानसम्बन्धः"–इति दु० (निरु० ११. १. ६.) । चन्द्रमःपदस्य निर्व-नम् निरु० ११. १. ५, तै० ब्रा० २. २. १० । "अभाद् वृष्टिरिवाजनि"–इति सं० ७. ९४. १ । "सौम्या ह्यापः"–इति च गतं पुरस्तात् (१भा० ९१पृ० २पं०) । वस्तुतः सूर्यस्यैव मुख्यं वृष्टिप्रदत्वम् । तथाहि— "अग्निर्वा इतो वृष्टिं सुदीरयति, मरुतः वृष्टिं नयन्ति, यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्त्ततेऽथ वर्षति"–इत्यादि तै० सं० २. ४. १०. स्फुटं द्रष्टव्यम् । उक्त मिहापि पुरस्तात् (१भा० ९१पृ० ९पं०) "असाविमां वृष्ट्याभ्युनत्त्यभिजिघ्रति"–इति ।

घ्यत्तितो हैव पराङ् प्रजिघ्रति"–इति। जलमये चन्द्रमण्डले प्रविष्टा वृष्टिः कालान्तरे चन्द्राज्जायते। अन्यत् पूर्ववत्॥

विद्युदुत्पत्तिं दर्शयति— "वृष्टेर्वै विद्युज्जायते *; तां दृष्ट्वा ब्रूयाद् विद्युज्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघ्यत्त्यतो हैव पराङ् प्रजिघ्यति"–इति। वृष्टौ प्रविष्टा विद्युत् पुनरपि कदाचित् प्रसक्तायां वृष्टेर्जायते। अन्यत् पूर्ववत्॥

उक्तमर्थं सुपसंहरति— "स एष ब्रह्मणः परिमरः"–इति। यश्च वायुसम्बन्धिपरिमरनामकः कर्मविशेष उक्तः (२९३पृ०). 'स एषः' ध्यानरूपो जप्य इत्यर्थः †॥

त मेतं कर्मविशेषं मुदाहरणमुखेन प्रशंसति— "त मेतं ब्रह्मणः परिमरं मैत्रेयः कौषारवः सुत्वने कैरिशये भार्गायणाय राज्ञे प्रोवाच, तं ह पञ्च राजानः परि मस्रुस्ततः सुत्वा महज्जगाम"–इति। उक्तं कर्मविशेषं कुषारपुत्रो मैत्रेयनामको महर्षिः सुत्वसंज्ञे राज्ञे प्रोवाच। कीदृशाय सुत्वने? किरिशस्यापत्यं कैरिशिः तस्मै 'कैरिशये', भर्गस्य गोत्रापत्यं भार्गायणः तस्मै 'भार्गायणाय'। 'तं' सुत्वनामकं राजानं 'परितः' सर्वदिक्षु वर्त्तमानाः पञ्चसङ्ख्याका द्वेषिणो राजानो मृताः। ततः 'सुत्वा' राजा 'महत्' प्रौढं निस्सम्मत्सरपदं जगाम॥

---

* "विद्युदा अपां ज्योतिः"–इति शत० ब्रा० ७, ५, २, ४९। "आपो वै वृष्टिः"–इति च तत्रैव ८, २, ३, ४। "आदित् प्रत्नस्य रेतसो ज्योतिः पश्यन्ति"–इति सं० ८, २, ६, ३०। निरुक्तोऽपि ४, २, ६ द्रष्टव्यम्। आदिदितिमन्वस्य ब्रह्मपरं व्याख्यानमपि शङ्करेणाभाषि छा० उप० ३, १७, ७ द्रष्टव्यम्।

† "षड् वै ब्रह्मणो द्वारो ऽग्निर्वायुरापश्चन्द्रमा विद्युदादित्यः"–इत्यादिः (११, ४, ४, १०) शतपथग्रन्थस्य इह समालोच्य इति शिवम्॥

उक्तं जन्मविशेष मनुष्यातुः व्रतविशेषं विधत्ते— "तस्य व्रतं, —न द्विषतः पूर्व उपविशेद्, यदि तिष्ठन्तं मन्येत तिष्ठेतैव ; न द्विषतः पूर्वः संविशेद्, यद्यासीनं मन्येतासीतैव ; न द्विषतः पूर्वः प्रस्वप्याद्, यदि जाग्रतं मन्येत जाग्रियादेव"-इति । 'तस्य' अनुष्यातुः एतद् व्रत मुच्यते । एतदीयो द्विषन् यदा उपविशति, ततः प्राक् स्वयं नोपविशेत् ; किन्तु चारमुखेन तदीयं वृत्ततां विचार्य ; यदि द्विषन्तं तिष्ठन्तं मन्येत, तदानीं स्वय मपि तिष्ठेतैव ; तथा यदा द्विषन् शयनं करोति, ततः प्राक् स्वयं न 'संविशेत्' शयनं न कुर्यात् ; यदि द्विषन्त मुपविष्टं मन्येत, तदा स्वय मप्युपविशेदेव । तथा द्विषन् यदा निद्रां करोति, ततः प्राक् स्वयं न प्रस्वप्यात् ; किन्तु यदि द्विषन्तं जाग्रतं मन्येत, तदानीं स्वय मपि 'जाग्रियात्' प्रबुद्ध एवावतिष्ठेतैव ॥

एवं व्रत माचरतः फलं दर्शयति— "अपि ह यद्यस्याश्म-मूर्द्धा द्विषन् भवति क्षिप्रं ह्येवैनं स्तृणुते-स्तृणुते"-इति । 'अस्य' राज्ञो ऽनुष्यातुः 'द्विषन्' शत्रुः यदि 'अश्ममूर्द्धा' पाषाणसदृश-शिरस्को भवति, अतिप्रबल इत्यर्थः ; तथाप्ययं कर्मविशेषः शीघ्र मेव 'एनं' शत्रुं 'स्तृणुते' हिनस्ति । अभ्यासोऽध्याय-समाप्त्यर्थः ॥ ५ (२८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) पञ्चमः खण्डः ॥ ५ (२८) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः पञ्चमोऽध्यायः ॥

अथात स्तुतशस्त्रयोश्चत्वारि[१] । अथातः पुनरभिषेकस्य सप्त[२] । अथात ऐन्द्रस्त्रीणि[३] । स य इच्छेन्नव[४] । अथातः पुरोधायाः पञ्च[५] ॥ ५ * ॥

अथात स्तुतशस्त्रयोः, पर्यू षु प्र धन्व, एतेन ह वा अष्टौ ॥ ५ † ॥

॥ इति अष्टमपञ्चिका समाप्ता ॥

॥ इति ऐतरेयं ब्राह्मणं सम्पूर्णम् ॥

---

* १६५, १८२, २२३, २३७, २७४ पृ० (४—७—३—९—५ = २८ ख०) ।
† १६५, २१५, २५७पृ० (१०—१०—८=२८ ख०) । १भा० २३२पृ० द्रष्टव्यम् ।

॥ अथ सङ्केताक्षर सूची ॥

अ० चि० अभिधानचिन्तामणिः ।
आर्षानु० ... आर्षानुक्रमणी ।
गो० ब्रा० ... गोपथब्राह्मणम् ।
प्रा० त० ... प्रायश्चित्ततत्त्वम् ।
ह० दे० ... हरदेवता ।
ब्रह्माण्ड पु० ब्रह्माण्डपुराणम् ।
भ० पु० ... भविष्यपुराणम् ।
मार्क० पु० मार्कण्डेयपुराणम् ।
लीला० ... लीलावती ।
वा० ब्रा० वाजसनेयब्राह्मणम् ।
शां० भा० ... शाङ्करभाष्यम् ।

॥ अथ परिच्छेदसूची ॥

॥ अथ सप्तमपञ्चिका ॥

(३१) अथ प्रथमाध्यायः (सत्रिणां कार्यशेषवर्णनम्) ... १
तत्र प्रथमः खण्डः (उपव्रतीयस्य पशोर्विभागः ... १
(३२) अथ द्वितीयाध्यायः (सत्रिणां प्रायश्चित्तानि) ... ८
तत्र प्रथमः खण्डः (आहिताग्नेर्मरणे प्रायश्चित्तानि) ८
अथ द्वितीयः खण्डः (अग्निहोत्रीदोहनप्रायश्चित्तानि) १४
अथ तृतीयः खण्डः (सान्नाय्यप्रायश्चित्तानि) ... १६
अथ चतुर्थः खण्डः (अग्निहोत्रप्रायश्चित्तानि) ... १८
अथ पञ्चमः खण्डः (अन्यापराधप्रायश्चित्तानि) २५
अथ षष्ठः खण्डः (अग्निदाहादौ प्रायश्चित्तानि) २८

अथ सप्तमः खण्डः (अश्रुविसर्जनादिप्रायश्चित्तानि) २२
अथ अष्टमः खण्डः (आहिताग्नेः प्रायश्चित्तानि) ३५
अथ नवमः खण्डः (अपत्नीकाग्निहोत्रविचारः) ४४
अथ दशमः खण्डः (पौर्णमास्यादिविचारः) ... ४७
अथैकादशः खण्डः (अग्निहोत्रप्रायश्चित्तशेषाः) ५१
(३३) अथ तृतीयाध्यायः (राजसूये शौनःशेपाध्यायः) .. ५८
तत्र प्रथमः खण्डः (हरिश्चन्द्रोपाख्यानम्) ... ५८
अथ द्वितीयः खण्डः (,,) ... ६७
अथ तृतीयः खण्डः (,,) ... ७१
अथ चतुर्थः खण्डः (,,) ... ७८
अथ पञ्चमः खण्डः (,,) ... ८६
अथ षष्ठः खण्डः (,,) ... ८४
(३४) अथ चतुर्थाध्यायः (राजसूये याजमानाध्यायः) ... १०२
तत्र प्रथमः खण्डः (क्षत्रियस्य यज्ञाधिकारः) १०२
अथ द्वितीयः खण्डः (देवयजनयाचनम्) ... १०७
अथ तृतीयः खण्डः (इष्टापूर्त्तस्यापरिज्यानिः) ११०
अथ चतुर्थः खण्डः (तत्प्रशंसा) ... ११२
अथ पञ्चमः खण्डः (आहवनीयोपस्थानम्) ... ११६
अथ षष्ठः खण्डः (उत्तरोपस्थानम्) १२०
अथ सप्तमः खण्डः (दीक्षाया आवेदनम्) ... १२३
अथ अष्टमः खण्डः (यजमानभागप्राशनम्) ... १२६
(३५) अथ पञ्चमाध्यायः (राजसूये फलवमाध्यायः) ... १३१
तत्र प्रथमः खण्डः (विश्वन्तरोपाख्यानम्) ... १३१
अथ द्वितीयः खण्डः (,,) ... १३५

अथ तृतीयः खण्डः (क्षत्रियस्य हेयभक्ष्यास्वयः) १३७
अथ चतुर्थः खण्डः (क्षत्रियस्य भक्षो न्यग्रोधः) १४२
अथ पञ्चमः खण्डः (न्यग्रोधवर्णनम्) १४४
अथ षष्ठः खण्डः (औदुम्बरादिप्रशंसा) ... १४७
अथ सप्तमः खण्डः (फलचमसोन्नयादिप्रयोगः) १५२
अथ अष्टमः खण्डः (नाराशंसचमसस्य प्रयोगः) १५६

॥ अथ अष्टमपञ्चिका ॥

(३६) अथ प्रथमाध्यायः (राजसूये स्तोत्रशस्त्राध्यायः) ... १६४
तत्र प्रथमः खण्डः (प्रातस्सवनतृतीयसवनयोः) १६४
अथ द्वितीयः खण्डः (मरुत्वतीये निविद्धानीयं) १६८
अथ तृतीयः खण्डः (निष्केवल्ये निविद्धानीयं) १७४
अथ चतुर्थः खण्डः (माध्यन्दिनसवने) ... १७६
(३७) अथ द्वितीयाध्यायः (राजसूये पुनरभिषेकाध्यायः) १८२
तत्र प्रथमः खण्डः (अभिषेकसाधनानि) ... १८२
अथ द्वितीयः खण्डः (आसन्द्यारोहणप्रकारः) १८६
अथ तृतीयः खण्डः (अभिषेकप्रकारः) ... १९१
अथ चतुर्थः खण्डः (अभिषेकसाधनप्रशंसा)... १९८
अथ पञ्चमः खण्डः (आसन्द्या अवरोहप्रकारः) २०३
अथ षष्ठः खण्डः (दिगुपस्थानादि) २०९
अथ सप्तमः खण्डः (प्रपदमन्त्रादि) २११

(३८) अथ तृतीयाध्यायः (राजसूये ऐन्द्राभिषेकाध्यायः) २२३
तत्र प्रथमः खण्डः (ऐन्द्राभिषेकस्तुतिः) ... २२३
अथ द्वितीयः खण्डः (ऐन्द्राभिषेकप्रकारः) ... २२८
अथ तृतीयः खण्डः (ऐन्द्राभिषेकफलस्तुतिः) २३०
(३९) अथ चतुर्थाध्यायः (राजसूये अभिषेकाध्यायः) ... २३७
तत्र प्रथमः खण्डः (शपथप्रकारोपदेशः) ... २३७
अथ द्वितीयः खण्डः (चतुर्विधसम्भाराः) ... २४०
अथ तृतीयः खण्डः (आसन्द्यादिसम्भाराः) ... २४३
अथ चतुर्थः खण्डः (राजाभिषेकमन्त्रः) ... २४८
अथ पञ्चमः खण्डः (अभिमन्त्रणादि) २४९
अथ षष्ठः खण्डः (अभिषेकदक्षिणादानादि) २५२
अथ सप्तमः खण्डः (महाभिषेकप्रशंसा) ... २५७
अथ अष्टमः खण्डः (तत्रैव गाथोदाहृतिः) ... २६३
अथ नवमः खण्डः (तत्रैव श्लोकोदाहृतिः) ... २६७
(४०) अथ पञ्चमाध्यायः (राजसूये पुरोहिताध्यायः) ... २७२
तत्र प्रथमः खण्डः (पुरोहितविधिः) २७६
अथ द्वितीयः खण्डः (पुरोहितप्रशंसा) ... २७८
अथ तृतीयः खण्डः (तत्रैव मन्त्रोदाहरणम्) २८१
अथ चतुर्थः खण्डः (पौरोहित्ये योग्यायोग्यौ) २८५
अथ पञ्चमः खण्डः (ब्रह्मणः परिमरः) ... २९०

॥ अथ याज्ञिकशब्दसूची ॥

शब्दः	पृष्ठा	शब्दः	पृष्ठा
अग्निष्टोमः	४३	अन्वाहार्यपचनः	५५, २७६
अग्निष्टोमसंस्थः ...	१८०, १८१	अपत्यः	२००
अग्निहोत्रम्	४२, ४३	अपराजिता ...	२०८, २११
अग्निहोत्रहवणी	२४, १०५	अपरिज्यानिः	११५
अग्निहोत्री	१५	अपाम्पतिः	२००
अग्न्याधेयम्	४२, ४३	अप्तीर्यामः	४३
अच्छावाकः	४	अप्रतिरथं (सूक्तं)	२१२
अजीतपुनर्वरुणम्	११४	अप्सुमती	३१
अन्नस्रवः	८८, ८९	अभिमन्त्रणम्	१८८, २४८, २५१
अतिरात्रः	४३	अभिमर्शः	१५५
अत्यग्निष्टोमः	४३	अभिमर्शनम्	१५९
अद्रयः	१५०	अभिवत् ...	१७१, १७५
अधिश्रितम्	१०	अभिषिञ्चनम्	१९३
अधिषवणं (चर्म)	१५०	अभिषेकः	२४९
अधिषवणे (फलके) ...	१५०	अभिषेचनीयः ...	७८, ८१, ८८
अध्वर्युः	४	अभ्युत्क्षोक्षणम्	२४७
अनड्वापुरुषः	४२	अरणी	३२
अनुख्याता	१२१	अवभृथः	८९, १८३
अनुचरः (राथन्तरः) ...	१६६	अव्रतः	४८
अनुमतिः	४९	अव्रत्यम्	९४
अनुरूपम्	१७२	अश्रान्ता	१९५
अनूचानः	१३४	अष्टका	४२, ४३
अनूबन्ध्या	१११, ११५, १२२, १८३	अष्टाकपालः	२७—४१

शब्दः	पृष्ठा
अष्टातयानि	१८५
असर्वपृष्ठाः	१७९
असर्वस्तोमाः	१७९
असुरयज्ञः	२५
अहुतात्	१२८
अहुतादः	१०४
आख्याता	१०१
आग्निवती	२७
आग्नीध्रः	४
आग्नेयः (निगदः)... ...	५
आग्नेयी	२७
आयणम्	४२
आयणस्थाली	१५१
आग्रहायणी	४३
आतपवर्म्मा: ... १८४, २००, २४५	
आत्रेयः	४
आदित्यस्थाली	१५१
आधवनीयः	१५१
आप्तोर्यामः	४२
आप्यायनम् १५४, १६०	
आप्रीणनम	८१
आप्लावनम्	५७
आमावास्यम्	४२
आरोहणम् १८९, १९०, २२५, २२९	
आश्वयुजी	४३
आश्विनी	३९
आसन्दी १५०, १८४, २००, २२९ २४५	

शब्दः	पृष्ठा
आस्तरणम्	१८४
आहवनीयः ५६, २७६	
आहिताग्निः ... ९—१३, ३५	
इडापात्री	२४९
इन्द्रनिहवः	१६८
इन्द्राभिमन्त्रणम्	२२८
इन्द्राभिषेकः	२२९
इन्द्राभ्युत्क्रीणनम्	२२७
इष्टम्	१११
इष्टापूर्त्तम्	१११
उक्थम् (द्विविधं)... ...	१६७
उक्थ्यः	४२
उक्थ्यसंस्थः	१७९
उक्थ्यस्थाली	१५१
उग्रवत्सहस्रत्	१७१
उत्सर्जनम्	८२
उदश्वनम्	५१
उदवसानीया १२१, १८३	
उदुम्बरशाखा १८४, २४५	
उद्गाता	४
उद्यान्	१६८
उद्वासनम्	१३, ५७
उन्नयनम्	२३
उन्नेता	४
उपगाता	४
उपचारहोमः	२७८

शब्दः	पृष्ठा
उपद्रष्टा	१२३
उपरवाः	१५०
उपला	१०५
उपवसथः	१०
उपवासः	४८
उपविगृह्यनम्	९
उपस्तीता	१२३
उपस्थम् (आसनं)	२०६
उपस्थानम् १०९, ११०, १२१, १२२	
उपाकरणम्	८१
उपाधिः	४३
उपावसृष्टा	१५
उभयसामा	१६६
उलूखलम्	१०५
उल्मुकमोचनम्	३२
ऊर्णापविचे	१५०
ऋक्प्रतिगरः	१००
एकविंशः (शौद्रः)	१८०
ऐकाहिकम्	१६५
ऐकाहिकाः	१७८
ऐन्द्रः	२२५
ऐन्द्री	२१४
ओजस्वत	१७१

शब्दः	पृष्ठा
ओजस्वत्यः	२००
औदुम्बरी १८४, २४५	
औपासनः (अग्निः) ...	२१४
कपालम्	१०५
करम्भः	२
कलिः	७५
कुहूः	५०
कूष्याः	२००
कृतम्	७६
कृष्णाजिनम्	१०५
क्षत्रायुधानि	१०५
क्षत्रिययज्ञः १७६, १७९	
क्षामवती	२९
क्षेमः	१९०
गाथा	६१
गाथाप्रतिगरः	१००
गार्हपत्यः ५६, २७६	
गृहपतिः	४
गृह्यः	२१४
गौरुल्ख्याः	२००
गौरिवीतं (सूक्तं)	१७१
ग्रहौक्थम्	१६७
ग्रावस्तुत्	४
ग्रावाणः	१५१
घृतम्	२००

शब्दः	पृष्ठा
चमसः	१८४
चमसाः (दश)	१५१, २५४
चमसाध्वर्यनम्	१५५
चमसासादनम्	१५८
चमसोन्नयनम्	१८०
चातुर्मास्यानि	४२, ४३
चैत्री	४३
ज्योतिष्टोमः	१८०, १८१
तनूमती	४०
तपस्वज्जनदत्पावकवती	३५
तीक्ष्णानि	१८४, २००
त्रयोदशकपालः	४१
त्रिवृत् (ब्रह्म)	१८०
त्रेता	७६
दर्शपूर्णमासौ	४३
दक्षपेयः	७८
दक्षापवित्रम्	१५१
दीक्षावेदनम्	१२४
दीक्षितः	१२४
दृषत्	१०५
देवपुरोहितः	२८२
देवयजनम्	१०८
देवयजनयाज्याः	१०८
देवसोमः	५१
द्रोणकलशः	१५०

शब्दः	पृष्ठा
द्वादशकपालः	३८
द्वापरः	७६
धानाः	२
धाय्या	१७१
धारायज्ञाः	१५०
ध्रुवस्थाली	१५१
ध्रुवा	१२७
नवान्नप्राशनम्	६५
नवेष्टिः	४२
नाराशंसचमसः	१५८
निगदः	४
नियोजनम्	८१
निरूढपशुबन्धः	४६
निर्देशः	६९
निविद्धानीयम्	१७५
निवेश्यः	२००
निष्कः	२५४
निष्कैवल्यम्	१७२
नेष्टा	४
पञ्चदशः (चमसः)	१८०
पञ्चमानवाः	२७१
पञ्चमेनिः	२७७, २७९
पत्नी	४
पथिकृती	६४
पयः	२००

शब्दः	पृष्ठा
पयस्या	२
परिप्लवा	१५१
परिमरः	२९३
परिवापः	२
पर्णेशरः	१२
पर्य्यग्निकरणम्	८१
पवमानः	१६
पवमानोक्थम्	१६७
पवित्रवती	३९
पशुबन्धः	४२
पशुयज्ञः	४२
पाकयज्ञसंस्थाः	४३
पाकयज्ञाः	४२
पात्नी	२४५, २४६
पादावनेजनम्	२८९
पादावनेजनी	२९०
पाद्यम्	२८९
पार्वणः	४३
पितृयज्ञः	४२
पिष्टपात्नी	२४६
पुनरभिषेकः	१८३
पुरोळाशः	२, २७
पुरोळाशपात्नी	२४६
पुरोधा	२७५
पुरोधातारः (त्रयः)	२८७
पुरोनुवाक्या	२७
पुरोहितः	२७६
पुरोहिताः (त्रयः)	२८७
पुरोहितायतम्	१२८
पूतभृत्	१५१
पूर्त्तम्	१११
पोता	४
पौर्णमास्यम्	४२
प्रतिगरिता	१०१
प्रतिपत् (राथन्तरी)	१६६
प्रतिपत् (बार्हती)	१७२
प्रतिप्रस्थाता	४
प्रतिवेशः	१५०
प्रतिहर्त्ता	४
प्रत्यभिमर्शः	१५५, १६०
प्रत्यवरोहणम्	२०५
प्रपदम्	२१४, २१७, २१९
प्रपदमन्त्रः	२१६, २१७, २१८
प्रप्लवनम्	५७
प्रस्तोता	४
प्रायश्चित्तिः	१३
प्लुषाः	२००
फलके	१५०
फलचमसः	१३२, १५३, १६०
फलचमसोन्नयनम्	१५३
बर्हम्	२६४, २६९
बलिः	४२
बृहत्पृष्ठः	१६६, १६७
बृहत्पृष्ठम्	१७२

शब्दः	पृष्ठा
ब्रह्मणः परिमरः ...	२९३
ब्रह्मणी द्वारः (षट्) ...	२९८
ब्रह्मभागप्राश्नम्	१२९
ब्रह्मा	४, १२८
ब्राह्मणः	१०४
ब्राह्मणायुधानि	१०५
ब्राह्मणस्त्यः (प्रगाथः) ...	१९८
ब्राह्मणाच्छंसी	४
भागप्राश्नम्	१२९
भारद्वाजम्	१७५
भिषक्	१२९
भंग्रनम्	२३
मधु	२००
मरीच्यः	२००
मरुत्वतीयः (प्रगाथः) ...	१९९
मरुत्वदिष्टिः	३४
महाभिषेकः २१५, २५५, २५९—२७३	
माध्यन्दिनपवमानः ...	१९९
मुसलम्	१०५
मेध्यः ९९, २५९—२९२, २९४, २९९	
मैत्रावरुणः	४
यजमानभागः	१२७, १२९
यजमानभागप्राश्नम् ...	१२९
यज्ञक्रतुः	७७
यज्ञगाथा	४२, २५९
यज्ञवेश्मसः	१२९
यज्ञायुधानि	१०५
यज्ञायुधी	१०९
याचनम् (यजुषा) ...	१०९
याज्या	२७
योगः	१९०
योगक्षेमः	१९०, २०८
राका	४९
राजन्यः	१०४
राजसूयः	७७
राथन्तरः (ऋतुचरः) ...	१९९
राथन्तरी (प्रतिपत्) ...	१९३
लोक्यम्	४९
वरः	२०९, २०७
वरुणेष्टिः	३९
वाजपेयः	४३
विकङ्कपम्	१२३
विविचीष्टिः	२८
विश्वसनम्	८१
विश्वापर्णम्	१२२
विष्टरः	२८८
वीतीष्टिः	२७
वृन्दम्	३९९
वृषाकपिः	२००
वैश्वन्यः	२००

शब्दः	पृष्ठा
वैश्याः	१७४
वैश्वानरेष्टिः	३८
वेणवारुणी	२२
व्यापन्नानि	२१
व्याहृतयः	१९५
व्रतपतीष्टिः	३४
व्रतप्रदः	४
व्रतभृदिष्टिः	३४
व्रत्यानि	३
शपथः	२३९, २७२
शमिता	४
शम्या	१०५
शस्त्राणि (द्वादश) ...	३, १८१
शान्तिवाचनम् ...	२०२
शापनम्	२३८
शासं (सूक्तं) ...	२१२
शुचीष्टिः	३१
शूद्रः	१०५
शूर्पम्	१०५
शौद्रन्यायः	९१
शौनःशेपम्	९९
श्राद्धम्	४३
श्रावणी	४३
श्लोकः ...	२६२, २६४, २६९
श्वःसुत्या (निगदः) ...	५
षोडशिमान्	४३

शब्दः	पृष्ठा
षोड़शी	४३
संवर्गेष्टिः	४१
संस्था	८८
सदस्यः	४
सप्तदशः (विशः) ...	१८०
समारोपणम्	३२
समिदाधानम्	२०७
समिष्टयजूंषि ...	१११, ११५, १२२
सम्प्रत्तिः	६२
सम्भाराः ...	१८४, २४१, २४५
सवनीयपशुः	३, ८१
साम्नाय्यम्	१०, १७
सामप्रगाथः	१७४
सारस्वत्यः	२००
सिनीवाली	५०
सुत्याः	४३
सुत्यादिनानि	३
सुब्रह्मण्या	४
सुरभिमदिष्टिः ...	४०
सुराकंसम	२०२, २५४
सुराभिमन्त्रणम ...	२५६
सूर्यत्वचसः	२००
सोमपीथः १३३, १३६, १४५, २५५	
सोमसंस्थाः	४३
सौत्रामणी	४३
सौपर्णं (सूक्तं) ...	२१२
स्खलनम्	२३

शब्द:	पृष्ठा
स्तुतशस्त्राणि (विंशत्) ...	१७९, १८०
स्तोत्राणि (द्वादश) ...	१८१
स्तोमा: (षट्) ...	१७८
स्थाली	१५१
स्थालीपाक:	४२
स्फ्य:	१०५
स्यन्दमाना:	२००
स्रुक्	२४
हविर्यज्ञसंस्था:	४३

शब्द:	पृष्ठा
हविर्यज्ञा:	४२
हिरण्यकशिपु:	१००
हिरण्यवर्दिटि:	३९
हुतात्	१२८
हुताद:	१०४
होता	४
होतु: शस्त्राणि (षट्) ...	३
होत्रका:	३
होत्रकाणां शस्त्राणि (षट्)	३
होत्रा:	१०८

॥ अथेहालोच्यस्थानसूची ॥

पृ०	पं०	पृ०	पं०	पृ०	पं०	पृ०	पं०	पृ०	पं०
२	२	२	९	९	२०	२०	९	३०	२०
४४	१०	४८	२	५१	१७	५२	१६	५९	५
५९	१८	५९	१९	६०	१	७२	११	७२	१८
७३	११	८६	१६	८७	७	८७	११	८७	१२
९४	९	९४	११	१०३	५	१०३	११	१०३	१२
११६	८	१२४	५	१३१	५	१३२	१९	१३७	१८
१३७	२१	१३८	५	१३८	११	१४१	२	१५३	५
१५८	६	१८२	९	१८७	१३	१९९	२क	१९९	३ख
१९९	१६	२०९	९	२१६	१	२२४	१६	२३०	१५
२३१	१	२३१	७	२३१	१३	२३१	२०	२३७	९
२४५	६	२५१	१	२५२	११	२५२	१२	२५२	१४
२५२	१५	२५३	२	२५३	१०	२५३	११	२५३	११
२५६	२२	२५८	१३	२५९	६	२६१	१७	२६४	२३
२६५	१३	२६८	५	२६८	१०	२६९	१३	२६९	१५
२७०	१४	२७०	१५	२७४	५	२७४	१७	२७५	९
२७८	१९	२८५	१८	२९०	१०	— २९२	१८		

१ *

॥ अथैतरेयविषयसूची ॥

—ooo—

१ अग्निष्टोमयज्ञः (ज्योतिष्टोमीयैकाहविशेषः) १भा० १२पृ०—२भा० २३५पृ०
२ उक्थ्यक्रतुः (ज्योतिष्टोमीयैकाहविशेषः) २भा० २३५—२४३ पृ० ।
३ षोड़शिप्रयोगः (ज्योतिष्टोमीयैकाहविशेषः) २भा० २४५—२६६ पृ० ।
४ अतिरात्रक्रतुः (ज्योतिष्टोमीयैकाहविशेषः) २भा० २६६—३०४ पृ० ।
५ गवामयनसत्रम् (संवत्सरसत्रविशेषः) २ भा० ३०४—३६५ पृ० ।
६ आदित्यानामयनसत्रम्
७ अङ्गिरसामयनसत्रम् } (संवत्सरसत्रविशेषौ) २भा० ३३०—३३३पृ० ।
८ भरतद्वादशाहयागः
९ यूढद्वादशाहयागः } (अहीनविशेषौ सत्रविशेषौ च) २भा० ३६६ पृ०—३भा० १६२ पृ० ।
१० अग्निहोत्रयागः (हौत्रविशेषः) ३भा० १६३—१६५,४भा० ४४—५८ पृ० ॥
प्रकीर्णकम् ... ... ३भा० १६५पृ०—४भा० ८ पृ० ।
आहिताग्नेः प्रायश्चित्तानि ४भा० ६—४४ पृ० ।
प्रौनःशेपाध्यायः ... ... ४ भा० ५६—१०२ पृ० ।
११ राजसूयक्रतुः (सोमयागविशेषः) ४भा० १०३—२७३ पृ० ।
सर्वयज्ञसाधारणविधयः ... ४भा० २७४—२६० पृ० ।
ब्रह्मणः परिमरः ... ... ४भा० २६१—३०० पृ० ।

तदत्र ब्राह्मणे एकादश यज्ञा विहिता इति सङ्क्षेपः ।

———

* इत आरभ्य सप्तविधसूचीपत्राणि चतुर्भागाणामेव वेदितव्यानि ।

२

॥ अथ सभाष्यैतरेयविषयसूची ॥

॥ प्रथमभागस्य ॥

सायणभाष्यभूमिकारम्भः १
वेदलक्षणं तन्निर्वचनादिकञ्च १
स्त्रीशूद्रद्विजबन्धूनां वेदानधिकारित्वम् २
वेदस्यापौरुषेयत्वनिरूपणम् ३
वेदार्थाधिगमस्याप्यावश्यकत्वनिर्णयः ४
वेदार्थानुष्ठानज्ञानयोः फलतारतम्यम् ४
भूतार्थवादस्य स्वार्थेऽपि प्रामाण्यम् ५
वेदस्य भागद्वयकथनम् ६
ब्राह्मणग्रन्थलक्षणनिर्णयाधिकरणम् ६
ऐतरेयनामनिर्वचनादिकम् ७
ऐतरेयब्राह्मणस्य प्रधानतो विषयनिर्णयः ८
सोमयागेषु ज्योतिष्टोमस्य प्राधान्यम् ८
अग्निष्टोमस्य प्रकृतित्वकथनम् ९
उक्थादीनां विकृतित्वकथनम् ९
ऋत्विग्वरणस्यादौ वक्तव्यत्वेऽप्यहौचत्वम् १०
ऋग्वेदस्य हौचत्वनिर्णयाधिकरणम् १०
इष्टिगतयोरपि याज्यानुवाक्ययोर्हौत्रत्वकथनम् ... ११

॥ प्रथमपञ्चिकायाः प्रथमाध्यायारम्भः १२ पृ० ॥

प्रथमा मिष्टिं विधातु मग्नेर्विष्णोश्च प्रशंसा ... १३
द्वादशसु शस्त्रेषु आज्यशस्त्रस्य प्राथम्यम् ... १३

दादशसु शस्त्रेषु आग्निमारुतशस्त्रस्यान्तिमत्वम्	...	१४
दीक्षणीयेष्टेर्विधानम् ...	...	१५
अग्नाविष्णवोः प्रथमोत्तमत्वात् मध्यदेवताना मप्युपलक्षकत्वम्		१६
अग्नाविष्णवोः सर्वदेवतात्मकत्वम्	... ...	१७
आग्नावैष्णवयोः पुरोडाशयोः यज्ञस्यादयन्तावयवत्वम्	...	१७
आग्नावैष्णवयोः पुरोडाशयोः ब्रह्मवादित्वोद्यम्	... ...	१८
दीक्षणीयेष्टौ प्रतिष्ठाकामस्य द्रव्यान्तरविधानम्	...	१९
... घृतचरुणा अप्रतिष्ठादोषपरिहारकथनम्	...	२०
... घृतचरोः प्रतिष्ठाहेतुत्ववेदनप्रशंसनम्	...	२०
... कालविधानम्	... ...	२१
... सप्तदशसामिधेनीविधानम्	... ...	२३
इष्टिसोमयोः पौर्वापर्याभावनिर्णयाधिकरणम्	...	२५
विप्रस्य सोमपूर्वत्वनियमाभावनिर्णयाधिकरणम्	...	२५
सामधेनीनां सङ्ख्याविकल्पाभाव निर्णयाधिकरणम्	...	२६
वैश्यस्य सामिधेनीसङ्ख्यानिर्णयाधिकरणम्	... ...	२७
प्रकृतौ गोदोहननिर्णयाधिकरणम्	... ...	२७
वैष्टधादौ सामिधेनीकर्मनिर्णयाधिकरणम्	....	२८
इष्टिशब्दस्य निर्वचनादिकम्	... ...	३०
आहूतिशब्दस्य निर्वचनादिकम्	... ...	३०
ऊतिशब्दस्य निर्वचनादिकम्	... ...	३०
होत्रशब्दस्य निर्वचनादिकम्	... ...	३१
दीक्षितस्य गर्भसाम्यत्वेन संस्कार्यत्वकथनम्	...	३४
... अद्भिरभिषेचनसंस्कारः	... ...	३४
... नवनीतेनाभ्यञ्जनसंस्कारः	... ...	३५
... नेत्रयोरञ्जनसंस्कारः	... ...	३५
... दर्भपिञ्जूलैः प्रावनसंस्कारः	... ...	३६
... प्राचीनवंशाख्यशालाप्रवेशविधिः	...	३७
... देवयजने उपवेशनसञ्चरणयोर्विधिः	...	३७

दीक्षितस्य देवयजनाद् बहिर्गमननिषेधः ... ३७
वासःपरिधानसंस्कारः ३८
कृष्णाजिनाच्छादनसंस्कारः ३८
मुष्टीकरणसंस्कारः ३८
मुष्टिद्वयप्रशंसनम् ३९
अवभृथगमनात् प्राक् कृष्णाजिनोन्मोचनम् ... ४०
कृष्णाजिनोन्मोचनकाले वासस उन्मोचननिषेधः ... ४०
दण्डादीनां संस्कारहेतुत्वाभावनिर्णयाधिकरणम् ... ४१
दीक्षणीयेष्टौ प्रथमस्याज्यभागस्य पुरोनुवाक्या ४२
द्वितीयस्याज्यभागस्य पुरोनुवाक्या ४२
ईजानस्य प्रथमद्वितीयाज्यभागयोः पुरोनुवाक्याद्वयम् ... ४३
प्रथमद्वितीयाज्यभागयोरन्यत्पुरोनुवाक्याद्वयम् ... ४४
प्रधानहविषि याज्यानुवाक्याविधानम् ४४
याज्यानुवाक्ययोरनुवाक्याया एव प्राथम्यम् ... ४५
यज्ञस्य रूपसन्दृब्धत्वोपदेशः ४५
अग्नेर्विष्णोश्च दीक्षापालत्वेन प्रशंसनम् ४६
त्रिष्टुप्छन्दस इन्द्रियसाधनत्वेन प्रशंसा ४६
याज्यानुवाक्ययोः समुच्चयनिर्णयाधिकरणम् ४७
खिष्टकृद्यागे गायत्रीच्छन्दस्कयोर्याज्यानुवाक्ययोर्विधानम् ... ४८
आयुष्कामस्योष्णिक्छन्दस्कयोर्विधानम् ... ४९
स्वर्गकामस्यानुष्टुप्छन्दस्कयोर्विधानम् ५०
श्रीकामस्य बृहतीच्छन्दस्कयोर्विधानम् ५०
यज्ञकामस्य पङ्क्तिच्छन्दस्कयोर्विधानम् ५१
वीर्यकामस्य त्रिष्टुप्छन्दस्कयोर्विधानम् ५१
पशुकामस्य जगतीच्छन्दस्कयोर्विधानम् ५२
अन्नकामस्य विराड्छन्दस्कयोर्विधानम् ५२
विराड्छन्दसः पञ्चवीर्यत्वेन प्रशंसा ५४
विराड्छन्दस्कयोः संयाज्ययोर्नित्यत्वेन विधानम् ... ५५

दादशसु शस्त्रेषु आग्निमारुतशस्त्रस्यान्तिमत्वम्	...	१४
दीक्षणीयेष्टेर्विधानम् ...	...	१५
अग्नाविष्णवोः प्रथमोत्तमत्वात् मध्यदेवताना मप्युपलक्षकत्वम्		१६
अग्नाविष्णवोः सर्वदेवतात्मकत्वम् ...	...	१७
आग्नावैष्णवयोः पुरोडाशयोः यज्ञस्याद्यन्तावयवत्वम्	...	१७
आग्नावैष्णवयोः पुरोडाशयोः ब्रह्मवादिचोद्यम् ...	...	१८
दीक्षणीयेष्टौ प्रतिष्ठाकामस्य द्रव्यान्तरविधानम्	...	१९
... घृतचरूणा अप्रतिष्ठादोषपरिहारकथनम्	...	२०
... घृतचरोः प्रतिष्ठाहेतुत्ववेदनप्रशंसनम्	...	२०
... कालविधानम् ...	...	२१
... सप्तदशसामिधेनीविधानम् ...	...	२३
इष्टिसोमयोः पौर्वापर्याभावनिर्णयाधिकरणम्	...	२५
विप्रस्य सोमपूर्वत्वनियमाभावनिर्णयाधिकरणम्	...	२५
सामधेनीनां सङ्ख्याविकल्पाभाव निर्णयाधिकरणम्	...	२६
वैश्यस्य सामिधेनीसङ्ख्यानिर्णयाधिकरणम् ...	...	२७
प्रकृतौ गोदोहननिर्णयाधिकरणम् ...	...	२७
वैष्टधादौ सामिधेनीकर्मनिर्णयाधिकरणम् ...	...	२८
इष्टिशब्दस्य निर्वचनादिकम् ...	...	३०
आहूतिशब्दस्य निर्वचनादिकम् ...	...	३०
ऊतिशब्दस्य निर्वचनादिकम् ...	...	३०
हौत्रशब्दस्य निर्वचनादिकम् ...	...	३१
दीक्षितस्य गर्भसाम्यत्वेन संस्कार्यत्वकथनम्	...	३४
... अद्भिरभिषेचनसंस्कारः ...	...	३४
... नवनीतेनाभ्यञ्जनसंस्कारः ...	...	३५
... नेत्रयोरञ्जनसंस्कारः ...	...	३५
... दर्भपिञ्जूलैः प्रावनसंस्कारः ...	...	३६
... प्राचीनवंशाख्यशालाप्रवेशविधिः	...	३७
... देवयजने उपवेशनसञ्चरणयोर्विधिः	...	३७

दीक्षितस्य सत्यवदनविधानम् ५६
सत्यवदनमन्त्रः ५६
चक्षुर्दृष्टस्यैव सत्यत्वम् ५७
विचक्षणशब्दस्य चक्षुःपर्यायत्वम् ५८

॥ प्रथमपञ्चिकायाः द्वितीयाध्यायारम्भः ६० पृ० ॥

प्रायणीयशब्दार्थनिर्णयः ६१
प्रायणीयोदनीययोरिष्ट्योः प्रशंसा ६२
आख्यायिका— प्रायणीयेष्टौ देवताविशेषविधानार्था ... ६२
प्रायणीयेष्टौ पुरःस्थायिन्याः पथ्यादेवताया यागविधिः ... ६४
दक्षिणदिग्वर्त्तिनोऽग्नेर्यागविधिः ... ६५
पश्चिमदिग्यवस्थितस्य सोमस्य यागविधिः ... ६५
उत्तरदिग्यवस्थितस्य सवितुर्यागविधिः ... ६६
ऊर्द्ध्वदिग्वर्त्तिन्या अदितेर्यागविधिः ६६
पथ्यादीना माज्येन यागोऽदितेस्तु चरुणा ... ६६
पञ्चदेवतायजनेनैव यज्ञस्य पाङ्क्तत्वम् ... ६७
पञ्चप्रयाजानां प्रकृतावनुष्ठानप्रकारः ६९
प्रायणीयेष्टौ प्रयाजाहुतौ तेजोब्रह्मवचसकामस्य प्रागपवर्गत्वम् ६९
— अन्नाद्यकामस्य दक्षिणापवर्गत्वम् ... ७०
— पशुकामस्य प्रत्यगपवर्गत्वम् ... ७०
— यज्ञकामस्य उत्तरापवर्गत्वम् ... ७१
— स्वर्गकामस्य ऊर्द्ध्वापवर्गत्वम् ... ७१
वाक्सम्पादकत्वेन पथ्यायागस्य प्रशंसा ... ७१
प्राणापानसम्पादकत्वेनाग्नीषोमयोः प्रशंसा ... ७२
प्रेरकत्वेन सवितृदेवतायाः प्रशंसा ७२, ७३
प्रतिष्ठाहेतुत्वेनादितेः प्रशंसा ७२, ७३
चक्षुःस्वरूपत्वेन अग्नीषोमयोः प्रशंसा ... ७३

प्रायणीयेष्टौ प्रसङ्गतः सर्वदेवतानां जातिनिरूपणम् ... ७५
प्रथमदेवतायाः पथ्यायाः पुरोनुवाक्या ... ७७
पथ्यादीनां पञ्चानां देवतानां क्रमेण याज्यानुवाक्ये ७८
पथ्यादीनां पञ्चानां देवतानां क्रमेण संयाज्ये ... ८०
शाखान्तरीयस्यानुयाजवर्जनस्याशङ्का ... ८५
प्रयाजवदनुयाजवत् कर्त्तव्य मिति विधिः ... ८६
पत्नीसंयाजानां समिष्टयजुषश्च निषेधः ... ८६
निष्कासस्थापनविधिः ८७
उदयनीयेष्टौ याज्यानुवाक्यानां व्यत्यासविधिः ८८
प्रायणीयेष्टौ विहितस्यादित्यस्य चरोः प्रशंसा ८९
विहितायाः प्रथमायाः पथ्यादेवताया उदयनीयेष्टौ उत्तमात्वविधानम् ९०
मीमांसा— निष्कासस्योदयनीयसंस्कारनिर्णयाधिकरणम् ... ९१

...
...
...

॥ प्रथमपञ्चिकायास्तृतीयाध्यायारम्भः ९२ पृ० ॥

सोमक्रयस्य दिङ्निरूपणम् ९३
प्राचीनवंशं नीयमाने सोमे पठितव्यानामृचामृत्वादृत्सङ्घायः प्रशंसा ९४
प्रैषमन्त्रः— सोमप्रवहणीनाम् ९८
सोमप्रवहणीना मृचां विधानम् ९८
पुण्यकर्मकरणकालेऽपि पापसम्भवहेतुनिरूपणम् ... १०१
अनन्यचित्तस्यैव मन्त्रादिपाठविधिः १०१
व्यग्रतयानुष्ठानस्य निषेधः १०१
वारुण्या सोमप्रवहणीपाठसमापनस्य हेतुकथनम् ... १०५
सोमस्य शकटादवरोहणविधिः १०८
आख्यायिका— सोमोपावहरणस्य दिग्विधानार्था ... १०९
सोमस्य जयहेतुत्वकथनम् ११०
अर्थवादेन विधेयाना मुन्नयनप्रकारोपदेशः १११

आतिथ्येष्टेः विधानं कालनिर्णयश्च ११२
नवकपालहविर्द्रव्याणां विधानम् ११३
विष्णुदैवतत्वविधानम् ११३
स्वरूपकथनं नामहेतुश्च ११३, ११५
याज्यानुवाक्ये ११४
शाखान्तरीयनिर्वापमन्त्रप्रशंसा ११४
अग्निमन्थनविधानम् ११५
अर्हणीयागते गोहिंसनस्य युगान्तरधर्म्मतेति व्यवस्था ... ११५
मीमांसा— वैष्णवधर्मानतिदेशनिर्णयाधिकरणम् ... ११६
प्रैषमन्त्रः— अग्निमन्थनीयानाम् ११६
आतिथ्येष्टौ अग्निमन्थनीयानां त्रयोदशानां विधानम् ... ११६
अग्निमन्थने रज्जोहननानां नवानां विधानम् ... १२१
ब्राह्मणग्रन्थविहिताया एवाहुतेः स्वर्ग्याहुतित्वनिरूपणम् ... १२६
अब्राह्मणपरिचयः (स्मृत्युक्तः) १२६
आतिथ्येष्टौ आज्यभागयोः पुरोनुवाक्याद्वयविधिः १३२
— याज्याद्वयविधानम् १३३
प्रधानहविषोः याज्यानुवाक्याविधानम् ... १३३
संयाज्ययोर्विधानम् १३४
इड़ाभक्षणादूर्द्धं कर्त्तव्यानां निवारणम् ... १३४
इड़ाभक्षणस्य द्वैविध्यवर्णनम् १३४
प्रयाजानुयाजानां प्रकृष्टत्वापकृष्टत्ववर्णनम् १३५
आतिथ्येष्टौ अनुयाजानां निषेधः १३४
दोलिकावहनदृष्टान्तेन अनुयाजाना मभावेऽपि दोषाभावनिरूपणम् १३६
मीमांसा— प्रायणीयातिथ्ययोः प्रंयिड़ान्तताधिकरणम् ... १३७
— — परप्रंयिड़ान्ततानिर्णयाधिकरणम् १३८
नित्यानुवादलक्षणम् १३७
विकल्पेऽष्टौ दोषाः, परिसङ्ख्यायां त्रयो दोषाश्चेति कथनम् ... १३८

॥ प्रथमपञ्चिकायाश्चतुर्थाध्यायारम्भः १४० पृ० ॥

आख्यायिका— प्रवर्ग्यप्रकरणारम्भार्थिका १४०
प्रवर्ग्यस्य साधनानां सम्पादनविधिः १४१
प्रैषमन्त्राः— प्रवर्ग्याभिष्टवमन्त्राणाम् १४२
प्रवर्ग्यस्य अनुज्ञापनमन्त्रः १४२
अभिष्टवस्य (२१) एकविंशत्यृचां विधानम् ... १४४
— (१३) त्रयोदशर्चां विधानम् ... १४७
— (७६) षट्सप्तत्यृचां विधानम् ... १५१
— पूर्वपटलसमाप्तिकारिका ... १५७
— उत्तरपटलारम्भकथनम् ... १५८
— (२१) पुनरेकविंशत्यृचां विधानम् ... १६०
— पटलद्वयकरणतात्पर्यकथनम् ... १५७
षड्भिर्मन्त्रैरनूत्थानादीनां षण्णां कर्मणां विधानम् १६२
अपराह्णेऽपि याज्यामन्त्रद्वयविधिः १६३
अनुवषट्कारमन्त्रः तद्विधानञ्च १६२
प्रवर्ग्यस्य शाखान्तरप्रसिद्धो ब्रह्मजपमन्त्रः १६३
होमादूर्ध्वं होत्रा पठनीयानां सप्तर्चां विधिः ... १६३
सोम-घर्म-वाजिनानां खिष्टकृत्यवदाननिषेधः १६३
प्रवर्ग्यस्य हविःप्रेषभक्षणे होतुः प्रतीक्षा १६४
पात्राणां संसादने होतुर्मन्त्रद्वयम् १६५
उत्तमदिनेऽपराह्णे समधिकाना ऋचां पाठविधिः ... १६५
अभिष्टवस्य समाप्तिमन्त्रविधिः १६५
देवमिथुनरूपेण प्रशंसा १६५
उक्तार्थवेदनस्य तद्दानपूर्वकानुष्ठानस्य च प्रशंसा ... १६७
आख्यायिका— उपसदिष्टिविधानार्था १६६
उपसत्सु प्रधानमन्त्रत्रयाणां विधानम् १७१
मन्त्रत्रयाष्टत्या द्वादशयागनिर्वृत्त्युपदेशः ... १७२

यागविशेषेषु उपसन्मन्त्रसङ्ख्यापार्थक्यम्	१७३
सन्ध्याकालोऽसुराणा मधिकृत:	१७३
मीमांसा— उपसदा मावर्त्तनीयत्वनिर्णयाधिकरणम् ...	१७५
उपसदां विजयहेतुत्वेन प्रशंसा	१७६
तानूनप्त्रस्य विधानार्थिकाया आख्यायिकाया आरम्भ: ...	१७६
नाम्नो निर्वचनम्.	१७८
परस्परद्रोहनिषेध:	१७६
उपसङ्ख्या: पूर्व मनुष्ठेयत्वम्	१७६
आतिथ्येष्टावास्तीर्णस्यैव बर्हिष उपसत्स्वनुवृत्तिविधानम् ...	१८१
उपसत्सु द्रव्यदेवतयो: प्रस्ताव:	१८२
द्रव्यदेवतयोर्विधानम्	१८२
अङ्गभूतस्य व्रतोपायनस्य विधि:	१८३
पृथिव्यन्तानां सप्तलोकानां क्रमात् क्षुद्रतरत्वम् ...	१८३
पूर्वापराह्णयो: सामधेनीनां विधानम् ...	१८४
याज्यापुरोनुवाक्यानां विधानम्	१८४
उपसदा माज्यहविष्कत्वेन प्रशंसनम्	१८५
मीमांसा— आतिथ्योपसदग्नीषोमीयबर्हिष एकत्वनिर्णयाधिकरणम्	१८७
आतिथ्योपसदग्नीषोमीयपरिचय:	१८६
मीमांसा— तद्बर्हिष आतिथ्य एव प्रोक्षणादिनिर्णयाधिकरणम्	१८७
उपसत्सु प्रयाजानुयाजनिषेध:	१८६
आश्रावणविधि:	१८६
आप्यायनविधि: (सोमस्य)	१६०
तानूनप्त्रस्य क्रूरकर्मत्वकथनम्	१६०
निह्नवविधि: (सोमस्य)	१६१
मीमांसा— उपसत्सु प्रयाजादिनिषेधस्यानुवादत्वनिर्णयाधिकरणम्	१६२

॥ प्रथमपञ्चिकायाः पञ्चमाध्यायारम्भः १९५ पृ० ॥

आख्यायिका— सोमक्रयविधानार्था १९९
सोमक्रयस्य विधानम् १९७
मन्त्राणां मन्द्रध्वनिविधानम् १९८
मीमांसा— द्रव्याणां समुच्चयत्वनिर्णयाधिकरणम् ... १९८
प्रैषमन्त्रः— अग्निप्रणयनीयाना ऋचाम् २०२
अग्निप्रणयनीयानां प्रथमर्ग्-विधानम् ब्राह्मणस्य ... २०२
प्रथमर्ग्-विधानम् क्षत्रियस्य २०३
प्रथमर्ग्-विधानम् वैश्यस्य २०४
द्वितीयादीनां सप्ताना ऋचां विधानारम्भः ... २०४
आद्यन्तयोस्त्रिरावृत्त्या द्वादशत्वापादनविधिः २११
प्रैषमन्त्रः— हविर्द्धानप्रवर्त्तनीयाना ऋचाम् २१४
हविर्द्धानप्रवर्त्तनीयाना सप्ताना ऋचां विधानारम्भः ... २१४
सप्तमर्ग्-पाठकाले रराटीचरणविधिः ... २१८
समापनाय अष्टमर्चः पाठकालस्य विधिः ... २१९
आद्यन्तयोस्त्रिरावृत्त्या द्वादशत्वापादनविधिः ... २२०
हविर्द्धानयोः यजुषैव सम्परिस्रयणविधिः २१९
मेथीनिहननविधिः २१९
इषानिहननविधिः २२०
दक्षिणे कृष्णाजिनस्यास्तरणविधिः ... २२०
द्वयोश्छदिषोरुपरि तृतीयस्य छदिषोऽवस्थापनविधिः ... २१९
प्रैषमन्त्रः— अग्नीषोमप्रणयनीयाना ऋचाम् २२३
अग्नीषोमप्रणयनीयानां सप्तदशाना ऋचां विधानम् ... २२४
नैमित्तिकपरिधानीयाया विधिः ... २३०
आद्यन्तयोरावृत्त्यैकविंशत्वापादनविधिः २३०
प्रजापतेरेकविंशावयवपरिगणनम् २३०
आदित्यप्रशंसा २३१

॥ द्वितीयपञ्चिकायाः प्रथमाध्यायारम्भः २३३ पृ० ॥

आख्यायिका— अग्नीषोमीयपशुविधानार्था २३५
अग्नीषोमीयपशोः यूपविधानम् २३५
यूपस्य निखननविधिः २३६
आश्रयणे याज्ञिकप्रसिद्धिकथनम् २४४
अष्टाश्रित्वविधिः २३६
खादिरत्वविधिः स्वर्गकामस्य २३७
वैल्वत्वविधिरन्नाद्यकामस्य पुष्टिकामस्य च ... २३८
पालाशत्वविधिस्तेजस्कामस्य ब्रह्मवर्चसकामस्य च २३८
अञ्जनप्रकारोपदेशः २४२
प्रैषमन्त्रः— यूपाञ्जनानुवचनीयाना मृचाम् २४२
तत्र वैकल्पविधिः २४२
यूपाञ्जनानुवचनीयानां सप्ताना मृचां विधानारम्भः ... २४२
आद्यन्तयोराष्टत्वैकादशत्वापादनविधिः २४६
मीमांसा— यूपस्य हौत्राध्वर्यवमन्त्रयोः समुच्चयत्वनिर्णयाधिकरणम् २४६
उच्छ्रयणादिकर्मणा मेकत्वनिर्णयाधिकरणम् ... २५०
यूपस्य उच्छ्रयणप्रकारोपदेशः २४३
अनुप्रहरणे विचारः २५२
अनुप्रहरणनिषेधः पशुकामस्य २५२
अनुप्रहरणविधिः स्वर्गकामस्य २५३
प्रस्तरस्य च यजमानत्वोपचारः २५४
अनुप्रहरणस्य प्रतिनिधिकथनम् २५४
स्वरुप्रहरणप्रकारोपदेशः २५५
अग्नीषोमीयस्य पशोः आलम्भनविधिः २५५
— स्वरूपनिर्णयः २५५
— प्रैषभक्षणे विचारः २५६
— यजमानस्वरूपत्वेन भक्षणनिषेधः ... २५६

अग्नीषोमीयस्य पशोः लिपाभक्षणयोर्विधिः २५७
— एकादशप्रयाजानां विधिः ... २६१
मीमांसा— 'यजमानः प्रस्तरः'-इत्यादेर्गौणत्वनिर्णयाधिकरणम् २५८
स्वरुच्छेदनप्रयोजकत्वाभावनिर्णयाधिकरणम् ... २५९
अग्नीषोमीयस्य पशोः प्रथमप्रयाजयाज्याविधिः ... २६२
— प्रयाजदेवतापरिगणनम् ... २६३
— द्वितीयप्रयाजयाज्याद्वयविधिः ... २६३
— तृतीयप्रयाजयाज्याविधिः ... २६३
— चतुर्थप्रयाजयाज्याविधिः ... २६४
— पञ्चमप्रयाजयाज्याविधिः ... २६४
— षष्ठप्रयाजयाज्याविधिः ... २६४
— सप्तमप्रयाजयाज्याविधिः ... २६५
— अष्टमप्रयाजयाज्याविधिः ... २६५
— नवमप्रयाजयाज्याविधिः ... २६५
— दशमप्रयाजयाज्याविधिः ... २६५
— एकादशप्रयाजयाज्याविधि ... २६६
— प्रयाजानां यथर्त्विग्व्यवस्था ... २६६
प्रैषमन्त्रः— पर्यग्निकरणानां तिसृणा मृचाम् २६८
पर्यग्निकरणास्तिस्र ऋचो मैत्रावरुणस्य २६८
प्रैषमन्त्रः— मैत्रावरुणं प्रत्यध्वर्योः २६९
उपप्रैषमन्त्रः— होतारं प्रति मैत्रावरुणस्य २७०
अन्यमनस्कस्य यज्ञीयवाक्-प्रयोग-निषेधः २७०
अनन्यमनस्कस्यैव यज्ञीयहव्यादिसम्पादनविधिः ... २७०
प्रैषमन्त्रः— अध्रिगुं प्रति होतुः २७३
शाखान्तरीयस्याध्रिगुप्रैषस्य पूर्वार्द्धस्य व्याख्यानारम्भः ... २७३
शाखान्तरीयस्याध्रिगुप्रैषस्यापरार्द्धस्य व्याख्यानारम्भः ... २८६
अध्रिगुप्रैषे श्रुतस्य मेधपतिशब्दस्य एक-द्वि-बहु-देवताकप्रयोगेषु
एक-द्वि-बहु-वचनान्ततया प्रयोज्यत्वविधिः ... २७३

संज्ञप्यमानस्य पशोः पुरस्तादग्निहरणम् २७५
— अधस्ताद् बर्हिःस्तरणम् २७५
— माचाद्यनुज्ञाया ग्रहणम् २७५
— पदा सुदीचीनत्वकरणम् २७६
— प्राणादीनां प्रेरणम् २७६
— त्वक्छेदनप्रकारोपदेशः ... २७६
— वपाःप्रभृत्यङ्गानां परिचयः ... २७६
— पुरीषगूहनस्थानखननम् ... २७७
मी० द्विपश्वादिपशुविकृतौ मेधपतिशब्दस्य देवतानुसारेणोहाधिकरणम् २७७
मी० बहुदेवत्यपशावपि एकवचनान्त-मेधपतिशब्दस्य विवक्ष्याधिकरणम् २७९
मी० एकादशिन्या मेकवचनान्त-मेधपतिशब्दस्योहाधिकरणम् २८०
मी० द्विपशुयागे सूर्यं चक्षुर्गमयतादितिमन्त्राणा मनूहाधिकरणम् २८१
मी० द्विपशुयागेऽध्वर्युप्रैषे एकधेत्यस्य शब्दस्याभ्यासाधिकरणम् २८१
मी० 'श्येन मस्यवक्षः'-इत्यादौ श्येनादिशब्दानां कार्त्स्न्यवचनाधिकरणम् २८२
मी० 'प्रशंसा वाहू'-इत्यत्र प्रशंसाशब्दस्य प्रशंसापरत्वाधिकरणम् २८२
मी० 'षड्विंशतिरस्य वङ्क्रयः'-इत्यादौ पदान्तरोहाधिकरणम् २८३
अध्वर्युप्रैषमन्त्रस्य प्रथमभागस्य व्याख्यानम् २७३
द्वितीयभागस्य व्याख्यानम् २७३
तृतीयभागस्य व्याख्यानम् २७४
चतुर्थभागस्य व्याख्यानम् २७५
पञ्चमभागस्य व्याख्यानम् २७५
षष्ठभागस्य व्याख्यानम् २७५
सप्तमभागस्य व्याख्यानम् २७६
अष्टमभागस्य व्याख्यानम् २७६
नवमभागस्य व्याख्यानम् २७७
दशमभागस्य व्याख्यानम् २८६
एकादशभागस्य व्याख्यानम् २९०
द्वादशभागस्य व्याख्यानम् २९१

अध्वर्युप्रैषमन्त्रपाठानन्तरं जपविधिस्तन्मन्त्राश्च ... २६२
मीमांसा— अग्नीषोमीयपशावुरुक्तशब्देन वपाभिधानाधिकरणम् २६३
आख्यायिका— पशुपुरोडाशविधानार्था २६५
पशुपुरोडाशस्य विधानम् २६७
पुरुषाश्वगोऽजवीह्रीणां यज्ञीयपशुत्वम्, तत्रापि अजस्य प्राशस्त्यम् २६६
किम्पुरुषगौरगवयोष्ट्रशरभाणां मयज्ञीयपशुत्वान्याख्यानम् २६७
मीमांसा— पशुपुरोडाशस्य देवतासंस्कारकताधिकरणम् २६८
अग्नीषोमीयप्रयाजादिभिः पुरोडाशस्योपकाराधिकरणम् २६६
पशुपुरोडाशयागस्य प्रशंसा ३०१
वपायाज्ययोर्विधानम् ३०२
याज्याया विधानम् ३०३
स्विष्टकद्याज्याया विधानम् ... ३०४
इड़ोपह्वानस्य विधानम् ३०४
प्रैषमन्त्रः— हृदयाद्यङ्गावदानसूक्तविधौ ३०६
हृदयाद्यङ्गावदानस्य सूक्तविधानम् ३०६
याज्याविधिः ३०७
वनस्पतियागस्य विधिः ३०८
स्विष्टकद्यागस्य विधानम् ३०८
इड़ोपह्वानस्य विधिः ३०६
मीमांसा— मनोताया मूहाभावाधिकरणम् ३०६

———

॥ द्वितीयपञ्चिकाया द्वितीयाध्यायारम्भः ३११ पृ० ॥

आख्यायिका— पर्यग्निकरणस्तुत्यर्था ३१२
देवानां विग्रहवत्त्व-कर्माधिकारित्वयोर्विचारः ... ३१३
पर्यग्निकरणविधिः ३१४
ग्रामिचदेशे बर्हिःप्रक्षेपविधिः ३१५
पशोः पुरीषस्यापनार्थं मवटखननविधिः ३१६

पशुपुरोडाशप्रशंसार्थौ प्रश्नोत्तरौ ३१७
प्रैषमन्त्रः— स्तोकानुवचनीयायाः ३२०
स्तोकानुवचनीयानां विधिः ३२१
स्तोकस्य प्रशंसा ३२४
वपाप्रशंसायां प्रश्नद्वयम् ३२६
आख्यायिका— वपाहोमप्रशंसार्था ३२८
वपामात्रस्य पशुरूपत्वे प्रश्नः ३२९
आज्याद्याहुतिभिः सह वपाहुतेः प्रशंसा ३३१
अवदाने विशेषविधिः ३३३
आज्यस्य हिरण्यप्रतिनिधित्वोपपादनम् ३३३
अवदानगतपञ्चसङ्ख्यायाः प्रशंसा ३३४
प्रैषमन्त्रः— प्रातरनुवाकार्थः ३३६
प्रातरनुवाकीया ऋचः ३३६
प्रातरनुवाकशब्दस्य निर्वचनम् ३३८
प्रातरनुवाकस्य देवसम्बन्धविशदनम् ३३८
देवोत्कर्षहेतुत्वम् ३३८
कालविशेषविधिः ३३९
कालविधौ पक्षान्तरविधिः ३४१
प्रैषमन्त्रः— अध्वर्योरुपाकरणार्थः ... ३४१
आख्यायिका— प्रथमाया ऋचो विधानार्था ३४३
तद्दृचोऽर्थवादेन विध्युन्नयनम् ... ३४४
आख्यायिका— तद्दृक्-प्रशंसार्था ... ३४४
तस्या ऋचस्त्रिरावृत्तिविधिः ३४६
प्रातरनुवाकीयाना मृचां शतसंख्याविधानम् आयुष्कामस्य ३४९
सङ्ख्यान्तरविधिः अहीनरात्रादुत्तरक्रतुकामस्य ३४९
द्विगुणसङ्ख्याविधिः प्रजां पशूंश्च कामयमानस्य ३५०
अष्टशतसङ्ख्याविधिः दुर्ब्राह्मणत्वपरिहारकामस्य ३५१
प्रसङ्गतः स्वर्गलोकस्येतः सद्दस्त्वाभीनदूरवर्त्तित्वकथनम् ... ३५१

प्रातरनुवाकीयाना ऋचां अपरिमिताध्ययनविधिः सर्वकामसिद्धिकामस्य ३५२
सहस्रसङ्ख्याविधिः स्वर्गकामस्य ... ३५१
प्रथमभागे छन्दोविधानम् ... ३५२
द्वितीयभागे छन्दोविधानम् ... ३५२
तृतीयभागे छन्दोविधानम् ... ३५३
भागत्रये देवतात्रयविधिः ... ३५४
ग्राम्याः पशवः सप्त— बौधायनोक्ताः ३५३
आपस्तम्बमतानुसारिणाम् ... ३५३
सामगानां क्रुष्टादयः सप्त स्वराः ३५३
प्रातरनुवाकस्य अनुवचनप्रकारनिर्णयाय प्रश्नोत्तरे ... ३५६
— अपरप्रश्नोत्तरे ... ३५७
प्रांसनेन छन्दोभागानां प्रीत्यभिधानम् ... ३५८
परिधानीयाया निर्देशः ३६०
तत्र सोमपदेवतानां परिगणनम् ३५६
असोमपदेवतानां परिगणनम् ३५६
आहुतिभागाः, स्तोमभागाः, छन्दोभागाश्चेति त्रिविधा देवाः ३५८
प्रयाजदेवतानां सङ्ख्यानिर्देशः ३६०
अनुयाजदेवतानां सङ्ख्यानिर्देशः ३६०
उपयाजदेवतानां सङ्ख्यानिर्देशः ३६०

॥ द्वितीयपञ्चिकायास्तृतीयाध्यायारम्भः ३६३ पृ० ॥

आख्यायिका—अपोनप्त्रीयानुवचनविधानार्था ३६४
अपोनप्त्रीयसूक्तस्य नैरन्तर्येणाध्ययनविधिः ३६६
प्रथमाया ऋचः आवृत्तिसहितं सान्तत्यम् ३६७
अध्ययनप्रकारोपदेशः ३६६
आध्वर्वसूत्रोक्तः प्रयोगक्रमः ... ३७०
आपस्तम्बोक्तप्रैषादिप्रदर्शनम् ... ३७०

अपोनप्त्रीयसूक्तस्य ऋचा मनुवचनकालनियमः	...	३७०
परिधानीयायाः विधानम्	...	३७७
आख्यायिका— वसतीवर्येकधनयोः	... ...	३७२
यजुर्मन्त्रः— होतुः प्रत्राथं	... ...	३७३
अध्वर्योः प्रत्युत्तरार्थः	... ...	३७३
निगदरूपो होतुः प्रत्युत्थानार्थः	... ...	३७४
अपा मनुवर्त्तनविधानं होतुः	... ...	३७५
अपोनप्त्रीयानुवचने साद्नप्रकारः	... ...	३७८
प्रातरनुवाकस्य प्रशंसापूर्वकं विधानम्	... ...	३७६
उपांश्वन्तर्यामहोमादूर्द्धं वाग्विसर्जनस्य विधिः, तत्प्रकारश्च		३८०
उपांशुसवनाभिमशनोपपादनम्	... ...	३८१
बर्हिष्यवमानार्थं प्रसर्पणविधानम्	... ...	३८२
अनुमन्त्रणविधानम्	... ...	३८४
यजुर्मन्त्रः— बर्हिष्यवसानानुमन्त्रणार्थः	... ...	३८५
बर्हिष्यवमानानुमन्त्रणार्थोऽपरः	... ...	३८५
सवनीयपुरोडाशेषु मैत्रावरुणी पयस्या	... ...	३८५
आख्यायिका— मैत्रावरुणपयस्याप्रशंसार्था	... ...	३८६
सवनीयपुरोडाशविधानार्था	... ...	३८८
सवनीयपुरोडाशविधिः	... ...	३८८
पुरोडाशशब्दनिर्वचनम्	... ...	३८६
पुरोडाशस्वरूपनिर्द्धारणाय पूर्वोत्तरपक्षौ	... ...	३८६
पुरोडाशेषभक्षणे पूर्वोत्तरपक्षौ	... ...	३६१
हविष्यङ्क्तिविधानम् (धा. क. प. यु. प.)	... ...	३६३
अक्षरपङ्क्तिविधानम् (सु. मत्. पत्. वक्. दे.)	...	३६४
नाराशंसपङ्क्तिविधानम् (प्रा० २, मा० २, ह्र० १, चमसाः)		३६५
सवनपङ्क्तिविधानम् (प प्रा. म. ह्र. अ.)	... ...	३६५
सवनीयपुरोडाशानां याज्यामन्त्राणां व्याख्यानानि	...	३६६
याज्यामन्त्राणां वेदनप्रशंसा	...	३६७

यजुर्मन्त्राः— सवनीयपुरोडाश्याज्यार्थाः, तेषां आख्यानानि च ३९६
सवनीयपुरोडाश्यस्विष्टकृद्याज्यार्थः ... ३९८
स्विष्टकृतो याज्याया विधिः, तन्मन्त्रवेदनपूर्वकानुष्ठानप्रशंसा च ३९८

॥ द्वितीयपञ्चिकायाश्चतुर्थाध्यायारम्भः ३९९ पृ० ॥

आख्यायिका— ऐन्द्रवायवादिद्विदेवत्यग्रहविधानार्था ... ४००
देवानां विजयक्रमेण सोमपानक्रमविधानार्था ४०१
ऐन्द्रवायवग्रहविधानम् ४०२
ऐन्द्रवायवग्रहे मन्त्रसंवाद-लोकव्यवहारौ ४०२
द्विदेवत्यग्रहाणां प्राणरूपत्वेन प्रशंसा ४०४
ऐन्द्रवायवग्रहस्य याज्यानुवाक्ययोर्विधानम् ४०५
द्विदेवत्यग्रहाणां ग्रहणहोमयोः पात्रवैधर्म्यविधिः ... ४०६
होतुर्ग्रहप्रेषभक्षप्रतिग्रहमन्त्रविधिः ४१०
यजुर्मन्त्राः— अध्वर्योः ग्रहप्रेषभक्षप्रदानार्थः ४१०
होतुः ऐन्द्रवायवग्रहप्रेषभक्षणार्थः ... ४१०
होतुः मैत्रावरुणग्रहप्रेषभक्षणार्थः ... ४११
होतुः आश्विनग्रहप्रेषभक्षणार्थः ४१२
द्विदेवत्यग्रहाणां भक्षणे विप्रेषविधिः ४१२
द्विदेवत्यग्रहेषु होत्रप्रयोक्तव्यमन्त्राणा मुच्चासविधिः ... ४१४
अनुवषट्कारमन्त्रप्रयोगनिषेधः ४१४
यजुर्मन्त्राः— ग्रहेषु याज्यान्ते वषट्कृतहोमादुत्तर मनुवषट्कारार्थः ४१४
आगूकरणार्थः ४१५
वषट्कारार्थः ४१५
प्रैषमन्त्रौ— ऐन्द्रवायवे ग्रहे मैत्रावरुणस्य ४१५
मैत्रावरुणस्य यज्ञीयमनोरूपत्वान्वाख्यानम् ४१६
होतुः यज्ञीयवाग्रूपत्वान्वाख्यानम् ४१६
ऋतुयाजस्वरूपकथनम् ४१८

ऋतुग्रहयागानां विधानम् ४१८
ऋतुग्रहयागानां प्रथमादिषु षट्सु विशेषविधिः ... ४१८
सप्तमादिषु चतुर्षु विशेषविधिः ... ४१८
एकादशद्वादशयोः विशेषविधिः ... ४१९
अनुवषट्कारप्रयोगनिषेधः ... ४१९
इड़ोपह्वानग्रहशेषभक्षणयोः पौर्वापर्यविधिः ... ४२१
होत्रहस्तसम्पादितावान्तरेड़ाप्राशन-होत्रचमसभक्षणयोः
पौर्वापर्यविचारः, तन्निर्णयश्च ४२२
द्विदेवत्यग्रहशेषस्य विन्दोर्होत्रचमसे प्रक्षेपविधिः ... ४२३
आख्यायिका— तूष्णींशंसविधानार्था ४२५
ब्राह्मणविषयाणां विशेषतोऽर्थप्रतिपत्तये अन्यत्रान्यथा चोदाहरामः। श्रूयते हि शुक्लयजुर्वेदस्य माध्यन्दिन्याः शाखाया आदिमैषा कण्डिका—"इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे"-इति। शतपथब्राह्मणेऽस्या मन्त्रत्रयात्मिकात्वं स्वीकृत्य, प्रथममन्त्रस्य पर्णशाखाच्छेदने, द्वितीयस्य तयैव शाखया ताडनेन गवां वत्सानाञ्चैकत्रीकरणे, अन्तिमस्य तृतीयस्य तु तयैव तथैव ताडनेन एकस्या गोर्वत्सतः पृथक्करणे विनियोगो विहितो व्याख्याताश्च ते त्रय एव मन्त्राः। तद्यथा—"ता माच्छिनत्ति—'इषे त्वोर्जे त्वेति। द्वाभ्यां तदाह, यदाहेषे त्वोर्जे त्वेति; यो द्वाभ्यां दूयसो जायते तस्मै तदाह। अथ मातृभिर्वत्सान्त्समवास्रजन्ति, स वत्सं शाखयोपस्पृशति—'वायव स्थेति। अयं वै वायुर्योऽयं पवते; एष वा इदं सर्वं प्रप्याययति यदिदं किञ्च; वर्षत्येष वा एतासां प्रप्याययिता; तस्मादाह वायव स्थेति। ०—० अथ मातृणा मेकां शाखयोपस्पृशति वत्सेन व्याकृत्य—'देवो वः सविता प्रार्पयत्विति। सविता वै देवानां प्रसविता, सवितृप्रसूता यज्ञं सम्भरानिति; तस्मादाह देवो वः सविता प्रार्पयत्विति। 'श्रेष्ठतमाय कर्मण इति। यज्ञो वै श्रेष्ठतमं कर्म, यज्ञाय हि तस्मादाह श्रेष्ठतमाय कर्मण इति"-इति माध्य० शत० ब्रा० १. ५. ४. १-५।

तदेव मस्या [मन्त्रत्रयात्मिकायाः शुक्लयजुःप्रथमकण्डिकायाः सविनियोग एषोऽर्थः सम्पन्नः—

(१) 'इषे त्वा, ऊर्जे त्वा' इष्ट्यै त्वां ; छिनद्मीति शेषः ।

(२) 'वायवः स्थ' पवमानाः, वर्षणेन प्रप्यायमानाः यूयं स्थ ; युष्मान् समवसृजन् शाखयोपस्पृशामीति शेषः ।

(३) 'सविता' देवानां प्रसविता 'देवः', 'वः' युष्मान्, यज्ञं सम्भरान्, पवमानान् 'श्रेष्ठतमाय कर्मणे' यज्ञाय 'प्रार्पयतु' ; सवितृप्रसूता वय मिदं याचामह इति शेषः ।

नून मेषोऽर्थोऽधियज्ञः, पर मेतेनैव पदव्याख्यानेनाधिदैवतोऽर्थोऽपि सम्पद्यत एव । तद्यथा— "अयं वै वायुर्योऽयं पवते" । 'यः अयं पवते' सदैव पवमानो विद्यते, स एव 'अयं' त्वगिन्द्रियप्रत्यक्षः, अत एव विग्रहादिशून्यो भौतिको 'वायुः' । "एष वै इदं सर्वं प्रप्याययति यदिदं किञ्च" । 'यत् इदं किञ्च' स्थावरजङ्गमात्मकं जगत्, तत् 'इदं सर्वं' 'एषः वै' वायुरेव 'प्रप्याययति' प्रकर्षेण वर्द्धयति । "एष वै वर्षति" वायुरेव वृष्टिधाराः सर्वाः [मेघतश्चालयन् पृथिव्यां संवाह्योपस्थापयति । अत एव "एतासाम्" पार्थिवीना मपां "प्रप्याययिता" वर्द्धयिता भवति । तत एवभूतं 'त्वा' त्वां वायुं "इष्ट्यै" जानामि । "इष्टात् ऊर्क् = रसः जायते" । "तस्मै" ऊर्जे- रसाय, तत एवान्न मुत्पद्यत इति 'ऊर्जे' अन्नाय च 'त्वा' त्वां जानामि । "देवानां" सर्वेषा मग्न्यादीनां "प्रसविता" सूर्यः ईश्वरो वा 'वः' "यज्ञं सम्भरान्" प्राणनहेतून् युष्मान् 'श्रेष्ठतमाय कर्मणे' "यज्ञाय" प्राणनकार्यनिर्वाहार्थं 'प्रार्पयतु' सदैव प्रार्पयत्येव, वय मपि "सवितृ-प्रसूताः" एव, अस्मानिति शेषः ॥ एतेन वायोः प्रत्यक्षत्वम्, वर्षहेतुत्वम्,

वृष्टिद्वारा चान्नहेतुत्वम्, तत आप्यायनहेतुत्वम्; सूर्यप्रसूतत्वम्, प्राणनरूपश्रेष्ठकर्मकारित्वञ्चेत्याख्यातं वायुविज्ञानम्। प्रधानतो वायुविज्ञानार्थ एव चाम्नातो यजुर्वेदः। अतएवैतदुक्तम्— "अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्"— इत्येवमादिक मिति॥

श्रूयते चात्र पर्णशाखयैव वत्सापाकरणकर्मविधानार्था क्षुद्रतमैकाख्यायिका। तद्यथा— "यत्र वै गायत्री सोम मच्छापतत्, तदस्या आहरन्त्या अपावस्ताभ्यायत्य पर्णं प्रचिच्छेद। गायत्रैव वा सोमस्य वा राज्ञस्तत् पतित्वा पर्णोऽभवत्। तस्मात् पर्णो नाम। तद्यदेवात्र सोमस्य न्यक्तं तदिहाप्यसदिति। तस्मात् पर्णशाखया वत्सानपाकरोति"–इति (शत० ब्रा० १. ५. ४.)। अस्यार्थः— 'यत्र' यस्मिन् काले हि 'गन्धर्वनगरे' हिमालयस्य कस्मिंश्चित् सुरम्यशिखरे 'सोमं' सोमवल्लीवृक्षम् 'अच्छ' आशु 'गायत्री' काचिद् गायिका 'अपतत्' गतवती; 'तत्' तदैव 'आहरन्त्याः' सोमवल्लीहरणं कुर्वन्त्याः 'अस्याः' 'अपावस्ताभ्यायत्य' 'अवस्ता'=अवस्तात्=अधस्तात् 'अपायत्य' वियुज्य स्थितं 'पर्णं' पर्णाकार मेव पर्णबीजं 'चिच्छेद', सा गायत्रीति शेषः। 'गायत्रैव' गायत्र्याः तस्याः 'वा' अथवा 'सोमस्य' राज्ञः' अङ्गसंलग्न मागतं 'तत्' छिन्नं पर्णं 'पतित्वा' भूमिं गत्वा 'पर्णः' पर्णापरपर्यायः पलाशो वृक्षः 'अभवत्'। यतः पर्णत एवास्योत्पत्तिः, तस्मात् 'पर्णो नाम' पर्ण इत्येवेष वृक्षः प्रसिद्धः। 'तत्' तस्मात् 'अत्र' 'सोमस्य' सारभूते रसे 'यदेव' 'न्यक्तं' वीर्यम्, 'तत्' इहापि पलाशवृक्षेऽपि 'असत्' अस्तीति।

एतदाख्यायिकातः पञ्च पर्णविज्ञानानि प्रतीतानि भवन्ति। पुरा नासीदिहार्यनगरीषु पलाशवृक्षो हिमवतः पृष्ठादिहानीत

इति प्रथमम्। बहुषु पलाशारण्येषु च प्राप्यते सोम इति द्वितीयम्। पलाशस्य फलानि न जायन्ते, अपि पत्राकाराण्येव तद्बीजानि भवन्तीत्यपि पत्रत एवास्योत्पत्तिर्भवतीति तृतीयम्। अत एव पत्रपर्यायशब्दाभिधेयः स पर्ण इति वा पलाश इति वाख्यायत इति चतुर्थम्। एतद्रसस्यापि सोमरसतुल्य-बलकारित्व मिति पञ्चमम्॥ गन्धर्वाणां गानप्रियत्वं स्त्रीकामत्वं च संलक्ष्य, तत्र गन्धर्वनगरे सोमानयनाय गायिकायाः प्रेरणं चात्रैव शतपथे ऽन्यत्र च श्रुतम् (३का. २प्र. २क.), तत्सर्वं तत्रैव द्रष्टव्य मिति॥

अथ दर्शयामः कस्मिंश्चित् सूक्ते विधातव्येऽप्याख्यायिकाम्नातेति। तद्यथा— "तार्क्ष्यं स्वर्गकामस्य रोहेत्"–इति (ऐ० ब्रा० ४. ३. ६.)। तार्क्ष्यदेवताकं तृचं सूक्तं तार्क्ष्यम् (ऋ० सं० १०. १७८. १–३.), तस्मिन् 'तार्क्ष्ये' सूक्ते; तेन सूक्तशंसनेनेति भावः। 'स्वर्गकामस्य' यजमानस्य, प्रसङ्गागतं 'दूरोहणं' स्वर्गं 'रोहेत्', रोहण मारोहणं तत् सम्पादयेत्; शंसनकर्त्ता ऋत्विगिति शेषः। इम मेव विधिं प्रस्तोतु मान्नातैषा खल्वाख्यायिका— "तार्क्ष्यो ह वा एतं पूर्वोऽध्वान मेत्, यत्रादो गायत्री सुपर्णी भूत्वा सोम माहरत्; तद्यथा चेत्रत्र मध्वनः पुर एतारं कुर्वीत, तादृक् तत्"–इति। 'तार्क्ष्यः' तन्नामा कश्चित् 'वै' एव 'पूर्वः' अग्रगामी सन् 'एत मध्वानं' पार्वत्यमार्गम् 'ऐत्' आगमत्, दर्शयन्निवेति यावद्। कदा किमर्थ मित्याह— 'यत्र' यत्काले 'अदः' वृत्तान्तं सम्पन्नम्। किमित्युच्यते— 'गायत्री' देवगणप्रेरिता, गानेन गन्धर्वान् मोहयित्वा सोमानयने प्रवृत्ता, काचिद् गायिका नारी, 'सुपर्णः' पक्षी, तद्वत् (लुप्तोपमान मिदं पदम्), स यथा तीक्ष्णदृष्टिर्द्रुतगामी स्थिरलक्ष्यश्च सन् स्वलक्ष्ये

उत्पतिष्णुर्भवति, तथा 'भूत्वा', 'सोमम्' 'आहरत्' आहृतवतो, 'तत्' तदानीं 'यथा' 'अध्वनः क्षेत्रज्ञं' मार्गविशेषाभिज्ञं तद्देशवासिनं कञ्चिज्जनं 'पुर एतारं' पथप्रदर्शनायाग्रगामिनं 'कुर्वीत', 'तादृक्' 'तत्' तार्क्ष्यसंज्ञनं, दूरोहणारोहणाय भवतीति शेषः। कथासौ तत्र तादृग्विजनप्रदेशे पुरुषस्तार्क्ष्य इत्याह—"अयं वै तार्क्ष्यो योऽयं पवते"–इति। 'तार्क्ष्यः' खलु 'अयं' प्रत्यक्षगम्यः। कः ? 'योऽयं पवते' त्वाचप्रत्यक्षो यः सदेव सर्वत्र प्रवहति। एवञ्च वायोरेव नामान्तरं तार्क्ष्य इत्युक्तं सम्पन्नम्। स एष वायुरेव तत्र गायत्र्याः पथप्रदर्शको बभूवेति। तत्पथप्रदर्शकत्वञ्च वायोर्गन्धवहत्वेनोपपद्यत एव ; अस्या एव दिशः सोमगन्ध आयातीति समनुभूय तत्प्रदेशं गतवती सेति भावः। एतेनापि किञ्चिद् वायुविज्ञान मावेदितम्, विशेषतोऽभिज्ञानाय च ततः श्रुतम्—"एष स्वर्गस्य लोकस्याभिवोढा"–इति। 'एषः' तार्क्ष्यापरपर्यायो वायुः 'स्वर्गस्य लोकस्य अभिवोढा' मृतानां सुकृतीनां जन्तूना मातिवाहिकान् देहान् स्वर्गं लोकम् अभिवहति। किञ्च स्वरित्यादित्यपर्यायशब्दो निघण्टौ (१. ४. १.) पठितः, व्याख्यातश्च तथा निरुक्तेऽपि (२. ४. २.), ततश्चादित्यरश्मीना मिह पृथिव्या मभिवाहकत्वेन चास्य तार्क्ष्यस्य सम्पद्यते स्वर्गलोकवोढृत्वम्। तदेव मिह सूर्यरश्मीनां वाहक एषः, अमुत्रातिवाहिकमूर्त्तदेहवाहकश्चैष एव ; तदिदं महाविज्ञानहृद्यञ्चैतदाख्यायिकयोपदिष्ट मिति ध्येयम्॥

एवमादिभ्य आख्यायिकाभ्यो बहव उपदेशाश्च लभ्यन्ते ; तत एता एवावलम्ब्य ब्रह्मः कथा अनतिप्राचीनपुराणेषु तथाविधेतिहासादिषु च स्वल्पमतीनां स्त्रीशूद्रद्विजबन्धूनां धर्मोपदेशाय

कल्पिता भगवता व्यासेन, तदनुगामिभिश्चानेकैः क्रमादद्यतनैरपि। अत एवोक्तं महाभारतोपक्रमे— "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्"–इति (१. १. २६७.) । वस्तुतस्तु सर्वपुराणेतिहाससमूलीभूतो वेदिकाख्यायिकोक्तो वृत्तान्तभागस्तु सर्व एवोपमानादिमूलकः परिकल्पितोऽसत्य इत्येव सिद्धान्तितं मीमांसादर्शने। तथाहि "गुणवादस्तु"–इतिसूत्रव्याख्यानावसरेऽभाष्येवं स्फुटं श्रीमदाचार्येण शबरस्वामिना— "असद्वृत्तान्तान्याख्यानम् ; स्तुत्यर्थेन प्रशंसाया गम्यमानत्वात्। इहान्याख्याने वर्त्तमाने इयं निष्पद्यते,— यच्च वृत्तान्तज्ञानम्, यच्च कस्मिंश्चित् प्ररोचना द्वेषो वा। तत्र वृत्तान्तान्याख्यानं न प्रवर्त्तकं न निवर्त्तकञ्चेति प्रयोजनाभावादनर्थक मित्यविवक्षितम् ; प्ररोचनया तु प्रवर्त्तते द्वेषान्निवर्त्तत इति तयोर्विवक्षा"–इति (१. २. १० सू०)'। प्रदर्शितानि चैतदुदाहरणानि बहूनि तत्रैव किञ्चिदुत्तरम् ; तत्रैकमिदं "सः (प्रजापतिः) आत्मनो वपा मुदक्खिदत् (तै० सं० २. १. १.)"—इत्याद्याख्यायिकायाः प्रकृताभिप्रायव्याख्यानपरम्— "कथम्पुनरिदं निरालम्बन मन्वाख्यायते ? इति। उच्यते। नित्यः कश्चिदर्थः प्रजापतिः स्यात्— वायुः, आकाशः, आदित्यो वा। 'स आत्मनो वपा मुदक्खिदत्'–इति,— वृष्टिं, वायुं, रश्मिं वा। 'ता मलौ प्राग्टल्लात्'–इति,— वैद्युते, आर्चिषे, लौकिके वा। 'ततोऽजः'–इति,— अन्नं, बीजं, वीरुधा। 'त मालभ्य (त मुपजीव्य) प्रजाः पशूनाप्नोति'–इति गौणाः शब्दाः"–इति। तदेवं छिन्नेषु मूलेषु कुतो न पतेयुः पौराणिकेतिहासाद्भुतकथाः सर्वा वातेन कदलीवनानि यथेति, को वा विश्वसिति बालोपदेशाय विष्णुशर्मादिभिर्निर्मिता काकोलूकसंवादादिकथा अबालोऽपीति सुधीभिरेवाकलय्य

मिद मिति। पौराणिकमूर्यचन्द्रभूस्थित्यादिविज्ञानानि तु सर्वाण्येव वेदविरुद्धान्येवेति वेद्यं वेदविद्भिः स्वत एव स्फुटम्।

तदेवं ब्राह्मणग्रन्थेषु यागा विहिताः, तत्सिध्यर्था द्रव्यदेवतामन्त्राश्च विहिताः, तत्र सर्वत्र प्रवृत्त्यर्थाः किञ्चिद्विज्ञानाद्युपदेशका अपि गौणमूलाः कल्पनासम्भूता आख्यायिकाश्च बह्व्य आम्नाताः, तत्तन्मन्त्राणां तत्तद्यागाद्युपयोगित्वं वर्णयितुं समासतस्तात्पर्यान्वाख्यातुं वा व्याख्यानानि च कृतानि। ततश्च विध्यर्थवादाख्यानपूर्वकमादिमं मन्त्रभाष्यं ब्राह्मण मित्येव पर्यवस्यते ब्राह्मणलक्षणम्। अस्ति चात्र ग्रन्थे तल्लक्षणं समन्तादितोऽपि ब्राह्मणम्, नान्ना चैतदैतरेयक मिति सिद्धम्॥

---

(२)

अथातो विचार्य मस्ति कोऽस्य प्रवक्तेति ? महिदास इति शुश्रुमः। तथा ह्यारण्यकम्— "एतद्ध स्म वै तद् विद्वानाह महिदास ऐतरेयः"–इति (ऐ० आ० १. ८. २.)। छन्दोगब्राह्मणेऽप्येव मेव (५. १६. ७.)। तत्र "महिदासो नामतः, इतरायाः अपत्य मैतरेयः"–इति शाङ्करं भाष्यम्। अस्यस्य भाष्यभूमिकायाञ्चालेखि सायणेनैवम्— "प्रकृतस्य तु ब्राह्मणस्येतरेयकत्वे सम्प्रदायविद एताम् आख्यायिका माचक्षते। 'कस्य चित् खलु महर्षेः बह्व्यः पत्न्यो विद्यन्ते स्म। तासां मध्ये कस्याश्चिदितरेति नामधेयम्। तस्या इतरायाः पुत्रो महिदासाख्यः कुमारः। तदीयस्य तु पितुर्भार्यान्तरपुत्रेष्वेव स्नेहातिशयो न तु महिदासे। ततः कस्याञ्चिद् यज्ञसभायां स महिदास मवज्ञायान्यान् पुत्रान् स्वोत्सङ्गे स्थापया-

मास। तदानीं खिन्नवदनं महिदास मवगत्येतराख्या तन्माता स्वकीयकुलदेवतां भूमि मभिसस्मार। सा च भूमिदेवता दिव्य-मूर्त्तिधरा सती यज्ञसभायां समागत्य महिदासाय दिव्यं सिंहासनं दत्त्वा तत्रैन मुपवेश्य सर्वेष्वपि कुमारेषु पाण्डित्याधिक्य मवगम-य्येतद्ब्राह्मणप्रतिभासनरूपं वरं ददौ। तदनुग्रहात् तस्य महि-दासस्य मनसः 'अग्निर्वै देवाना मवमः (ऐ० ब्रा० १. १. १.)' -इत्यादिकं 'स्तृणुते (ऐ० ब्रा० ८. ५. ५.)'-इत्यन्तं चत्वारिंश-दध्यायोपेतं ब्राह्मणं प्रादुरभूत्। तत ऊर्द्धम् 'अथ महाव्रतम् (ऐ० आ० १. १. १.)'-इत्यादिकम् 'आचार्याः (ऐ० आ० २. ६. ८.)'-इत्यन्त मारण्यकव्रतरूपं च ब्राह्मण माविरभूत्' -इति"-इति। तथा चेतराशब्दात् "शुभ्रादिभ्यश्च (पा० ४. १. १२३.)"-इत्यपत्यार्थे ढकि सम्पाद्य मिदं रूप मैतरेय इति ॥

अत्र कैश्चिदनुमीयते, सोऽय मैतरेयः स्याद् दासीपुत्रः ? अस्ति हि ब्राह्मणस्य ब्राह्मण-क्षत्रिय-वैश्येतित्रिविधार्याणां तदितरस्य शूद्रस्यानार्यस्य च कन्यापरिणयेऽधिकारः ; तथा क्षत्रियस्यापि क्षत्रिय-वैश्येतिद्विविधयोरार्ययोः तदितरस्य शूद्रस्य चानार्यस्य कन्यागृहणेऽधिकारः ; एवं वैश्यस्यापि स्वजातीयाया आर्यायास्तदि-तरायाः अनार्यायाश्च कन्या-विवहनेऽधिकारः। तत्र सर्वेषा मेवार्य-वर्णानां प्रथमं स्वजातीया-पाणिपीडन मेव विहितम्। किञ्च आर्यकन्याना मेवोद्वहने यथाविधि वैदिकमन्त्रादीनां व्यवहारः समुचितः, तत एव हि तेषां पत्नीत्वम् ; अत एवोक्तं भगवता महामु-निना पाणिनिनापि "पत्युर्नो यज्ञसंयोगे"-इति (४. १. ३३.) ; इतरायास्त्वमन्त्रकं ग्रहणमात्रम् अपि भरणीयत्वहेतुकं भार्यात्व मिति विवेकः ॥

एतच्च सर्वं भृगुप्रोक्तमनुसंहितादौ सुव्यक्तं विहितम्। तथाहि—

"सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः॥
शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृता।
ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः"—इति (२.)।

तथैवान्यत्र—"विप्रस्य त्रिषु वर्णेषु, नृपतेर्वर्णयोर्द्वयोः।
वैश्यस्य वर्णे चैकस्मिन्, षडेतेऽपसदाः स्मृताः"—इति (१०.)।

"वर्णत्रयाणामेते षट् पुत्राः सवर्णापुत्रकार्यापेक्षया 'अपसदाः' निकृष्टाः"—इति तत्र कुल्लूकः। एषामपसदत्वेऽपि द्विजत्वं न व्याहतम्। तच्च तत्रैव—(१०. ४१.)

"सजातिजानन्तरजाः षट् सुता द्विजधर्मिणः"—इति।

"षट् पुत्राः द्विजधर्मिणः उपनेयाः"—इति च तत्र कुल्लूकः। पुनस्ततस्तत्रैव—"यस्माद् बीजप्रभावेण तिर्यग्जा ऋषयोऽभवन्।
पूजिताश्च प्रशस्ताश्च तस्माद् बीजं प्रशस्यते"—इति (१०. ७२.)।

यदुक्तं "न ब्राह्मणक्षत्रिययोः ०—० शूद्रा भार्योपदिश्यते"—इत्यादिषट्श्लोक्या, तन्नून मपरिणीतसवर्णापरम्; सवर्णाग्रे द्विजातीना मिति श्लोकेऽग्रपदस्वारस्यात्, अन्यथा पूर्वापरग्रन्थावरोधस्यापरिहार्यत्वात्, कुल्लूकभट्टेन तत्र तथैव व्याख्यातत्वाच्च। न चान्यथा धीवरीगर्भजस्य वेदव्यासस्य विप्रत्व मुपपद्यते, नापि "नाग्निं चित्त्वा रामा मुपेयात्"—इति (तै० सं० ५. २. ८. ६.) निषेध-श्रुतिः सङ्गच्छते। तैत्तिरीयारण्यकेऽपि "संवत्सरं न मांस मश्नीयात्, न रामा मुपेयात्, न मृण्मयेन पिबेत्, नास्य राम उच्छिष्टो पिबेत्, तेज एव तत् संश्यति"—इति (५. ८. ४६.)। एवमादौ 'रामा'—शब्दः शूद्रापरः; सर्वत्र तथैव व्याख्यातत्वात्। विशेषतोऽत्र नैरुक्तं द्रष्टव्यम्।

तथाहि— "रामा रमणायोपेयते, न धर्म्माय; क्षणजातीया"–इति (१२. २. २.)। "रामा-इति शूद्रोच्यते"–इत्यादिस्तदीया दौर्गी वृत्तिश्चेह द्रष्टव्या। तदेवं सवर्णायाः पाणिपीडनानन्तर मसवर्णानां ग्रहणे न कोऽपि दोष इति सिद्धान्तः। अत एव "इन्द्रस्य प्रिया जाया वावाता प्रासहा नाम"–इत्येतरेयश्रुतेर्व्याख्यानावसरे सायण आह— "राज्ञां हि त्रिविधाः स्त्रियः। तत्रोत्तमजातेर्महिषीति नाम, मध्यमजातेर्वावातेति, अधमजातेः परिवृक्तिरिति"–इति (३. २. ११.)। श्रुताश्चैतास्तैत्तिरीयेऽप्यश्वमेधकरणे (ब्रा० ३. ९. ४. ५.)। शतपथे तु "चतस्रो जाया उपकल्पा भवन्ति, —महिषी, वावाता, परिवृक्ता, पालागली"–इति (१३. ५. १. ८.) श्रुतम्॥

तदेव मेतद्ब्राह्मणप्रवक्तुरैतरेयनामव्युत्पत्तित एवेतरागर्भसम्भूतत्वसिद्धेः सायणाचार्योक्तप्रवादप्रथितयज्ञसभाप्रतिपत्तिहेत्वनुमानतश्च सिध्यत्येव दासीपुत्रत्वम्। तत एव महिदास इति दासान्त मभिधान मपि विश्रुतम्; तथा विद्वानित्येव विशेषणम्, न तु ऋषिरित्याचार्य इति वेति।

नन्वेव मार्याणा मार्यत्वप्रतिपादकाना मादिधर्माणां यागादीनां विधायकस्यैतस्य ब्राह्मणग्रन्थस्य प्रवचनकर्त्तृत्वं कथ मनार्ये तत्र दासीपुत्रे सम्भवेन्नामेति चेत्, अत्र ब्रूमः। यागादिविधायकब्राह्मणग्रन्थस्य प्रोक्तृत्वं तु किं तुच्छम्, मन्त्रद्रष्टृत्व मपि ज्ञायते दासीपुत्रस्यापीति। तद्यथा श्रुतं तावदत्रैव कवषैलूषोपाख्यानम्— "ऋषयो वै सरस्वत्यां सत्र मासत। ते कवष मैलूषं सोमादनयन्, दास्याः पुत्रः कितवोऽब्राह्मणः कथं नो मध्ये दीक्षिष्टेति। तं बहिर्धन्वोदवहन्नत्रैनं पिपासा हन्तु सरस्वत्या उदकं

मा पादिति। स बर्हिर्धन्वोदूढः पिपासया वित्त एतदपोनप्त्रीय मपश्यत्"–इत्यादि (२. ३. १.)। तदपोनप्त्रीयं सूक्तन्तु दाशतय्यां दशमे त्रिंशं द्रष्टव्यम्॥

तत्त्वतस्तु पुरा खल्वत्रार्यावर्त्ते ये नगरवासिनः सभ्यास्तेषा मार्यत्वम्, ये त्विहावीतरागा अप्यरण्याश्रिता गिरिकन्दरादिवासिनो ऽसभ्यास्तेषा मनार्यत्व मित्येव जातिद्वयं पार्थक्येन वर्णनीय मासीज्जन्मस्थानव्यवहारादिभेदतः। तथा ह्याथर्वणिकाः किल तज्जातिद्वय मवलम्बेरवेव माम्नायन्ते (१९. १. ८. १.)—

"प्रियं मा कृणु देवेषु, प्रियं राजसु मा कृणु।
प्रियं सर्वस्य पश्यत, — उत शूद्र उतार्ये"–इति।

अहो प्रशस्योऽयं तदानीन्तनः सार्वजनीनप्रीतिभावः! तदेवं तदानीं यथा ज्ञानालोचन-बलरक्षण-पणनव्यवहारहेतुभिरार्याणां ब्राह्मणादिजातिभेदाः प्रचलिताः, तथैवानार्याणा मपि आर्यानुगतत्वाननुगतत्वभेदात् द्वैविध्यं सम्पन्नम्। ये त्वनार्या अप्यार्याणा मानुगत्य माललम्बिरे, त एव दासाः; तद्विपरीतास्तु दस्यव इति व्यपदिष्टाः। त एव च दासाः शूद्रा इति, दस्यवस्तु म्लेच्छा इति चाख्याताः। इत्थ मिह पञ्च जातयो निष्पन्नाः। एताश्च पञ्च जातयो मनुष्याणा मेवेति मनुष्यशब्दपर्यायत्व मास्तं पञ्चजन इति। तदेव मेषु पञ्चजनेषु कर्मादिभेदत एव ब्राह्मणः, क्षत्रियः, वैश्य इति त्रय आर्याः; दासो दस्युश्चेति द्वावनार्याविति स्थितम्॥

अथ यद्यपि जातिर्जन्मेति पर्यायशब्दाविति जन्मानुसारिण्येव जातिरित्येव सर्वसम्मतम्, सम्प्रति तदन्यथाकरणे जात्युच्छेदप्रसङ्गः स्यादिति सत्यम्! तथापि कर्मतो जात्यन्तरतापि नासत्यम्!। तदाहापस्तम्बः— "धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्ण

मापद्यते जातिपरिवृत्तौ"-इति, "अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्ण मापद्यते जातिपरिवृत्तौ"-इति च (२. ५. १०, ११)

मनुरप्याह— "शूद्रो ब्राह्मणता मेति ब्राह्मणश्चैति शूद्रताम्।
क्षत्रियाज्जात मेवन्तु विद्याद् वैश्यात्तथैव च"-इति १०. ६५।
"जातो नार्या मनार्याया मार्यादार्यो भवेद् गुणैः"
-इति (१०. ६७.) च मनूक्त मिह स्मर्त्तव्यम्॥

न च व्यवहारादिभिश्च जातिपरिवर्त्तन मट्टङ्कचरं वक्तव्यम्। तत्रानार्यस्याप्यनार्यत्वलाभोऽभवदपौनप्त्रीयसूक्तदर्शनसामर्थ्यादिति तु इदानी मेव प्रदर्शितम्; आर्यस्याप्यनार्यत्वलाभोऽपि समाम्नात इहैवैतरेयके। तथाहि—"तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः, पञ्चाशदेव ज्यायांसो मधुच्छन्दसः, पञ्चाशत् कनीयांसः, तद् ये ज्यायांसो न ते कुशलं मेनिरे, तानन्तु व्याजहारान्तान् वः प्रजा भक्षीष्टेति। त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिवा इत्युदन्त्या बहवो भवन्ति वैश्वामित्रा दस्यूनां भूयिष्ठाः"-इति (७. ३. ६.)।

विश्वामित्रस्यास्य जन्मतः क्षत्रियत्वम्, वसिष्ठस्यर्षेर्धेनुप्रार्थनम्, तदलाभात् तच्छतपुत्रनाशनम्, ततस्तपःप्रभावाद् ब्राह्मणत्वलाभ इति पौराणिकी कथापि स्यादत्रोपयोगित्वेनादरणीया, किन्तु सा नून मामूलकल्पितैव;—न स महर्षिः कदाप्यासीदब्राह्मणः, नापि कदापि तेन वसिष्ठस्यर्षेर्धेनुप्रार्थनं कृतम्, न च तच्छतपुत्रनाशस्तथाविधस्य महर्षेः कथ मपि युज्यते, नैव स तपःप्रभावाद्ब्राह्मणत्व मापेति सर्व मेवेद मसङ्गत मनृतं वचः पौराणिकानाम्; वेदमूलकत्वाभावादंशतो वेदविरुद्धत्वाच्चेति वेदानुशीलिनां सुविदित मेवेति दिक्॥

प्रकृते तु यथाद्य प्रतीचोदीच्यापाच्यभारतीयानां भारतसम्राट्-

मेनिकेषु विद्यमानलब्धप्रवेशत्वेऽपि वङ्गदेशीयानां योग्यबलाद्यभावत एव नास्ति प्रवेशाधिकारः, अस्ति तु व्यांग्फिरिङ्गीति वङ्गप्रसिद्धानां युरशीयानाम् ; तथैवामिश्रितार्यशोणितानां मनार्याणां बुद्धिमान्द्यादितोऽनुपयुक्ततयैवास्माच्छास्त्रेषु वेदग्रहणायोपनयनविधेरभावोऽनुग्रह एव, विमिश्रार्यशोणितानां तु वेदव्याससदृशानां वेदग्रहणायोपनयनं केन वारितमिति स्फुटम्। मनुरप्याह—"बीजमेके प्रशंसन्ति क्षेत्रं मन्ये मनीषिणः"-इत्यादि (१०. ७०.)। "जातो नार्यामनार्याया मार्यादार्यो भवेद् गुणैः"-इति च (१०. ६७) गुणपक्षपातस्तत्रैव। शूद्रस्य वेदाधिकारे साक्षात् संहितावचनमपि प्रदर्शितं स्वामिदयानन्देन-(वा० सं० २६. २.)।

"यथेमां वाचं कल्याणीमावदानि जनेभ्यः।
ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय"-इति।

तदेवं वेदविधेः पक्षपातदोषभाक्कं न कथमपीति स्पष्टम्; स्पष्टञ्च दासानामनुपयुक्तमतीनां मन्वादिकर्तृकं वेदानधिकारित्वविधानमनुग्रहार्थमेवेति।

वेदाधिकारित्वानधिकारित्वप्रसङ्गादिहान्यदपि किञ्चिद् वक्तव्यमस्ति, तद्यथा—भारतवर्षीयाणां मत्साकं शास्त्रग्रन्थेषु यावन्तो विधिनिषेधा विहिताः, यानि च वर्णाश्रमधर्मशासनानि श्रुतानि स्मृतानि च, तैः खल्विमे वयं भारतवर्षीया एव शास्याः, न त्वन्यदेशीयाः ; अत एवोक्तं मनुना—"अस्मिन् धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम्। चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः"-इति (१. १०७.)। एवञ्चास्माच्छास्त्रकृता ब्राह्मणादिजातिसञ्ज्ञा त्वस्माकमेव ; भारतादन्यत्र ब्राह्मणादयस्त्रयो वर्णाः शूद्रश्चेच्छाश्च नैव सन्तीति तत्रत्यानां ब्राह्मणादिजातिमत्त्वेनार्यत्वं शूद्रत्वेच्छत्वे-

नार्यत्वं वा न किमपि सङ्गच्छतेऽस्मच्छास्त्रानुसारतः । तदेव मिङ्गलण्डादिदेशानां म्लेच्छदेशत्वम्, तत्तद्देशीयानां म्लेच्छत्वञ्च न कथ मपि सङ्गच्छत इति प्रणिधानेनालोच्यम् । म्लेच्छदेशाः किलात्र भारते विद्यन्त एव, म्लेच्छा अपि भारतीयेष्वेव केचन, म्लेच्छाचाराश्चास्मच्छास्त्रविमुखाना मार्याणा मनार्याणाञ्च भारतीयानामेव, न त्वन्यदेशीयानाम् ; तत्तद्धर्मशास्त्रेषु म्लेच्छाम्लेच्छविज्ञानोपदेशभावात् । सन्ति ह्यत्र चिरादेव म्लेच्छाः, म्लेच्छदेशाः, अम्लेच्छानां म्लेच्छवाक्प्रयोगादिम्लेच्छाचारनिषेधाश्च । शतपथब्राह्मणे त्वसकृदेव श्रुतो म्लेच्छशब्दः (३. २. १. २३, २४.), पाणिनेर्धातुपाठे म्लेच्छ धातुः (भ्वा० प० २०५.), गणपाठे उच्छादौ तत्पाठः (६. १. १६०.), कात्यायनस्य व्याकरणाध्ययनप्रयोजनाद्याख्यानावसरे शतपथब्राह्मणमूलकं 'म्लेच्छा ह वा मा भूम'-इति कथनम्, पतञ्जलेः पस्पशायां तद्व्याख्यानम्, मीमांसादर्शने आर्यम्लेच्छाधिकरणम् (१. ३. ६.), मनौ म्लेच्छदेशलक्षणम् (२. २३.) म्लेच्छभाषादेरुल्लेखश्च (७. १४८; १०. ४५; १२. ४३.), महाभारते ह्यादिपर्वणि पाण्डवानां वारणावतगमनप्रक्रमे (१४५ अ०) युधिष्ठिरं प्रति विदुरस्य म्लेच्छभाषया गूढ़ोपदेशदानञ्चैतत् सर्वं तन्निदर्शन मिति ।

तदित्थं महिदासस्य शूद्रागर्भजातत्वेऽपि ब्राह्मणग्रन्थप्रवचनशक्तिमत्त्वेन ब्राह्मणत्वं स्यात् सञ्जातं किं तत्र चित्र मित्यलंवोपरमामहे वय मिति ॥

एष हि महिदासोऽभूद् दीर्घजीवी, तच्छ्रूयते छान्दोग्यब्राह्मणे — "स ह षोड़शं वर्षशत मजीवत्"-इति (५. १६. ७.)। षोड़शाधिकशतवर्षकालस्यापि जीवन मेव मनुष्याणां पूर्ण मायुः । अतएव

तत्रैव ततः प्रागिमान्यपि वचनान्याम्नातानि— "चतुर्विंशतिवर्षाणि प्रातस्सवनम्" प्रथमं वयः, बाल्य मिति यावत्। ततः "चतुश्चत्वारिंशद्वर्षाणि तन्माध्यन्दिनं सवनम्" मध्यं वयः, यौवन मिति यावत्। तत उत्तरम् "अष्टाचत्वारिंशद्वर्षाणि तृतीयसवनम्" अन्त्यं वयः, वार्द्धक्य मिति यावत्। एवं सङ्कलनया "प्रह षोड़शं वर्षशतं जीवति" ११६ आयुः पूर्णं सम्पद्यत इत्यर्थः। न चैवं "शतायुर्वै पुरुषः"—इति (ऐ० ब्रा० २. २. ७.)—श्रुतिर्विरुध्येत; हि शतायुर्जीविनः पुरुषस्य वेदे लोके चादर्शनात्। अतएव शतपथे पूर्णायुर्मन्त्रव्याख्यानायैवं प्रोक्तम्—"शतं हिमाः (य० वा० सं० २. २७.)—इति, शतं वर्षाणि जीव्यास मित्येवैतदाह। तदप्येतद् ब्रुवन्नाद्रियेत ? अपि हि भूयांसि शताद् वर्षेभ्यः पुरुषो जीवति"—इति १. ९. ३. १९। एतेनावगम्यते शताद् वर्षेभ्यः किञ्चिदधिक मपि तत्रैव गण्यत इति। एव मपि "दशवर्षसहस्राणि दशवर्षशतानि च। रामो राज्य मुपासित्वा ब्रह्मलोकं प्रयास्यति"—इति महाकविवाल्मीक्युक्तं (रा० १. १. ९३.) जल्पकल्पतरुफलं न कदापि भवेन्मन्तव्यम्; वेदविरोधादिति स्पष्टम्॥

अनेनैव महिदासेन आरण्यकग्रन्थोऽप्येकः प्रोक्तः। स हि पञ्चधा विभक्तोऽधीयते। तत्र सायणाचार्येण प्रथम-द्वितीयतृतीयांशाना मेव तत्प्रोक्तृत्वं स्वीकृतम्। तथा चैतरेयभाष्यभूमिकायाम्— "तस्य महिदासस्य मनसा 'अग्निर्वै देवाना मवमः (ऐ० ब्रा० १. १. १.)'—इत्यादिकं 'स्तृणुते (ऐ० ब्रा० ८. ५. ५.)'—इत्यन्तं चत्वारिंशदध्यायोपेतं ब्राह्मणं प्रादुरभूत्। तत ऊर्द्धम् 'अथ महाव्रतम् (ऐ० आ० १. १. १.)'—इत्यादिकम् 'आचार्याः (ऐ० ३ आ० २. ६. ८.)'—इत्यन्त मारण्यकव्रतरूपञ्च ब्राह्मण माविरभूत्"—इत्युक्तम्।

चतुर्थारण्यकविषये तूक्तम् 'तदिदं नवमञ्जाकाना रचां पुरीषपदानाञ्च प्रतिपादकं ग्रन्थजातं यद्यपि कर्म्मकाण्डे पठितुं युक्तम्, तथाप्यरण्य एवाध्येतव्य मित्यभिप्रेत्य चतुर्थारण्यकत्वेनात्र पठितम्' (ऐ० ४आ०. १. १. १५.) इति। पञ्चमस्यात्तिमस्य त्वाश्वलायनकृतसूत्रत्व मेवामानि तेन। इत्थं प्रथमारण्यकत्रयस्य महिदासप्रोक्तृत्वम्, चतुर्थस्य संहितान्तरात् सङ्गृह्य पठितत्वम्, पञ्चमारण्यकस्य तत्प्रभवत्वं च स्फुटम्। ऐतरेयोपनिषद्ग्रन्थस्त्वेतदारण्यकान्तर्गत एव ; परं तत्राप्यस्ति मतान्तरता। इदानीं मैतरेयोपनिषदिति प्रसिद्धः शाङ्करभाष्यादिसमन्वितो योऽयं ग्रन्थोऽधीयते सर्वत्र, ततोऽधिकतरः सायणसम्मतः। तेन ह्याचार्येण "एष पन्थाः (ऐ० २ आ० १. १. १.)"—इत्यादिः "आचार्याः—(ऐ० ३ आ० २. ६. ८.)"—इत्यन्तश्च द्वितीयतृतीयारण्यात्मकः समग्र एव ग्रन्थ उपनिषदित्यवादि ॥

सोऽय मेक एवैतरेयो महिदासो ब्राह्मणः पारम्पर्यो वा, विद्यया ब्राह्मणत्व माप्यास्य चत्वारिंशदध्यायात्मकस्य ब्राह्मणग्रन्थस्य तथोपनिषद्धर्मस्यारण्यकत्रयस्य च बभूव प्रवक्तेति सिद्धम् ॥

---

(२)

अथ कुत्यः सः ? को जनपदस्तस्यैतरेयस्य जन्मभूरभिजनो वेति भावः। अत्र ब्रूमः। एष आर्यावर्त्त एव तज्जन्मभूरिति। तदेतदार्यावर्त्ताभिधानं न क्वचिदपि संहितायां ब्राह्मणे वा श्रुत मस्ति ;

अनतिप्राचीनग्रन्थेषु पातञ्जले महाभाष्ये, विशेषतस्तु भृगुप्रोक्तायां मनुसंहितायां ततो महाभारतादावपि कृत एतत्स्वरूपादिनिर्णय इति तन्नामप्रसिद्धिः। तत्रतस्त्वार्याणां वासनिबन्धन एव तन्नामेति आर्यनामैवार्यावर्त्तनामबीज मुपगम्यते।

आर्यशब्दस्तु ऋक्संहितादौ बहुत्र बहुधा श्रूयते, प्रतीयते च तत्र सर्वत्रैव तदानी मिह पृथिव्यां श्रेष्ठजातिरेवार्यनामतः प्रसिद्धेति। तद्यथा—"विजानीह्यार्यान् ये च दस्यवो बर्हिष्मते रन्धया शासदव्रतान्"–इति ऋ० सं० १. ५१. ८। "साह्याम दास मार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता"–इति ऋ० सं० १०. ८३, १२। "नवदशभिरस्तुत शूद्रार्या-वस्तृज्येताम्"–इति य० वा० सं० १४. ३०. १क०। "तयाहं सर्वं पश्यामि यश्च शूद्र उतार्यः"—इति अथ० सं० ४. २०. ४ख०। "शूद्रार्यौ चर्मणि व्यायच्छेते"–इति सा० ता० ब्रा० ५. ५. १४। तैत्तिरीयसंहिताया मप्येष आर्यशूद्रयोश्चर्मनिमित्तः कलह आम्नातः (७. ५. ९. ८)। ऐतरेयकेऽप्याम्नात आर्यशब्दः—"अयुव मार्यस्य राष्ट्रं भवति"–इति ८. ५. २। निरुक्तकारः खलु यास्कोऽप्येकत्रार्यशब्दं व्यवहृतवान् जातिवचनम्—"विकार मस्या-र्येषु"–इति (२. १. ४.)। आर्यशब्दव्याख्यानञ्चान्यत्र कृतं तेनैवम् —"आर्यः = ईश्वरपुत्रः"–इति (६. ५. ३.)। अस्ति च 'अर्यः'–इति पदं परिपठितं निघण्टौ (२. २२.) ईश्वरनामसु, तत एवापत्यार्थप्रत्यये सिद्धात्यार्यशब्द इति सम्पन्नं तन्निर्वचनम्। तदेव मवगम्यते,— यथा महम्मदीया महम्मदं नाम स्वधर्मप्रवर्त्तकं साक्षादीश्वरदूतं मन्यन्ते, यथा वा क्रुश्चानाः स्वधर्मप्रचारकं क्रीष्टं साक्षादीश्वरात्मजं मन्यन्ते, एव मेव पुराऽस्माकमपि पूर्वपुरुषा रूप-

वत्त्वेन, बलवत्त्वेन, विद्वत्त्वेन, सत्यवादितादिबहुसद्गुणवत्त्वेन, पवित्राचारत्वेन बहुगौरववन्त आसन्नित्येवेश्वरपुत्रा इत्यभवन् व्यपदिष्टास्तदेवास्माक मार्यनामनिदान मिति ।

महामुनिपाणिनिनाप्येकत्र आर्यशब्दोल्लेखः कृतः— "आर्यो ब्राह्मणकुमारयोः (६. २. ५८.)"–इति । त इमे आर्यास्तदानी मादर्भविज्ञानादि–ब्रह्मविज्ञानान्तविद्यमा अतिपभ्या अप्यतिप्राचीनाः ब्राह्मणक्षत्रियवैश्येति त्रिविधाः, दस्युदासेति द्विविधासभ्यशूद्रतोऽन्याः, ईश्वरपुत्रा इति व्यपदिष्टा आसन् ; ये खल्वद्य कालचक्रपरिभ्रमणनियमतो लुप्तकल्पवेदविज्ञाना विलुप्तैक्यबला बहिर्वाणिज्यान्तर्वाणिज्यहीनाः सन्त एव मुमूर्षुदशापन्ना मुहुः म्रियन्तीत्येव जीविता इति । अथैत एव "आर्या अत्रावर्त्तन्ते पुनः पुनरुद्भवन्तीत्यार्यावर्त्तः"–इत्याह च मनुटीकायां कुल्लूकः (२, २२.), 'आवर्त्तनं' पुनः पुनर्जन्मग्रहण मिति तदाशयः । अस्मन्मते तु जन्मान्तरस्वीकारेऽपि 'आर्याः' ईश्वरपुत्रा इति व्यपदिष्टा मनुष्याः यत्र 'आ' आभिमुख्येन, प्रधानरूपेण, 'वर्त्तन्ते' विद्यन्ते, निवसन्तीति स एव भूभाग आर्यावर्त्तः । तदेव मार्यावास एव आर्यावर्त्तः ।

स चार्यावासः पूर्वं तावत् हिमवत्पृष्ठस्य दक्षिणभागे सुवास्तुप्रदेशे एवासीदिति गम्यते। श्रूयते ह्यृक्संहितायाम्—"सुवास्त्वा अधि तुग्वनि"–इति (८. २०. ३७.) । व्याख्यातश्चैष ऋगंशो यास्केन —"सुवास्तुर्नदी, तुग्व तीर्थं भवति, तूर्ण मेतदायन्ति"–इति (४, २, ७.) । वास्तुर्वासभूमिः, सा खलु यस्यास्तीरे सुष्ठ्वेव, सा नदी सुवास्तुर्नाम । तत्तीरस्थितो जनपदश्चाभवत् तन्नामतः सुवास्तुरेव । "सुवास्त्वादिभ्योऽण्"–इति (४. २. ७७.) सूत्रदर्शनादव-

गम्यते विदितश्चायं प्रदेशः पाणिनेरपीति। कनिंगहाममहोदयमतेऽद्य 'स्वात्'–इति 'सुवात'–इति वा प्रसिद्धा नद्येव सा सुवास्तुः। सुवास्तुवासकाले एव स्यादियमृक् समाम्नाता (५. ५२. ९)—

"मा वो रसानितभा कुभा क्रुमुर्मा वः सिन्धुर्निरीरमत्।
मा वः परिष्ठात् सरयुः पुरीषिण्यस्मे इत् सुम्न मस्तु वः"–इति॥

अस्यार्थः।—'अस्मे' अस्माक मियम् 'अनितभा' अगतप्रभावा सर्वत्तुषु अतिप्रभावा 'रसा' नदी 'वः' युष्मान् 'मा निरीरमत्' अतिरमणस्य अत्यानन्दतो विहरणस्य बाधां जलप्लावनादिजन्यां मा कुर्यात्। कुभा' कुत्सितप्रभावा नदी च 'वः' 'मा निरीरमत्'। 'क्रुमुः' नदी च 'वः मा निरीरमत्'। 'सिन्धुः' क्रुमुसङ्गतः सिन्धुनदोऽपि 'मा वः निरीरमत्'। ततः क्रुमुसङ्गतसिन्धुतः 'परिष्ठात्' परस्थिता 'पुरीषिणी' सदैव सजला 'सरयुः' नदी च 'वः' युष्माकम् 'सुम्नं' सुखम् 'इत्' एव 'अस्तु'।

एतस्माट्टङ्कान्तात् पूर्वतनार्यावासस्य तस्य चतुस्सीमनिर्देशोऽपि व्यज्यते। तथा च तस्मादुज्जिहानप्रदेशीयसुवास्तुनदीतीरस्थसुवास्तुजनपदात् बह्वुत्तरस्थातिप्रभावा रसा नद्येव तदुत्तरसीमा; इदानीं काबुल् नदीति प्रसिद्धा हीनप्रभावा कुभैव स्यात् तत्पश्चिमसीमा; तक्षशिलाप्रदेशीया सरयूरेवासीत् तत्पूर्वसीमा (न चात्रोत्तरकोशलप्रदेशीया सरयूरुपपद्यते, कुभेत्यादिसाहचर्य्यात्, अर्थज्ञाने साहचर्यस्यापि नियामकत्वं मन्तव्य मेव; अन्यथा हि रामलक्ष्मणावित्यत्र जामदग्न्यकृष्णाग्रजयोरन्यतरस्यापि बोधः स्यात्); अथ कुभाया नीचैः क्रुमुसिन्धुसङ्गम एव तद्दक्षिणसीमेति सम्पद्यते सुतराम्।

यदा हि सुवास्तुतः पश्चिमस्यां दिश्यवस्थितो निषधपर्वतोऽप्य-

भूदार्यावासस्तदाप्ययं सुवास्तुप्रदेश एवासीत् तदीयपूर्वसीमेत्यपि गम्यतेऽपरमन्त्रेभ्यः। तथाहि मं० १, १०४ सूक्तं द्रष्टव्यम्। तत्र प्रथममन्त्रे "योनिष्ट इन्द्र निषदे अकारि"-इति श्रुत्या निषद-स्यार्याधिकृतत्वं गम्यते। अतएव शतपथेऽपि श्रुतम्—"नड़ो नैषिधः"-इत्यादि (३, २, २, १, २,)। ततश्चतुर्थमन्त्र एषः—

"युयोप नाभिरुपरस्यायोः प्रपूर्वाभिस्तिरते राष्टि शूरः।
अञ्जसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरन्ते"-इति।

अस्यार्थः—'उपरस्य' उपलस्य पर्वतस्य सम्बन्धीति यावत् 'नाभिः' प्रधानावासो योऽस्ति, तम् 'शूरः' विक्रान्तः 'आयोः राष्टिः' मनुष्यराजः कश्चनार्यः 'युयोप' रक्षति। तञ्हि नगरं काले काले 'पूर्वाभिः' प्राग्वहमानाभिर्नदीभिः 'प्रतिरते' प्लवमाना भवति, तत एवापदः स राजा तन्नगरं रक्षतीत्यभिप्रायः। काश्च ताः प्राक् प्रवहमाना नद्य इत्याह—"अञ्जसीत्यादि। 'अञ्जसी' सुवास्तुतः ऐशान्यां दक्षिणाभिमुखी वहमाना, 'कुलिशी' सुवास्तुतो वायव्यां दक्षिणाभिमुख्येव वहमाना. 'वीरपत्नी' सुवास्तुत आग्नेय्यां दक्षिणा-भिमुख्येव वहमाना, एतास्तिस्रो नद्यः 'पयो हिन्वानाः' सत्यः 'उदभिः' प्रवहोदकैः 'भरन्ते' प्लावयन्ति, तं नाभि मिति।

ततः क्रमात्सुवास्तुतः प्राग्दक्षिणस्या मपि बहुदूरस्थां श्रीकण्ठ-शैलसमुद्भूतां जह्नुमुन्याश्रमतलवाहिनीं जह्नावीं यावदार्यावासः सम्पन्नः। अत एवैषा ऋगाम्नाता (३, ५८, ६,)—

"पुराणे मोकः सख्यं शिवं वां युवोर्नरा द्रविणं जह्नाव्याम्"-इति।

जह्नावी जाह्नवीत्यनर्थान्तर मित्यस्माकम्। प्रसिद्धेषा नदी भागीरथ्याः शाखाविशेषेत्युत्तराखण्डेऽद्यापि। जाह्नवप्रदेशस्य पुराणोकत्वान्नान मिदं नूनं व्यक्तिगतं न तु सार्वजनीन मिति

च वेदितव्यम्। जङ्गावीतीरस्थो जाङ्गवप्रदेशः खल्वद्यतनपांचकोरायाः प्राक्, सिन्धुतः प्रत्यक् बुनार् (वर्णु) प्रदेशतश्चोदक् स्थित इति विश्वकोषसम्पादको वसुदासः। एवञ्च सुवास्तुसन्निहितेयं जङ्गावी इति स्वीकृतेऽपि न नः क्षतिः।

तत एव आर्यावासः सारस्वतप्रदेशेषु विस्तीर्णः। इहैव बहव ऋङ्मन्त्राः यजुर्मन्त्राः सामगानमन्त्राः आथर्वणमन्त्राश्च समाम्नाताः, यागविधयश्चात्रैव समुद्भूताः परिपुष्टा वा; आर्यसाम्राज्यञ्चेहैव प्रथमं विश्रुतम्। अतएव सर्ववैदिकग्रन्थेषु सरस्वतीनामाख्यानादिकं बहुत्रैव श्रूयते। तद्यथाश्वलायनशाखायाम्—१. ३. १०–१२; २. ३०. ८; ४१, १६–१८; ६. ६१; ७. ८५, १. २. ४–६; ८६. १–३; १०. १७. ७–८ इत्येवमादयः समालोच्याः। तदेतस्य सारस्वतप्रदेशस्य यागभूमित्वेन प्रशंसनमप्यनेकत्र श्रूयते। तद्यथा (२. २३. ४.)—

"नि त्वा दधे वर आ पृथिव्या इळायास्पदे सुदिनत्वे अह्नाम्।
दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि"—इति।

अस्यार्थः।—'इडायास्पदे' शस्यबहुले, अतएव 'पृथिव्याः वरे' उत्कृष्टप्रदेशे हे 'अग्ने!' 'रेवत्' रेवान् धनवानहं 'त्वा' त्वां 'आ' आभिमुख्येन 'निदधे' स्थापयामि। कश्च सः शस्यबहुलः पृथिव्या वरः प्रदेश इत्याह—'दृषद्वत्यां', 'आपयायां', 'सरस्वत्याम्' इति; दृषद्वतीतीरत आरभ्य सरस्वतीतीरं यावत् त्रिनदीतीरप्रदेशः, सर्व एव ब्रह्मावर्त्तः। 'मानुषे' जनपदे तादृशे त्वं 'दिदीहि' दीप्यस्व। अत एवोक्तं मनुना—"सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते"—

इति (२. १७.)। किमर्थं त्वां निदध इत्याह — 'अह्नां सुदिनत्वाय' – इति। जीवत्कालानां सुप्रभातीकर्त्तुमित्यर्थः।

ततो यदा एष आर्यावर्त्तो बहुविस्तृतस्तदैव त्रिसप्तनदीभिः परिव्याप्त इति वर्णित मस्या मृक्संहितायाम्। तथा चास्ति शाकलसंहितायां दशममण्डले नवर्च्च मेकं सूक्तम्, तद्धि नदीस्तुतिपर मिति नदीस्तुदिति भाष्यते, ततस्तदानीन्तनार्यावर्त्तप्रधाननदीवर्णनञ्च लभ्यते। तस्येयं पञ्चमी ऋक्—(१०. ७५.)।

"इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणोह्या सुषोमया" – इति।

अत्र श्रुता गङ्गा (१) नदी त्वस्मद्देशेऽतीव प्रसिद्धा। ततः पश्चिमस्था यमुना (२)। ततः पश्चिमस्था सरस्वती (३)। ततः पश्चिमस्था शुतुद्री (४), याद्य शतद्रुरित्युच्यते। ततः पश्चिमस्था परुष्णी, सैवेरावतीत्युक्ता यास्ककाले (निरु० ९. ३. ५.), एतर्हि त्वैरावतीति। ततः पश्चिमस्था असिक्नी, सैव चन्द्रभागेत्युच्यते। ततः पश्चिमस्था वितस्ता। ऐरावती, चन्द्रभागा, वितस्तेति तिसृणा मासां नीचैः सम्मिलनतो याभूदतिप्रसारा मालवदेशीय-कश्यपपुरतः पश्चिमस्यां दक्षिणाभिमुखी महानदी, सैवेह मरुद्वृधेति पञ्चमी (५)। अपि तस्यैव कश्यपपुरतः प्राक्प्रवाहिता या शुतुद्री (शतद्रुः) पूर्व मिह वर्णिता, तस्या एव शतद्रोरुपरिष्टात् पश्चिमपार्श्वतः सङ्गता च प्राचीनतमा आर्जीकीया (६); उरुञ्जिरेत्यप्यस्याः प्राचीनतरं नाम, इय मेव विपाड़ित्युक्ता यास्ककाले (निरु० ९. ३. ५०), विपाशा-नामिका चेय मिदानीम्। ततोऽपि पश्चिमस्था सुषोमा (७), येयं तक्षशिलानामप्रदेशान्निम्नगामिनी सिन्धुसङ्गता। एता एव सप्त नद्यो यावद्भूभागेषु प्रवहन्ति, तावानेव

प्रदेशः सप्तनद इति सप्तसिन्धुरिति वा ख्यायते। सिन्धुश्चेह नदी-पर्यायः। तासु गङ्गायमुने विहाय याः पञ्च नद्यो यावत्सु भूभागेषु प्रवहमानाः सन्ति, स एव पञ्चनद इति, सारस्वतप्रदेश इति चेति सङ्क्षेपः। ऋक्संहिताया मन्त्र मेकं (३. २३. ४.) प्रदर्श्य यदिह वर्णितो ब्रह्मावर्त्तप्रदेश, ततः परस्तादेष एव प्रदेशः पुण्य-भूरिति परिगण्यते। तथा हि मनुसंहितायाम्—

"कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः"—इति (२. १९.)॥

वर्णित एष सप्तनदप्रदेशः सिन्धोः पूर्वपारस्थः; एवं सिन्धोः पश्चिमपारस्थोऽपि विद्यतेऽपरः सप्तनदप्रदेशः। स ह्येदानी मार्या-वर्त्तादू बहिर्भूतोऽप्यासीत् पुरा आर्यावर्त्तान्तर्गतः। अतएव संहि-ताया मित उत्तरं षष्ठ्या मृचि तत्स्थाना मपि सप्तानां नदीनां वर्णनं श्रूयते। तथाहि—

"तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या।
त्वं सिन्धो कुभया गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे॥"

इत्यस्मिन् मन्त्रे तृष्टामा प्रथमा, सुसर्त्तुः द्वितीया, रसा तृतीया, श्वेती चतुर्थी, कुभा पञ्चमी, गोमती षष्ठी, मेहत्नुयुता क्रुमुः सप्तमी। इमाः सर्वा एव सप्त नद्यो मध्यहिमालयोत्पन्नस्य पूर्वं पश्चिमाभिमुखगामिनः पश्चात् दक्षिणप्रवाहिनः समुद्रगस्य सिन्धु-नदस्य पश्चिमस्यां पूर्वदक्षिणाभिमुखं स्यन्दन्त्यः सन्त्यन्यनामतः। तत्रेदानीं चित्रलदेशतः प्राग् वहमाना पञ्चकोर् प्रदेशीया तत्रवयवा नद्येव स्यात् 'तृष्टामा'; 'सुसर्त्तु'—इति सुवास्तोर्नामान्तरम्, यदद्य स्वादित्युच्यते; 'रसा' त्विहापि पूर्ववर्णितैव (२३ पृ० १६ पं०); 'श्वेती' स्यादद्यतन-डेराइस्माइल्खां-प्रदेशतलवाहिनी अर्जुनी;

'कुभा' = काबुल् ; 'क्रुमुः' वर्णु-प्रदेशवाहिनी कुरम् ; 'गोमती' सम्प्रति गोमलिति प्रसिद्धा। एताः दृष्टामाद्याः नद्यः सप्तैव साक्षात् परम्परया वा सिन्धुसङ्गताः ॥

तदेवं चित्रलप्रदेशतः प्राक्, बेलुचिस्थानादित ऊर्द्धं च यावत् पश्चिमोत्तरस्यां य आसीत् सुविस्तीर्णः पुरातन आर्यावर्त्तांशः स एष एव पश्चिम-सप्तनदप्रदेश इति वक्तुं युज्यते। किञ्च यथा पूर्वसप्तनदान्तर्गतः पञ्चनदप्रदेशस्तथैव पश्चिमसप्तनदान्तर्गतः (आफगान्) पञ्चकोरप्रदेशोऽपीति। अतो गान्धारस्यार्यावर्त्तान्तर्गतत्वं सुतरां सम्पन्नम्। ततः सङ्गच्छते "गन्धारीणा मिवाविका (ऋ० सं० १. १२६. ७.)"-इति संहितावचनम्, उपपद्यते च "नग्नजिते गान्धाराय (ऐ० ब्रा० ७. ५. ८.)"-इति ब्राह्मणवचनम्, तथा "साल्वेयगान्धारिभ्याञ्च (४. १. १६८.)"-इति पाणिनिवचनञ्च। कुरुराजधृतराष्ट्रपत्नी दुर्योधनादिबहुपुत्रप्रसविनी गान्धारी तु भारतप्रसिद्धैव। वर्णुप्रभृतीना मायुधजीवित्वेन वर्णनञ्च पाणिनेर्द्रष्टव्यम् ॥

एतयोः पूर्वापरसप्तनदप्रदेशयोर्मध्ये मध्यहिमवत्समुद्भवोऽवाक् प्रवणः ससुद्रान्तः प्राचीनार्यावर्त्तविधाकृदतिप्रबलः सीमदण्ड इवैष सिन्धुर्नामेको नदोऽद्यापि राजते।

तस्यास्य सिन्धोरतिदूरपश्चिमस्या मत्युत्तरस्याश्चान्यासां सप्तानां नदीनां विद्यमानतापि श्रूयते ; तदस्यैव नदीसूत्सूक्तस्य सप्तमाष्टम्योर्ऋचोः समालोच्यं सप्रणिधानम्। तास्वेका 'ऊर्णावती', स्यादेषा कैलाशनिम्नस्थोर्णाप्रदेशीया ; हिरण्मयी, वाजिनीवती, सीलमावतीत्येता अपि तिस्रः स्युरत्युत्तरस्या एव ; 'एनी' नदी तु निम्नबेलुचीस्थाने प्रसिद्धैव ; तथा चित्रा च चित्रलप्रदेशत आगत्य

कुभायां मिलिता; 'ऋजीती' अपि स्यात् तत्समीपवाहिनीति सम्भाव्यते।

एतदुक्तत्रिसप्तनद्यपेक्षया सिन्धोर्नदस्य प्राधान्यं च वर्णितं तत्रैव सूक्ते प्रथमम्। तद्यथा तत्सूक्तीयप्रथमर्च: परार्ध एष:—

"प्र सप्त-सप्त त्रेधा हि चक्रमु: प्र सृत्वरीणा मति सिन्धुरोजसा"

अस्यार्थ:।—'आप:' नद्य: 'सप्त सप्त' भूत्वा 'त्रेधा' त्रिधा त्रिश्रेण्य: सत्य: 'प्रचक्रमु:' प्रावहन् प्रवहन्ति, अस्मिन्नार्यावर्त्ते; सिन्धो: पूर्वस्यां सप्त, पश्चिमस्यां सप्त, उत्तरस्याञ्च सप्तेति। तासां 'सृत्वरीणां' एकविंशतिसङ्ख्याकानां नदीनाम् 'ओजसा' बलेन 'अति' अतिशयित: एको नद: 'सिन्धु:'।

तासा मेव त्रिसप्तनदीनां पुत्र इव राजेव च सिन्धुर्वर्णितस्तत्रैव चतुर्थ्या ऋचि—

"अभि त्वा सिन्धो शिशु मिव मातरो
वाश्रा अर्षन्ति पयसेव धेनव:।
राजेव युध्वा नयसि त्व मित् सिचौ
यदासा मग्रं प्रवता मिनक्षसि"-इति।

अस्यार्थ:।—हे 'सिन्धो'! 'मातर: शिशुं न (इव)' इमा नद्य: 'त्वा अभ्यर्षन्ति' त्वां पय: पाययितु मिवाभितो गच्छन्ति, 'पयसा' युक्ता: 'वाश्रा: धेनव:' सुशब्दकारिण्योऽचिरप्रसूता गाव इव च। 'त्वं' 'युध्वा' युद्धकारी 'राजा इव' इमौ पूर्वापर-नदीसप्तकौ 'सिचौ' सेनानिवेशाविव 'नयसि इत्' प्रेरयस्येव; 'यत्' यत: 'आसां प्रवतां' प्रवहन्तीनां नदीनाम् 'अग्रम् इनक्षसि' अग्रगो भवसि, अत इति भाव:।

अन्यत्र चात्र संहितायां त्रिसप्तनदीनां श्रवण मस्ति। तद्यथा —"त्रिः सप्त सस्रा नद्यः"–इति ऋ० सं० १०. ६४. ८।

तत्त्वतस्त्वेतत्त्रिसप्तनदीपरिवृतः सिन्धुमध्य एवासीत् पूर्वकालिकः आर्यावर्त्तः। अत एवैतरेयके श्रुतम्— "यस्तेजो ब्रह्मवर्चस मिच्छेत्०–० प्राङ् स इयात्, योऽन्नाद्य मिच्छेत्०–० दक्षिणा स इयात्, यः सोमपीथ मिच्छेत्०–० उदङ् स इयात्"–इति (१. २. २.)। प्रागादिदिक्शब्दाश्च कञ्चिदवधि मपेक्षन्ते, कुतः प्रागित्याद्याकाङ्क्षायाः सर्वत्रोपजायमानत्वात्। तदत्र आर्यावर्त्तीयसिन्धुमध्य मेवावधिं मन्यामहे, तस्मात् सिन्धुतः प्रागित्यादिस्वीकारेणैव तेजस्त्वादिसिद्धुपपत्तेः। तथा च सिन्धोः प्राग्देशेषु सरस्वत्यादितीरभूमिषु यज्ञानुष्ठानबाहुल्यश्रुतेस्तेजस्त्वब्रह्मवर्चस्त्वयोर्लाभः समुपपद्यते; शतद्रुसङ्गमसिन्धुतो दक्षिणस्यां हिमप्राचुर्याभावात् तापप्राबल्यात् भवत्येव प्रचुरान्नस्योत्पत्तिः; सिन्धुतः पश्चिमस्या मरण्यप्राचुर्यात् तत्र पशुलाभः सम्भाव्य एव, शतद्रुसिन्धुसङ्गमादुत्तरस्या मतिशैत्यात् सोमस्य च शीतप्रभवत्वात् वल्लीसोमस्य लाभः, शारीरसोमस्य च वृद्धिर्भवेदेवेति। तदित्थ मतिप्राक्तनार्यावर्त्तस्यायं सिन्धुर्मेरुदण्ड इवासीदिति प्रतीयते। इत एव सकारादेर्हकारादुच्चारणकृद्भिः पाश्चात्यैरिदं भूखण्डं सिन्धुस्थान मिति वक्तव्ये हिन्दुस्तानित्युच्यते।

किञ्चात्र सिन्धुसङ्गतातिविक्रान्ता यासीद्वदी रसेति विश्रुता, द्वितीयनदीसप्तके तृतीयेति च वर्णिता, सैवासीत् तदानीन्तनार्यावासस्योत्तरसीमेति गम्यते। तथा ह्यनुक्रान्त मिदं शौनकाचार्येण—'किमिच्छन्ती पणिभिरसुरैर्निगूढ़ा गा अन्वेष्टुं सरमां देवशुनी मिन्द्रेण प्रहिता मयुग्भिः पणयो मित्रीयन्तः प्रोचुः, स

तान् युग्मान्त्याभिरनिच्छन्ती प्रत्याचष्टे"–इति। तस्यैतस्येदं सायणकृतं भाष्यम्— "इन्द्रपुरोहितस्य बृहस्पतेर्गोषु बलनाम्नोऽसुरस्य भटैः पणिनामकैरसुरैरपहृत्य गुहायां निहितासु सतीषु बृहस्पतिप्रेरितेनेन्द्रेण गवा मन्वेषणाय सरमा नाम देवशुनी प्रेषिता। सा च महतीं नदी मुत्तीर्य बलपुरं प्राप्य गुप्तस्थाने नीतास्ता गा ददर्श। अथ तस्मिन्नन्तरे पणय इदं वृत्तान्त मवगच्छन्त एनां मित्रीकर्त्तुं संवाद मकुर्वन्। तत्र प्रथमतृतीयाद्या अयुजोऽन्त्यावर्जिताः पणीनां वाक्यानि,०—०, द्वितीयचतुर्थ्याद्या युज एकादशी च षट् सरमाया वाक्यानि"–इति। वस्तुतोऽत्र पणयः=वणिजः, सार्थवाहा इति यावत्; "पणिर्वणिग् भवतीति (२. ५. ३.) नैरुक्तात्। असुराः=बलवन्तः (निरु० ३. २. २.)। नून मेते इह आर्येतरा एव बुध्यन्ते। सरमा देवशुनी दिव्यगुणोपेतास्तन्नामिका सुशिक्षिता कुक्कुरी; बलपुरीस्था गुहा तु नून मार्यशासनाद्बहिस्था; तथाचानार्यैरपहृता आर्यगावः कुक्कुरीसन्धानेन पुनर्लब्धा इत्येवात्र सारम्, सर्वं मन्यत् राजनैतिकं काव्यम्। तदिदं काव्य मृक्संहिताया दशमे मण्डले एकादशभिः ऋग्भिर्वर्णितम् (१०. १०८. १-११.)। तस्यादिमैषा—

"किमिच्छन्ती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः।
कास्मे हेतिः का परितक्म्यासीत् कथं रसाया अतरः पयांसि"
–इति।

तदित्थं ज्ञायते, या खलु पूर्वं सुवास्तुप्रदेशस्योत्तरसीमेति वर्णिता, सैवेयं प्रचुरोदका प्रभूतवेगा च नदी पुरासीदार्यानार्यदेशयोः सीमरूपेति।

सेयं 'रसा' ऋक्संहितायां बहुशो वर्णिता। तद्यथा ८. ४९. २—

"गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः"—इति।

यथा गिरेः' 'रसाः' नद्यः 'प्रपिन्विरे', 'अस्य पुरुभोजसः दत्राणि' तथैव प्रपिन्विरे इति तदर्थः। एतेनावगम्यते रसायाः कस्माच्चिद् गिरित एव समुद्भवः। अपि यथा सिन्धोः पूर्वप्रदेशीयसप्तनदीषु 'गङ्गा' एकापि, अन्यासामपि नदीनां निराबाधैवास्ति गङ्गेति प्रसिद्धिः; 'सरस्वती' एकापि प्राधान्याद् बह्वीनां मध्यन्यासां नदीनां वाचिका; तथैव सिन्धोः पश्चिमप्रदेशीयसप्तनदीषु एकापि 'रसा' बह्वीनां मध्यासाञ्च नदीनां वाचिका भवति। किञ्च यथा गङ्गेति नदीनां साधारणं नाम, यथा च सरस्वतीत्यपि, तथैव रसेति च। अत एव निरुक्ते यथा गङ्गाशब्दस्य 'गङ्गा गमनात्'—इति निरुक्तिः कृता, यथा च सरस्वतीशब्दस्य 'सरस्वती' सर इत्युदकनाम; सर्त्तेस्तद्वती—इति निरुक्तिः कृता; तथैव रसाशब्दस्यापि 'रसा नदी, रसतेः शब्दकर्मणः'—इति कृतैव नदीसाधारणबोधिका निरुक्तिः। एवं मध्येवमादिषु योगरूढ्यैवार्थः सर्वत्र विवक्षितः। निरुक्तकृतः प्रदर्शितरसानिरुक्तेस्तस्या नद्याः सदैव शब्दकारित्वञ्चावगम्यते। प्रदर्शितेऽत्र ऋङ्मन्त्रे 'रसाः'—इति बहुवचनश्रुतेस्तद्बहुत्वमपि गम्यते। तथा च यथा हिमवत्पृष्ठेषु बह्वो गङ्गाः सन्ति, यथा च सरय्वा अपि द्वित्वमिहैव पुरस्तादुररीकृतम्, तथैव रसाबहुत्वमपि स्वीकार्यम्। रसाद्वित्वन्तु नूनमङ्गीकार्यम्; प्रदर्शिते "तृष्टामया (१०. ७५. ६.)"—इति मन्त्रे तस्याः सिन्धुसङ्गतत्वस्य, "समुद्रं रसया सहाहुः (१०. २२. ४.)"—इति मन्त्रे तस्याः समुद्रसङ्गतत्वस्य च स्फुटाव-

गमात्। समुद्रसङ्गता तु सा अद्यतनार्यावर्त्ततो बहिष्ठा, खोरा-शान्-राज्यान्तर्गता 'आवेस्ता'-ग्रन्थवर्णिता, 'रंहा' इत्याह विश्व-कोषकारः। तथा चेयं रसा तदानीन्तनार्यावासस्य पश्चिमसीमेति च स्यात् पूर्वदर्शित-देवशुनीपणिसंवाद एतद्विषयको वेति।

अंशुमत्याद्या नद्यस्त्वेतदार्यावर्त्तीया एवेत्यत्र किमस्ति वक्तव्यम्। "अंशुमती" ऋ० सं० ८. ९६. १३, १४. १५ ऋचो द्रष्टव्याः। सेषा यमुनासङ्गता, दृषद्वतीतः प्राक् स्थिता। "अश्मन्वती" च ऋ० सं० १०. ५३. ८। एषा किल घर्घरातः प्रत्यक्, शतद्रुतो बहुप्राक्, उत्तरतोऽवाग् वहमाना, विनशनप्रदेशीया।

यदिह नदीपरपारगमनं श्रुतम्, तन्नूनं मध्येशियातः समा-गतानां पूर्वतनार्याणां वच इति जर्म्मनादिपाश्चात्यसिद्धान्तोऽनर्थको निर्मूलश्च; स्थानीयार्याणां वच एवेत्युक्त्यैव तथोपपत्तेः किं महतो वंशस्तम्बाल्लद्वानुकर्षणेनेति सुधीभिर्विभाव्यम्। ऋ० सं० १. १०४. १, २, ३ ऋक्षु वर्णिता शिफा नाम नदी तु निषधदेशीयैव सम्भाव्यते। तत्प्रथमर्च्येव निषदनामोल्लेखदर्शनात्। ऋ० सं० ६. २७. ६, ७ ऋग्द्वयश्रुते 'हरियूपीया' 'यव्यावती' च नद्यौ आफगानस्थानीये एव सम्भाव्येते। तत्रच तत्रत्य-'हजारा'प्रदेशीया सम्प्रति हरिरुदित्युच्यमाना नद्येव स्यात् वैदिकहरियूपीयेति।

"पीवानं मेष मपचन्त वीरा न्युप्ता अक्षा अनु दीव आसन्।
द्वा धेनुं बृहती मप्स्वा१न्तः पवित्रवन्ता चरतः पुनन्ता"-इति।

अस्मिन् मन्त्रे (ऋ० सं० १०. २७. १७.) अन्यत्र च यद् ध्वन्यते अक्षा इति, तदपि स्यात् आफगानुत्तरत्र प्रवहमाना 'अक्षस्' नदीति च सुवचम्।

श्वेती नद्येव सम्प्रत्यर्जुनीत्युच्यत इत्युक्तं पुरस्तात् (पृ० २७

पं२४) ; सा हि श्वेतपर्वतान्निर्गतेत्येव तस्यास्तथा नाम सम्पन्नम् । आम्नातञ्च शतपथे— "प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्याः"–इति १४. ६. ८. ९ । ऋक्संहितायां नून मेषेवाम्नाता "श्वेत्या त्या"–इति १०. ७५. ६ । श्वेतयावरी नद्यपि स्यात् तच्छ्वेतगिरिप्रभवैव । तदिदं श्रूयते— "उत स्या श्वेतयावरी"–इत्यादि ८. ३६. १८ । अपि संहितायां सरयुनदी त्रिः श्रुता (४. ३०. १८ ; ५. २२. ९ ; १०. ६४. ९.) तत्र सर्वत्रैव सिन्धुसङ्गता तच्छिलानामनगरीतलवाहिन्येव गम्यते । अपि यच्छ्रूयते वाजसनेयिसंहितायाम्— "काम्पिल्यवासिनी"–इति (२३. १८.) सैषा काम्पिल्यनगरी प्रवराध्यायवचनात् दृशार्णप्रदेशतः प्रागिति गम्यते, अद्यापि कम्पिलेत्येव प्रसिद्धा दक्षिणपाञ्चालस्था । साङ्काश्यनगर्यप्यपि तन्नेर्ऋतेऽस्ति । बृहदारण्यकोक्तः कपिप्रदेशोऽपि (३. ३. १ ; ७. १. ६. ५. १.) तत्सन्निहित एव । निरुक्तोक्तः कपिष्ठलोऽप्यत्रैव (४. १४.) । अनतिप्राचीनपुराणेतिहासवर्णिता यत्नु-वत्नु-सीता-गौर्यादयस्तु आर्यपरिव्राजकविज्ञाता अपि नास्मत्पूर्वतनार्याणां निकेतनभूमयः । तत्वतो या पुनर्नद्यो हिमवत्पृष्ठोत्तरभागतः प्रवहमानाः प्राच्यप्रतीच्योदीच्यभूखण्डगताः, ताः सर्वा एवान्यदेशीया इति ध्रुवम् ; अपि यास्तु हिमवत्पृष्ठदक्षिणभागतः प्रवहमानाः प्रागपाग्भूखण्डगतास्ताः सर्वा अस्मद्देशीया एव ; विन्दुसरोमानससरोरावणह्रदादयोऽप्यार्यपरिव्राजकपरिचिता अपि नास्मद्देशीयाः किं मत्र चिन्तनीय मस्ति । शर्यणावत्सरस्तु नून मार्यावर्त्तीयम् । तदाहुः शाट्यायनिनः— "शर्यणावद्ध वे नाम कुरुक्षेत्रस्य जघनार्द्धे सरः स्यन्दते"–इति ऋ० सं० १. ८४. १३ सा० भा० द्रष्टव्यम् ।

पाणिनिसूत्रग्रथितं कापिशनगरमप्येतत्सन्निधावेव। तत्र मधुद्राक्षे च भवत उत्कृष्टतरे, तत एव तदुदाहरणद्वयं दर्शितम् 'कापिशायनं मधु, कापिशायनी द्राक्षेति। श्रूयते चैष मन्त्रः (ऋ० सं० १०. ३४. १.)—

"प्रावेपा मा बृहतो मादयन्ति
प्रवातेजा इरिणे वर्वृतानाः।
सोमस्येव मौजवतस्य भक्षो
विभीदको जागृविर्मह्य मच्छान्"—इति।

'प्रावेपाः' सततकम्पनशीलपत्राः, 'प्रवातेजाः' अपरवनस्पत्यादिशून्ये बहुवायुयुते प्रान्तरे जनिष्णवः 'इरिणे' इरानन्नामपारस्यदेशे 'वर्वृतानाः' अधिकतया वर्त्तमानाः 'बृहतः' विभीदकवृक्षाः 'मा' मां मादयन्ति। 'जागृविः' भक्षयितुर्जागरणहेतुः, 'विभीदकः' कोष्ठस्य मलस्य वायोश्च भेदनकारी, अयं 'मौजवतः' मूजवन्नामपर्वतोत्पन्नस्य सोमस्य 'भक्षः' भक्ष्योंऽशः 'इव' 'मह्यम्' 'अच्छान्' छादयति, मोहयतीति।

इरिण मित्यस्य यास्केन द्विविधा व्याख्या कृता—'इरिण मृणातेरपार्णं भवति, अपरता अस्मादोषधय इति वा'—इति (९. १. ७.)। तयोराद्योऽर्थ एवात्र उपपद्यते; तद्देशीयानां हि भारतीयाना मिव पुत्रपौत्रादिष्वपि पितृपैतामह मृणं न सङ्क्रमत इति दर्शनात्। मूजवान् पर्वतस्तु कैलाशगिरेः पश्चिमस्थोऽद्यापि राजते।

तदेव मृक्संहिताकाले ईरान्-नाम-जनपदस्य चार्य्यावर्त्तीयत्वं तथा मूजवतोऽपीति स्यान्मन्तव्य मिति।

अथर्वसंहितायाः पञ्चमकाण्डीयचतुर्दशर्चद्वाविंशतितमसूक्तस्य

तृतीयमन्त्रे परुषनामजनपदस्य, चतुर्थे महावृषप्रदेशस्य, पञ्चम-षष्ठमयोः मूजवत्प्रदेशस्य बह्लिकदेशस्यापि, अष्टमे पुनर्महावृषमूज-वतोः, नवमे पुनरेव बह्लीकस्य, चतुर्दशे त्वन्तिमे अङ्ग-मगध-मूज-वद्-गन्धारीणां च श्रवण मस्ति ; पर मुक्ता इमे सर्व एव जनपदा-स्तदानी मार्यवासा इत्येव गम्यते ; न ह्यन्ययेषु तत्स्थापन मभीष्टं भवेदिति । तद्यथा तद्वतुर्थमन्त्र एषः—

"गन्धारिभ्यो मूजवद्भ्योऽङ्गेभ्यो मगधेभ्यः ।
प्रेष्यं जन मिव शेवधिं तक्मानं परिदद्मसि"—इति ।

न ह्यार्यवास्तव्येषु तक्मस्थापन मिष्टं स्यादाथर्वणिकानाम् ।

नन्वेवं परुष (पेशावर)देशस्य, गान्धार (कन्दाहार)प्रदेशस्य, पूर्वमुक्त मार्यावर्त्तान्तर्गतत्वं किं न विरुध्येत ? अत्र ब्रूमः । तयो-रार्यावर्त्तान्तर्गतत्वेऽपि एतन्मन्त्रदृक् कालेऽनार्यवासत्वे कोऽस्ति बाध इति ; कालभेदात् सर्वसामञ्जस्यं भवेदेवेति । न चैव मप्यथर्व-संहिताया ऋक्संहितातो विभिन्नकालिकत्वं मन्तव्यं स्यात् ; मन्त्राणा मेव प्रकाशकालपार्थक्यस्वीकारात् तदुपपत्तेः । स्वीकृतञ्चै-तदस्माभिर्निरुक्तालोचने (ठ पृ०) 'वस्तुत एक एव वेदः'—इत्यारभ्य (ठ पृ०) 'चत्वार एव वेदास्त्रयीशब्दवाच्याः'—इत्यन्तेन, पुनः (त पृ०) 'यास्केन'—इत्यारभ्य (ते पृ०) 'पुरा तु बहुकाल मभि-व्याप्य बहुभिर्ऋषिभिर्बहुभिरेवोच्चावचैरभिप्रायैः प्रणीता बहवो मन्त्राः'—इत्यन्तेन च ।

प्रदर्शितं मूजवन्नाम तु ऋक्संहितायां (१०. ३४. १) श्रूयते इति सत्यम् ! परं न तथापि मूजवत्पर्वतस्यार्यावासत्वं प्रतीयते, प्रतीयते तु तत्रत्यसोमाना मौत्कर्षमात्रम् । यच्चाथर्वणिका मन्त्रानम्—"उदङ् जातो हिमवतः स प्राच्यां नीयसे जनम्"—इति

(५. ४. ८.), अस्मादपि तत्रत्यकुशस्योत्कर्षमात्रं गम्यते। सोमस्यानार्याधिकृतत्वन्तु ऐतरेयब्राह्मणे पि सुव्यक्तम्। एवं महाव्रषस्यापि सिद्धान्तः कृत एव। श्वेतपर्वतादपि प्रतीच्यस्य बह्लिकस्य तु यदार्यावासत्वं प्रतीयते "बह्लीकः प्रातिपीयः शुश्राव"-इत्यादि (शत० ब्रा० १२. ३. ३.) श्रुतितः, तस्यापि कालभेदतो व्यवस्थैव स्वीकार्या; अपि वा तस्यार्याभिजनत्वे च न कमपि बाधं पश्यामः। अङ्गराज्यस्य चासीत् तदानीमनार्यत्व मेव; कुरुराजदुर्योधनकालत एव तस्याभवदार्यावर्तान्तर्गतत्वम्। मगधस्य त्वनार्यवासत्वेन निन्दा श्रूयते ऋक्संहिताया मपि।

तथाहि (ऋ० सं० ३. ५३. १४.)—

"किं कृण्वन्ति कीकटेषु गावो
नाशिरं दुह्रे न तपन्ति घर्मम्"-इति।

निरुक्तकारेण चैतदाख्याया मुक्तम्—"कीकटो नाम देशोऽनार्यनिवासः"-इति (६. ६. ४.)। कीकट एव मगधः; अस्ति हि स्मृतिवचनम्—"कीकटेषु गया पुण्या, पुण्या नदी पुनःपुना। च्यवनस्याश्रमं पुण्यं पुण्यं राजगृहं वनम्"-इति, गयादयस्तु मगधराज्यान्तर्गता इति प्रसिद्ध मेवेति॥

तत्रतो हिमवत्पृष्ठमध्यस्थो मूजवान्नाम नगराजस्तु स्यादार्यवासोऽनार्यवासो वा, पर मासीत् पुरार्यावर्त्तोत्तरसीमेति तु मन्तव्य मेव। अत एव वाजसनेयिनः समामनन्ति—"एतत् ते रुद्रावसम्, तेन परो मूजवतोऽतीहि"-इति (सं० २. ६१)। एतस्यैव यजुषो व्याख्यान मिदं शतपथे। तथाहि—"अवसेन वा अध्वानं यन्ति, तदेनए सावस मेवान्ववार्जति यत्र यत्रास्य चरणं, तदन्वत ह वा अस्य परो मूजवतोऽतीहि"-

इति (२. ६. २. १७)। तदेव अत्र मन्ये रुद्रनामसृत्यु-देवताया मूजवतः परपारे गमनप्रार्थनात आर्यावर्त्तत एव दूरगमनं प्रार्थितं गम्यते ॥

तदेव मयतनपारस्थराज्यपश्चिमोत्तरस्थे शिग्यामाइनरतः प्राक्, प्रत्यगनुगङ्गप्रदेशात्, उदक् सिन्धुसागरसङ्गमात्, अवाक् च मूजवतश्चाय मार्यावासः आर्यावर्त्तो वा संहिताकालीन इति निष्पद्यते ॥

आर्यसाम्राज्यं तु इतोऽप्यन्यत्र च स्थित मित्यन्यदेतत्। तथाहि (ऋ० सं० ७. १८. १९.)—

"आवदिन्द्रं यमुना त्लवश्च प्रात्र भेदं सर्वताता मुषायत्।
अजासः शिग्रवो यक्षवश्च वलिं शीर्षाणि जभ्रुरश्वयानि"—इति।

अस्यार्थः।—यः 'इन्द्रः' सम्राट् 'अत्र' राज्ये 'सर्वताता' सर्वकर्म्मसु 'भेदं' राजप्रजयोर्विचारादिवैलक्षण्यं 'प्रमुषायत्' प्रमुष्णाति प्रच्छन्नीकरोति, एवं त्लवैव सर्वाः प्रजाः 'आवत्' अवति, तम् 'इन्द्रं' सम्राजं 'यमुनाः', 'त्लवः', 'अजासः', शिग्रवः', 'यक्षवः' 'च' यामुनप्रदेशादिवासिनः सामन्तराजानः 'अश्वयानि' अश्वादिवाहितानि, 'शीर्षाणि' शीर्षतः प्रवाहितानि 'च' 'वलिम्' उपढौकनं 'जभ्रुः' प्रददुरिति।

अस्या मृचि श्रुताः यामुनादयः सर्व एव जनपदाः तदानीन्तना-र्यावासतोऽद्यतनादस्मादार्यावर्त्ततश्च बहिर्भूता एव स्युः। अत्रो-भयत्रास्ति च किञ्चिद् विचार्यम्। गङ्गायाः प्रत्यक्पार्श्वस्थिता एषैव यमुना अस्या मृचि श्रुता, उतान्येति? अस्मन्मते त्वन्यैव। शिग्रु-जनपदोऽपि स्याच्चन्द्रभागाप्रभवोर्ध्वगतादन्य एवेति। अपि वा आर्यावर्त्तीयावप्येतौ तदानीं करदप्रदेशावेवेत्यपि किं चित्र मिति ॥

अथैतरेयकाले अय मार्यावर्त्त आसीद् य दृगायतनः, तदपि किञ्चिदवगम्यते तद्ग्रन्थत एव। तथाहि श्रूयतेऽत्राभिषेकप्रकरणे —"प्राच्यां दिशि ये के च प्राच्यानां राजानः०—० दक्षिणस्यां दिशि ये के च सत्वतां राजानः०—० प्रतीच्यां दिशि ये के च नीच्यानां राजानो ऐडपाच्यानां०—० उदीच्यां दिशि ये के च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्राः०—० ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपञ्चालानां राजानः सवशोशीनराणां राज्यायैव तेऽभिषिच्यन्ते"–इति (८. ३. ३.)।

अत्र, 'प्राच्यानां राजानः'–इति सामान्येन श्रवणादवगम्यते न तदानीं प्राच्यां दिशि प्रबलः कश्चिदासीन्नरपतिः, प्रत्युतासन् क्षुद्रराजानो बहव इति। अत एव श्रुत मत्रैवान्यत्र "प्राच्यो ग्रामता बहुलाविष्टाः"–इति (३. ४. ६.)। तदानीं प्राग्देशीय-पार्वत्यजनपदो य आसीदासंहिताकालात् प्रसिद्धः किरातनगरादिकः तत एव सोमवल्लीनां क्रयो विहितश्चात्रैतरेयके— "प्राच्यां वे दिशि देवाः सोमं राजान मक्रीणन्"–इति (१. ३. १.)। तदेवं यास्किन्यागमे हि येषां कान्यकुब्जाहिच्छत्रादीनां प्राच्यभूमौ विद्यमानतोपलभ्यते, ऐतरेयकाले तु तेषां नगराणा मासीद्वा अनाविर्भाव एवेति।

दक्षिणस्यां तदानी मासीदेकं सत्वद्राज्य मेव बलवत्तमम्, यदिदानीं कुरुपुरित्याख्यायते। तदेतत् "आदत्त यज्ञं काशीनां भरतः सत्वता मिव"–इति (शत० ब्रा० १३. ४. ५. २१.) गाथावचनश्रुतेरेतदैतरेयतोऽपि बहुप्राचीनतरं भरताधिकृतञ्चेति गम्यते। स्याद् दौष्यन्ति-भरतेन तत् स्थापित मिति तद्वंश्याश्चिर मेव भरता इत्येवोच्यन्ते, दृष्टञ्चैतदैतरेयेणापि भरताधिकृत मेवेति।

अतएवेहान्यत्र श्रुतम्— "तस्माद्वाप्येतर्हि भरताः सत्वनां वित्तिं प्रयन्ति"–इति (२. ४. १.)। अन्यत्र "तस्माद्वेदं भरतानां पशवः सायङ्गोष्ठाः सन्तो मध्यन्दिने सङ्गविनी मायन्ति"–इति (३. २. ६.)। अनयोः श्रुतिवचनयोः 'आयन्ति' 'प्रयन्ति'–इति वर्त्तमानकालिकप्रयोगदर्शनात्, 'इदम्'–इत्यङ्गुल्या निर्देशाच्चावगम्यतेऽनेनैतरेयेण स्वयमपि दृष्टं स्यात्तद्राज्यं भरतवंशीयशासनाश्रितमिति। तस्य च दौष्मन्तेर्भरतस्य राज्ञः कीर्त्तिकथा बहुप्राचीना इत्येवैतरेयादिषु गाथेति व्यपदिष्टा। तद्यथैतरेये— "तदप्येते श्लोका अभिगीताः—

हिरण्येन परीवृतान् कृष्णाञ्छुक्लदतो मृगान्।
मघवन् भरतोऽददाच्छतं बद्धानि सप्त च।
भरतस्येष दौष्मन्तेरग्निः साचीगुणे चितः।
यस्मिन्त्सहस्रं ब्राह्मणा बहवो गा विभेजिरे।
अष्टासप्ततिं भरतो दौष्मन्तिर्यमुना मनु।
गङ्गायां वृत्रघ्नेऽबध्नात् पञ्चपञ्चाशतं हयान्।
त्रयस्त्रिंशच्छतं राजाश्वान् बध्वाय मेध्यात्।
दौष्मन्तिरत्यगाद्राज्ञो मायां मायवत्तरः।
महाकर्म भरतस्य न पूर्वे नापरे जनाः।
दिवं मर्त्य इव हस्ताभ्यां नोदापुः पञ्चमानवाः"

–इति (८. ४. ९.)।

शतपथेऽप्येव मेव श्रूयते प्रायः—"तदेतद् गाथयाभिगीतम्" –इत्यादि (१३. ५. ४. ११–१४.) द्रष्टव्यम्।

प्रतीच्यां दिशि तु नैकमप्यासीत् कुसमृद्धं राज्यमप्यासदुत्तरभागे पर्वतपादस्थभूमिपाः 'नीचाः' केचनाप्रसिद्धराजानस्तथा

दक्षिणभागेऽप्यवाच्याः केचन, मध्यभागे त्वरण्यभूमय एवेत्युक्त मिह नीच्याना मपाच्याना मिति। इहैवान्यत्र श्रूयते "प्रत्यञ्चि दीर्घारण्यानि भवन्ति"-इति (३. ४. ६.), "प्रतीच्योऽप्यापो बह्वयः स्यन्दन्ते"-इति (१. २. १.) च।

उदीच्यां तु हिमवत्पृष्ठदण्डस्योत्तरे भागे आर्यावर्त्ताद् बहिर्विद्यमानावपि आर्यमित्रजनपदाविमौ उत्तरमद्रः उत्तरकुरुश्चेति श्रूयेते। एवं हि गम्यते— यथैव हिमवतो दक्षिणभूभागोऽय मार्यावर्त्तो मद्रदेश-कुरुदेशाभ्या मासीत्तदानीं द्विधा विभक्तः, तथैव हिमवत उत्तरभूभागश्च स मद्रदेश-कुरुदेशाभ्या मासीत् पुरा द्विधैव विभक्त इति। आर्य्यावर्त्तीयमद्रदेशादुत्तर इति उत्तरमद्र इत्युच्यते सः, आर्य्यावर्त्तीयकुरुदेशादुत्तर इति उत्तरकुरुश्चेति। आर्य्यावर्त्तीयप्रत्यन्तदेशेभ्यः परस्तात् ये देशा महादेशा वा सन्ति, न तेषु मन्वाद्युक्तार्य्यनार्य्यनामादिसम्भव इत्युक्तं पुरस्तात् (१७ पृ० १६ पं०), तथा च तद्देशवासिना मार्य्यत्व मनार्य्यत्वं वा नैव विचार्य्य मस्ति; परमुत्तरकुरुदेशस्य नैसर्गिकसौन्दर्य्यस्वास्थ्यकरत्वादितः, तद्देशवासिनाञ्च शान्तिप्रियत्व-तपःपरायणत्वादिदेवस्वभावदर्शनात्, पुण्यमयत्वं देवक्षेत्रत्व मजेयत्वञ्च। तथाह्यैतरेयकम्— "देवक्षेत्रं वै तन्न वैतन्मर्त्यो जेतु मर्हति"-इति (८. ४. ६.)। तेषां शान्तिप्रियत्वादिस्वभाव एवाजेयत्वे हेतुः प्रबलः। तदुक्तं महाभारतीय-सभापर्वणि चार्जुनदिग्विजये—

"तांस्तु सान्त्वेन निर्जित्य मानसं सर उत्तमम्। ऋषिकल्पांस्तथा सर्वान् ददर्श कुरुनन्दनः॥ × × × ॥ तत एवं महावीर्य्यं महाकाया महाबलाः। द्वारपालाः समासाद्य हृष्टा वचन मब्रुवत्॥ पार्थ! नेदं त्वया शक्यं पुरं जेतुं कथञ्चन। उपा-

वर्त्तस्व कल्याण पर्य्याप्त मिद मच्युत ॥ × × × ॥ न चात्र किञ्चिज्ज्ञेतव्य मर्जुनात्र प्रदृश्यते । उत्तराः कुरवो ह्येते नात्र युद्धं प्रवर्त्तते ॥ × × × ॥ अथेह पुरुषव्याघ्र ! किञ्चिदन्यच्चिकीर्षसि । तत् प्रब्रूहि करिष्यामो वचनात् तत्र भारत ॥ ततस्तानब्रवीद्राजन्नर्जुनः प्रहसन्निव । पार्थिवत्वं चिकीर्षामि धर्म्मराजस्य धीमतः ॥ न प्रवेक्ष्यामि वो देशं विरुद्धं यदि मन्यसे । युधिष्ठिराय यत् किञ्चित् करपण्यं प्रदीयताम् ॥ ततो दिव्यानि वस्त्राणि दिव्यान्याभरणानि च । चौमाजिनानि दिव्यानि तस्य ते प्रददुः करम्"–इति २८ अ० ४–१६ श्लो० । तदिदं महानगरं सम्प्रति तीव्वदित्युच्यते, स्थौल्यवदिति तदर्थः ; एतद्देशीया हि प्रायशः स्थूलनासिकोदरजङ्घा भवन्ति ।

अस्ति चान्यः कुरुवर्षः ; स नूनं मेरुसन्निधः, 'शान्तपित्तवर्ग'-प्रभृति-'सुवीर्य्य'–देशान्तः, योऽय मद्यतन-सेण्टपिटर्स्बर्गादिमाई-वीरियान्तः । तस्य स्वर्गत्वेन वर्णनञ्च महाभारतरामायणादौ बहुत्र । तद्यथा महाभारतीयानुशासनपर्वणि—"अहो सह शरीरेण प्राप्तोऽस्मि परमां गतिम् । उत्तरान् वा कुरून् पुण्यानथवाप्यमरावतीम्"–इति (५४. १६) । पुनस्तत्रैव—"नैवेशिकं सर्वगुणोपपन्नं ददाति वै यस्तु नरो द्विजाय । स्वाध्यायचारित्रगुणान्विताय तस्यापि लोकाः कुरुषूत्तरेषु"–इति (५७. ३२.) ।

अथ यदिह 'मध्यमायां दिशि'–इति, ततो गम्यते कुरुपञ्चालादयश्चत्वार एवैते प्रदेशा स्तदानी मासन् मध्यदेशाः, आर्यावर्त्तस्य मध्यभूभागा इति यावत् । तत्र च यच्छ्रुतो वशोदेशः, स एव स्यात् महाभारतादिप्रसिद्धः 'शिविः' । किञ्च य एते 'ध्रुवायां प्रतिष्ठायाम्' इति द्वे पदे तद्विशेषणे श्रूयेते, ततो

ज्ञायते चात्रैव मध्यार्यावर्त्ते तदानीन्तनसम्राजा मासीद्राजधानीति। एवञ्च कुरु-पञ्चाल-शिवि-सौवीरप्रदेशात्मकमध्यदेशत एवात्र प्राच्यादयो दिशोऽभीष्टा इत्यपि नानवगतम्॥

तदेव मैतरेयकाले हिमवद्दक्षिणपार्श्वनिम्नस्थं किरातजातिनिकेतनं किरातनगर मेवासीत् आर्यावर्त्तस्यास्य पूर्वप्रत्यन्तः, दक्षिणस्यां भरतवंशीयाधिकृतं सत्वद्राज्य मप्यासीदार्यावर्त्तान्तर्गतम्, पश्चिमस्यां गिरिगिरिनदीग्रामसीमानां प्राचुर्यवर्णनात् गान्धारदेशादिभ्यः परस्तादप्यासीदार्यवास इति मन्यते, उत्तरस्यान्तूत्तरकुरूणा मजेयत्वेन वर्णनात् ततोऽर्वागेवासीदार्यावर्त्तोत्तरसीमेति च प्रतीयत एवेति। एकत्र चात्र श्रुतम्— "त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिवा इत्युदन्त्या बहवो भवन्तीति" (७. ३. ६.)। तत्र 'एते'—इति इदंशब्दव्यवहारादैतरेयकालेऽप्यासन्निमा जातय इति, 'उदन्त्याः'—इत्युक्ते प्रत्यन्तवासिनोऽनार्या इति च गम्यते। तथाचैषां देशाना मनार्यभूत्वाभिधानादेषा मन्तःस्थिताः प्रदेशा एवासन् तदानी मार्यभूमय इति सुवचम्। अन्ध्रजातयोऽधुना दाक्षिणात्येषु प्रसिद्धा, पुण्ड्र इति त्विदानीं 'दीनाजपुर'—इति प्रत्यन्तत्वानुसन्धित्सवो वदन्ति, एवं शबरपुलिन्दमूतिवाः विन्ध्यगिरिवासिनो म्लेच्छजातिविशेषास्त्वद्यापि प्रायः प्रसिद्धा एव। तदेवं न तदाप्येष आर्यावर्त्तः प्राच्या मतिविस्तृत इत्येवास्मकम्॥

अथ श्रूयते ह्येतद् विदेघमाथवाख्यानं शतपथे १ का० ३ प्र० ३ ब्रा० १०—१८ क० "विदेघो ह माथवोऽग्निं वैश्वानरं मुखे बभार०—० स इमाः सर्वा नदीरति ददाह सदानीरेत्युत्तराद् गिरेर्निर्ह्रावति ताए ह्येव नातिददाह, ताए ह स्म तां पुरा ब्राह्मणा न तरन्त्यनतिदग्धाग्निना वैश्वानरेणेति। तत एतर्हि प्राचीनं बहवो

ब्राह्मणास्तद्वाक्षेत्रतर मिवास स्रावितर मिवास्वदित मग्निना वैश्वानरेणेति। तदु हैतर्हि क्षेत्रतर मिव०—० सेषाप्येतर्हि कोसलविदेहानां मर्यादा, ते हि माथवाः ०—० स मे मुखान्निरपादीति"–इति। एतस्मादाख्यानात् व्यक्त मभिगम्यते, विदेहनाममैथिलजनपदस्यानतिप्राचीनार्यभूत्वम्। परं न तदापि दक्षिणमगधस्यार्यावर्त्तत्वं सम्पन्नं मन्यामहै वयम्; अनतिप्राचीनपातञ्जलमहाभाष्यवर्णितार्यावर्त्तलक्षणतोऽपि दक्षिणमगधात् प्रत्यगेवार्यावर्त्तत्वप्रतीतेः। अपीह शतपथे (१२. ९. ३. ३.) "बह्लिकः प्रातिपीय शुश्राव"–इति श्रवणात्, तदाप्यासीद् बाह्लीकस्यार्यावर्त्तत्व मिति च स्वीकार्यम्॥

पाणिन्यागमेऽपि आयुधजीविवाचिपर्श्वादिगणे पठितो बह्लीकः (पा० सू० ५. ३. ११७.)। "कम्बोजाल्लुक्"–इति (पा० सू० ४. १. १७५.) कम्बोजग्रहणञ्च दृश्यते। तत्र सिन्ध्वादिगणेऽपि पठितः कम्बोजः (पा० सू० ४. ३. ९३.)। गणपाठोऽपि पाणिनिनेव कृत इति सिद्धान्तितं भगवता पतञ्जलिना (१. १. ३४)। महाभारतेऽपि वर्णितौ काम्बोजबाह्लीकौ (द्रो० प० ११७, १५५ अ०)।

अथ भगवता यास्केनापि "कम्बोजाः कम्बलभोजाः कमनीयभोजा वा; कम्बलः कमनीयो भवति"–इति कम्बोजशब्दो निरुक्तः (२. १. ४.)। "प्रकृतय एवैकेषु भाष्यन्ते विकृतय एवैकेषु"–इत्याद्यूक्त्वा तदुदाहरणाय प्रोक्तं चैतत्— "शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते०—० विकार मस्यार्येषु भाषन्ते शव इति; दातिर्लवनार्थे प्राच्येषु, दात्र मुदीच्येषु"–इति (२. १. ३, ४.)। पातञ्जले महाभाष्ये पस्पशाया मप्येव मेव।

अपि तत्र आर्यावर्त्तस्यास्य चतुस्सीमनिरूपणं ज्ञातं सुव्यक्तम्। तथाहि—"कः पुनरार्यावर्त्तः ? प्रागादर्शात्, प्रत्यक् कालकवनात् दक्षिणेन हिमवन्तम्, उत्तरेण पारिपात्रम्"—इति २. ४. १० सू० भा०। अत्राह तट्टीकाकारः कैय्यटः—"आदर्शादयः पर्वतविशेषाः"—इत्येव। "जनपदतदवध्योश्च (पा० सू० ४. २. १२५.)" —इतिसूत्रस्योदाहरणभूतं यदिद मादर्शक इति पदं लभ्यते, इतोऽपि ज्ञायते अस्त्यादर्शनामा कश्चित् सीमपर्वत इति। सोऽय मादर्शः स्यादञ्जनपर्वतः; तत्पदनिरुक्तितस्त्वेवावगतेः। स चेदानीं सुलेमानित्युच्यते। स हि शतपथब्राह्मणश्रुतश्वेतगिरेरेव दक्षिणांशः। एवञ्च पतञ्जलिकालेऽपि स एव श्वेतगिरिरेवासीदार्यावर्त्तस्य पश्चिमसीमेत्यनुमान मपि न स्यादसङ्गतम्। तदानीन्तनार्यावर्त्तस्य पूर्वसीमभूतं कालकवनं तु स्यात् धर्मारण्यतः प्राग्विद्यमानं दक्षिणमगधस्य प्रत्यक् स्थितं वकासुर-(बक्सर)—प्रदेशीयं ताड़कवनम्। पुरासीत् तद्धि कालयवनाश्रितम्; तत्प्रभृत्येव तस्य कालवनं कालकवनं वेति च नाम सम्पन्नम्। हरिवंशोल्लिखितस्य विष्णुपुराणोक्तस्य च (५. २३. ५.) तस्य कालयवनस्य मगधराजजरासिन्धुमित्रत्वेन वर्णनात् कालवनमगधयोः सामीप्यानुमानं स्याच्च सङ्गतम्। अत एव प्राच्यमगधस्य अनार्यवासत्वेनोल्लेखोऽपि तस्यैतस्य पतञ्जलेः सङ्गच्छते। तथाहि—"हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमगधेषु; गमि मेव त्वार्याः प्रयुञ्जते"—इति (म० भा० पस्पशा०)। तदेवं तदापि सौराष्ट्रजनपदस्य, तथेदानीं पटनेत्यादिप्रसिद्धानां प्राच्यमगधीयकुसुमपुरादीनाञ्च आर्यावर्त्तसीमतो बहिः स्थितिरासीदित्यत्र च नास्ति संशयलेशोऽपीति।

अथात्र भगवान् मनुस्त्वाह— "आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात्। तयोरेवान्तरं गिर्योरार्यावर्त्तं विदुर्बुधाः" –इति (२. २२.)। 'तयोः गिर्योः' पूर्वोपात्तयोः हिमवद्विन्ध्ययोः। तदित्थं पूर्वापरसमुद्रव्याप्येष देशो मनोः सम्मतः। तत्र पूर्वः स्यात् सिन्धुसागरसङ्गमः, अपरस्तु गङ्गासागरसङ्गमः। स एष आर्यावर्त्तः ब्रह्मावर्त्तप्रदेशो ब्रह्मर्षिदेशो मध्यदेशो यज्ञिय देशश्चेति चतुर्विधत्वेन वर्णितस्तेन तत्प्रान्तभूमीनां म्लेच्छभूत्व मुररीकृतञ्च। तद्यथा—

"सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्।
तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते॥
कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः॥
हिमवद्विन्ध्ययोर्मध्यं यत् प्राग् विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः॥
कृष्णसारस्तु चरति मृगो यत्र स्वभावतः।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतः परः"–इति
(म० २अ० १७, १९, २१, २३श्लो०)।

अत्र हि ब्रह्मावर्त्त-ब्रह्मर्षि-मध्यदेशास्तु 'यज्ञियाः' यज्ञकार्यार्हभूमय एव, तत्र कास्ति विचारणा; निर्दिष्टेभ्य एभ्यो बहिरपि आर्यावर्त्तान्तर्गताः सिन्धुसौवीरकाश्मादयो देशा अपि यज्ञानुष्ठानार्हभूमय इति 'यज्ञियदेशाः' उच्यन्ते। एतस्माच्चार्यावर्त्ताद् बहिःस्थिताः "किराता यस्यान्ते, पश्चिमे यवनाः स्मृताः। आन्ध्रा दक्षिणतो वीर! तुरस्कास्त्वपि चोत्तरे"–इति (वा० पु० १३. ४०), एवमादिकाः खोराशान-तुरस्क-पूर्ववङ्गोत्तरवङ्गान्ध्रप्रदेशादयोऽस्यार्यावर्त्तस्य प्रान्तभूमयः सर्वाः एव म्लेच्छदेशाः; किञ्चार्यावर्त्तान्तर्गता

दक्षिणबङ्गांङ्गप्राच्यमगधादयोऽपि कृष्णसारमृगहीनत्वेनायज्ञियत्वात् म्लेच्छदेशा एव।

तत्त्वतस्तु "तयोरेवान्तरं गिर्योः"–इति मनूक्तेः पूर्वस्यां यावदेव विन्ध्यगिरेः प्रसृतिस्तावदेव यज्ञिय आर्यावर्त्तः स्वीकार्यः, ततो बहिरार्यावर्त्तत्वेऽपि न त्वस्ति यज्ञियत्व मिति म्लेच्छभूत्व मेव। अत एवाङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च गमननिषेधः सङ्गच्छते; सूचितन्त्वेतत्तत्र मनुनैव "एतान् द्विजातयो देशान् संश्रयेरन् प्रयत्नतः"–इति (२. २४.)। 'एतान्' ब्रह्मावर्त्तादीनित्यर्थः। तथेषु देशेषु पुरा नासन् ब्राह्मणा इति प्रवादोऽप्युपपद्येत। एतर्ह्यपि प्राच्यमगधेषु पटनाप्रभृतिषु, अङ्गप्रदेशेषु भागलपुरादिषु चान्यत आगताः शाकलद्वीपिब्राह्मणाः, तथा वङ्गेष्वत्र कान्यकुब्जादागता एव ब्राह्मण राढि-वारेन्द्र-वैदिका इति ख्याता वसन्ति, कलिङ्गसौराष्ट्रीयरपि तथैव।

कलिङ्गप्रदेशागम्यत्वं तु पाणिनिसूत्रे तदवार्त्तिकतन्महाभाष्येभ्यश्चावगम्यते। तथाहि— अस्ति पाणिनेरेकं सूत्रं "परोक्षे लिट्"–इति (३. २. ११५), अत्र चास्ति कात्यायनवार्त्तिक मिदम्— "अत्यन्तापह्नवे च"–इति, लिट् वक्तव्य इति शेषः, उदाहरणञ्चास्य दर्शितं पतञ्जलिना— "नो कलिङ्गान् जगाम"–इति विवृतं च तत् कैयटेन— "न केवलं तद्देशस्य भोजनादेरपह्नवो यावत् तद्देशगमनादेरपि"–इत्यादि। एष च कलिङ्गप्रदेशोऽद्याप्यार्यावर्त्ताद्बहिरेव संस्थितो मेदिनीपुरादारभ्य तैलङ्गदेशान्तं यावद् विस्तृतः। पुरा आसीदय मुत्कलिङ्ग-मध्यकलिङ्ग–कलिङ्गेति त्रिधा विभक्त इति त्रिकलिङ्गनामा। त्रैलिङ्गनाम तु तत एव समुद्भूतम्, अप्युत्कलिङ्गत एवोत्कलनामप्रसिद्धिरित्याहुरैतिह्या-

सिकाः । अतएव श्रीचेत्रे वर्णविचाराभावस्तद्दोषनिह्नवये चोत्तरत्र समये केनचिदुत्कलखण्डप्रणनञ्चेति सम्भाव्यते ।

अथामरसिंहोऽपि प्राच्योदिच्यमध्यम्लेच्छेति चतुर्विभक्त मार्यावर्त्तदेशसंस्थान मश्लोकयत् । तद्यथा—"आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः"–इति (२. १. ८.)। तत्र "शरावत्यास्तु योऽवधेः । देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः । प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः इति (२. १. ६, ७.)। प्राक्सहितो दक्षिणो देशः 'प्राग्दक्षिणाः', एवं पश्चिमसहित उत्तरदेशः 'पश्चिमोत्तरः', अन्तं प्रति गतः 'प्रत्यन्तः' सीमान्तप्रदेशः ॥

अथात्र युरोपीयभ्रातरः केचन सम्भवदन्ते । श्रूयते हि ऋक्संहितायाम्—"अनु प्रत्नस्योकसो हुवे"–इति (१. ३०. ८.), तेनाधिगम्यते सारस्वतप्रदेशीयार्याणा मादिपुरुषाणां वास आसीत् पुरा क्वचिदन्यत्रेवेति । तच्चार्याणा मादिनिकेतन मस्यैवासियाखण्डस्य मध्यभागस्थितयोर्बेलुर्तागमुझताग्पर्वतयोः पश्चिमपार्श्वगताधित्यका भूमिस्तत एव विकीर्णा वयं भारतीयाः पारसिकाः शर्म्मण्यादयश्च समभवामेति । अत्र ब्रूमः । भारतीयपारसीकशर्म्मण्यादीना मार्यमूलत्वेनैकजातिप्रभवत्वन्तु स्यात् स्वीकार्य्यम्, किन्त्विहोपनिवेशिका वय मिति नेव मन्यामहे वयम् ; स्वदेशस्त्वहान्यादिदोषत्रयप्रसङ्गात्, तेषां तन्मतपोषकप्रमाणहेतूना मतिदौर्बल्याच्च ।

ते त्रयो दोषाः खल्वेते—नेष देशोऽस्माकं पैतृकोऽपि तु यथाभवद्यवनाना मधिकृतोऽद्य चेत्रखण्डीयानाम्, तथैव पुरास्मत्पूर्वपुरुषैरत्रत्याननार्यान् विजित्य बलाद् गृहीत इति । एतेनास्मिन्

देशेऽस्माकं मूलस्वत्वं कदापि नास्ति, प्रत्युत यथा पूर्वं यवनानां जयलब्धं स्वत्वं सम्पन्न मद्य चेंलण्डीयानाम्, तथैवैकदास्माक मपि बभूवेत्येवेति प्रथमो दोषः । तदनु सम्प्रत एवास्माकं यहुदादीना मिवौपनिवेशवासित्व मिति द्वितीयो दोषः । स्वार्थानुरोधतः स्वावासकण्टकभूताना मेतद्देशीयमूलस्वत्ववता मनार्याणा मुच्छेदनश्चेति तृतीयः । यदि हि तेषां तन्मत मस्माक मृत मित्यभिमतं स्यात्, तर्ह्येते त्रयोऽपि दोषा गलेकुठारन्यायेन मन्तव्या एव स्युः । न च तथा । प्रत्युत दृश्यते हि न कश्चित् स्वावासभूमेश्चतुरङ्गुलभूमिस्वत्व मपि त्यक्तु मुत्सहते, तदय मिहार्यावर्त्ते चिर मासृष्टेर्निवसन्तोऽपि तद्विरुद्धप्रबलप्रमाण मन्तरेव कथङ्कारं नाम पैतृकं स्वत्व मुत्सृजन्तोऽत्र दोषभावं क्षमामहे ? अपि राजशासनतोऽन्नाभावादितो विपुलार्थार्जनतृषासन्ताडनादितो वा ये केचनार्या अनार्याश्च स्वदेशाद् बहिर्भूता औपनिवेशिकत्व मापन्ना आपद्यन्ते वाद्यापि, अस्तु तेषां तथात्व मदोषाय ; अतथाविधाना मस्माकं विषये तेषां तथाविधजल्पनं कथं न नो हृदयं व्यथयेत् ? एवं दुर्बलाना माद्यनार्याणां प्राणादिसम्पीड़नेनैवास्मत्पूर्वपुरुषा इह वास्तुस्थान मालेभिर इत्यनृत मपि यद्यृतायेत, तर्ह्येष तत्कलङ्कप्रवादः कथं न भवेद् दोषायेति च हृदयवद्भिः सुधीभिरेव विवेचनीयम् ॥

सन्ति चात्र तेषां तन्मतपोषका येऽष्टावनुमानहेतवो लिखिताः, न तेष्वेकोऽपि विचारसह इत्यस्माकम् । तद्यथा —

(१) 'एशियाखण्डतः प्रोषिता एवार्य्याः कालेन सर्वत्र यूरोपखण्डादौ 'बभुवुः कृतवास्तव्याः'—इत्येव मस्त्येकः प्रवादः, अतोऽवगम्यते नून मासीदार्य्याणा मादिवासः प्रथम मेशियाखण्डमध्यभाग एवेति तेषां तथाविधानुमानस्याद्यहेतुवर्णनम् । अत्र ब्रूमः—

जागर्त्तु स प्रवादस्तेन किम्, तथा स्वीकारेऽपि न भवेदस्माकं भूस्वत्वनाशः, आर्यावर्त्तस्यास्य वैशियाखण्डीयभूभागत्वात्; निरवसितास्त्वास्माद् विश्वामित्रर्षिपुत्रादयः। तथाहि—"त एतेऽन्ध्रा पुण्ड्राः शवराः पुलिन्दा मूतिवा इत्युदन्त्या बहवो भवन्ति वैश्वामित्रा दस्यूनां भूयिष्ठाः"—इति (ऐ० ब्रा० ७. ३. ६.)। अतएव त्वग्दोषदुष्टा भर्त्तृपरित्यक्ता अत्रिसुता विदुष्यपालेव ग्रीक्देशीया अपेलो देवतेति सम्भाव्यते। तदत्र ऋ० सं० ८. ९१ सूक्तव्याख्यानपरं शाट्यायनब्राह्मणं द्रष्टव्यम्।

(२) भारतीयपारसिकेलण्डीयादीनां विभिन्नजातित्वेऽपि भाषासौसादृश्यं दरीदृश्यते, विशेषतः सर्वास्वेव भाषासु शीतर्त्तुनामैकविध मेव प्रायः, तस्माच्चावगम्यते सर्वेषा मेवैषा मेकवंशप्रभवत्वं शीतप्रधानवासित्वञ्चेति तेषां तादृशानुमानप्रवृत्तेर्द्वितीयहेतुवर्णनम्। अत्र ब्रूमः—अस्त्वेषा मेकवंशप्रभवत्वम्, अपि स्वीकार्यञ्च स्यात् पुरासीदेषां सर्वेषा मेव हिमप्रधानैकदेशवासित्वञ्च, तेन किम्? शीतप्रधाने तस्मिन् सुवास्तुप्रदेशे हि तेषा मुक्तसर्वजातिमूलार्याणां वासस्वीकारेऽपि कि मेनत्वोपपद्यते? उपपद्यत इति चेत् क्षतं कल्पनाकल्पितजल्पनयेति। अपि पारसिकावेस्ताग्रन्थस्य 'वेन्दिदाद्'—प्रकरणीयाद्याध्याये 'हरख्इति'—नामकस्यैकस्याभ्युदयशालिनो नगरस्य यद् वर्णनं दृश्यते, तन्नून मेतस्य सारस्वतप्रदेशस्यैव; 'सरस्वती'—शब्दस्यैव हि पारसिकभाषायां 'हरख्इति'—व्यवहारः सर्वसम्मतः, सिद्धान्तितञ्च तथा ब्लार्क्महोदयेनापि (१८६२ खृ. मु. व्या. ५६—५८ पृ०)।

(३) तत्रैव 'अवस्ता'ग्रन्थस्य 'वेन्दिदाद्'-प्रकरणे देशवर्णनप्रसङ्गे 'ऐर्यनम्वेजो'-नामा कश्चिज्जनपदोऽपि वर्णितो दृश्यते। हिमर्त्तु-

प्रधानश्च स इति चोल्लिखितं तत्रैव। स एष जनपदः पारसिकाना मादिवास्तव्यः स्यात्, स्वीक्रियते च तथा तैः पारसिकैः। भारतीयपारसिकयोर्वदनमण्डलसारूप्यात् भाषासाट्श्यात्, अग्निपूजकत्वसाम्याच्चैकमूलप्रभवत्वं व्यज्यत एवेति सर्वमूलार्याणा मेवावासभूमिः स्यात् स एव 'ऐर्यनम्वेजो' जनपद इति तत्र तृतीयहेतुवर्णनम्। अत्र ब्रूमः— अस्तु पारसिकाना मार्यवंशसमुत्पन्नत्वेनास्मद्भ्रातृत्वम्, स्याच्च स्वीकार्यं तेषा मादिपुरुषाणा मैर्यनम्वेजोवासित्वम्; न तथाप्यस्माकं तद्देशमूलत्वं भवेदुररीकार्यम्; राजाज्ञादिभिरस्मद्देशतो विताड़ितानां तदादिपुरुषमात्राणां तथात्वसम्भवात्। एकवंशप्रभवाना मपि हि पूर्वपुरुषाणां नानाहेतुतो नानादेशवासित्वं सम्भवत्येव, सम्भवति च तत्र केषाञ्चित् स्वदेशवासित्व मपीति सुवच मेव। अपि वा राजतरङ्गिणीवर्णित 'आर्याणक' देश एव 'ऐर्यनम्वेजो'—इति पारसिकनामभागासीत्, स च स्यात् केषाञ्चिदार्याणां वासभूमिः, पारसिकानाञ्चैषां तेभ्य एवोत्पत्तिः स्वीकार्येति सर्व मवदातम्। स च देशः काश्मीरादुत्तरो हिमप्रधानोऽप्यार्यावर्त्तान्तर्गत एव। तथाहि (रा० त० ४. ३६७)—

"तुषारवर्षैर्बहुलैस्तमकाण्डनिपातिभिः।
आर्याणकाभिधे देशे विपन्नं केचिदूचिरे"—इति।

वस्तुतस्तु ऐर्यनम्वेजोनाम नगरं नाद्य क्वचिदपि केनाप्युपलभ्यते, पुरा क्वासीत् तस्य विद्यमानतेत्यपि नाद्य यावत् सुनिर्णीतम्; तदलं खपुष्पपर्यालोचनयेति।

(४) अस्ति चैव मपि प्रवादः— ग्रीक्रोमकजाति-पूर्वपुरुषाः पूर्वोत्तरदेशतः प्रोषिता इतालीयादौ न्यवात्सुरिति। स एष प्रवाद-

स्तदैव सङ्गच्छेत, यदि नामासियाखण्डस्य मध्यभूमिरेव तेषा मार्या-र्याणां निकेतनं मन्येतेति तत्र चतुर्थहेतुवर्णनम्। अत्र ब्रूमः— पूर्ववर्णितः सुवास्त्वादिप्रदेशोऽपीताल्यादिभ्यः किञ्चिदुत्तरगतपूर्वं एवेति तत्प्रवादोपपत्तिः समानैवेति।

(५) हिमालयस्योत्तरभागस्य पवित्रतमत्वेन लोकातीतमहिमा-न्वितत्वेन स्वर्गरूपत्वेन चेदानीन्तनाना मार्याणां स्वीकारात् तादृश-स्थानस्यैतदादिपुरुषाणां वासः सम्भाव्यत इति तत्र पञ्चमहेतुवर्ण-नम्। अत्र ब्रूमः— हिमवद्दक्षिणभागस्था आर्याः तपस्साधनादिकं चिकीर्षवश्चिर मेव हिमवदुत्तरभागं गत्वा कृतकृत्या भवन्ति, इत एव तस्य पवित्रतमत्वेन वर्णनम्; न त्वादिपित्रवासनिबन्धन मिति। लोकातीतस्तहिमान्वितत्वन्तु तत्रत्यकुरुणा मजेयत्वादिश्रवणत एव। हिमवत्पृष्ठस्य स्वर्गरूपत्वं तु पौराणिकम्; उत्तरशब्दमात्रं तद्बीजम्। "उत्तरः = उद्गततरो भवति, अधरः = अधो रः, अधो न धावतीत्यूर्ध्वगतिः प्रतिषिद्धा"—इति यास्कः (निरु० २. ३. २.)। तथाचोर्ध्वतनप्रदेश एवोत्तरः। आर्यावर्त्तस्य यस्यां दिशि उद्गत ऊर्ध्वतनो हिमवान् पर्वतो विद्यते, सैव दिगुत्तरेति व्यपदिश्यते, ततो विपरीता अधरेति। अत एवैवं श्रूयते—"स उत्तरस्मादधरं समुद्र मपो दिव्या अस्रृजदर्था अभि"—इति (ऋ० सं १०. ८८. ५.)। अत एव सूर्योऽप्युत्तर उच्यते। तद्यथा ऋक्संहिताया मस-ङ्कलितम्— "विश्वस्मादिन्द्र उत्तरः"—इति (ऋ० सं० १०. ८६. १-२३.)। एव मन्यत्रान्यत्र च बहुत्रैव।

(६) श्रूयते हि कौषीतकब्राह्मणे - "उदीच्यां दिशि प्रज्ञात-तरा वागुद्यते, उदञ्च उ एव यन्ति वाचं शिक्षितुं, यो वा तत आगच्छति, तस्य वा शुश्रूषन्ति इति ह स्माहैषा हि वाचो दिक्

प्रज्ञाता"–इति (१. ७. ६.)। तदेवं कौषीतकब्राह्मणग्रन्थप्रवक्तुराचार्यस्य हिमवद्दक्षिणखण्डस्थत्वेऽपि तदादिपुरुषाणां हिमवदुत्तरखण्डवासित्वेनैवैषोत्तरदिक्स्तुतिः सङ्गच्छत इति तत्र षष्ठहेतुवर्णनम्। अत्र ब्रूमः— ऐतरेये च ब्राह्मणे समाम्नातैतदर्थिका श्रुतिः; ऐतरेयकाले कुरुपञ्चालशिविसौवीराणां मध्यदेशत्वं पूर्वं वर्णितम्। मध्यदेशापेक्षयोद्याननगरस्योत्तरत्वं सर्वैश्चक्षुषाद्रिर्मन्तव्य मेव। एष एवोद्यानदेशो राजतरङ्गिण्या मुञ्जानक इत्युक्तः; तस्यास्य विद्यानिवासत्वेन स्तुतिरन्यत्रापि। स एष काश्मीरसन्निहित उद्याननामजनपदोऽत्रेष्टो विद्यानिलय इति कथं धावेम हिमवतोऽप्युत्तर मिति।

(७) श्रूयते हि— "तोकं पुत्रेम तनयं शतं हिमाः"–इति (ऋ० सं० १. ६. ६४.) आशीर्मन्त्रः। एव मन्यान्योऽपि। तदत्र विवेचनीयम्, एवं हिमर्त्तुतोऽब्दपरिगणनं तु तत्रैवोपपद्येत, यत्र प्रदेशे हिमप्रपातस्यातिशय्यं विद्यते सदैव, नात्र तथोपलभ्यते; अपि त्वासियामध्यभूभागस्थो बेलुतागमुग्तागपर्वतयोरन्तराल-प्रदेशस्तु नूनं तादृश एवेति तत्रैवासीत् पुरार्याणा मादिवास इति प्रमाणयितुं प्रबलोऽयं हेतुः सप्तमः। अत्र ब्रूमः— "यदि हिमर्त्तुवाचिहिमशब्देनाब्दपरिगणनश्रवणात् हिमशब्दस्याब्दवाचित्वेन व्यवहाराद्वा स्यादस्मत्पूर्वपुरुषाणां हिमर्त्तुप्रधानदेशवासित्वानुमानम्, तर्हि शरदृतुवाचिशरच्छब्देनाब्दपरिगणनश्रवणात् शरच्छब्दस्याब्दवाचित्वेन व्यवहाराद्वा किं न स्यात् तेषां शरदृतुप्रधानदेशवासित्वानुमानम्? अस्ति तथापि श्रवणं बहुत्रैव। तद्यथा—

"तिस्रो यदग्ने शरदस्त्वा मिद्"–इति ऋ० सं० १. १२. ७२.।

"शत मिन्नु शरदो अन्ति देवाः"–इति ऋ०सं० १. १४. ६०.।

"शतं नो रास्व शरदो०—०ऽश्यामायूंषि"–ऋ० सं० २. ३. २७।
"अस्मै शतं शरदो जीवसे धाः"–इति ऋ० सं० ३. ३. ३५।
"पतिर्जीवाति शरदः शतम्"–इति च ऋ० सं० १०. ८६. ३८।

वस्तुतस्त्वार्याणां न कदापि हिमर्त्तुमात्रभोगैकस्त्व मासीत्, न च कदापि शरदृतुमात्रभोगैकस्त्वम्; अपि नाम "शरच्छूता अस्या ओषधयो भवन्ति, शीर्णा आप इति वा"–इति यास्कोक्तेः (४. ४. ४.) शृणाति हिनस्ति प्राणिनः इति शरच्छब्द-व्युत्पत्त्या शरदृतोरस्वास्थ्यकारित्व मासीदार्याचार्यसम्मत मिति तस्यर्तोरब्दान्त्यत्व ममानि तैरिति प्रतीयते। सति चैवं तस्याब्दा-न्तावयवत्वे, हिमर्तोरब्दाद्यवयवत्वं सुतरां सम्पन्नम्। अत एवाब्द-गणनाप्रसङ्गे शरच्छब्दहिमशब्दयोरन्यतरस्य प्रयोगो बहुत्र श्रूयते वेदे, सङ्गच्छते च तयोः शब्दयोर्गौण्याद्वृत्त्याब्दवाचित्व मपीति।

(८) अपि श्रूयते— "उत्तरं गिरि मति दुद्राव"–इति (श० ब्रा० १. ८. १.)। 'उत्तरं गिरिं' हिमालयम् 'अति' अतिक्रम्य उल्लङ्घ्य 'दुद्राव' द्रुतगमनं कृतवानिति च तत्सम्मतोऽर्थः। तदस्मादपि वचनात् हिमालय मुल्लङ्घ्य द्रुहागमनं सुव्यक्त मिति तेषां तादृशानु-मानेऽष्टमो हेतुः। अत्र ब्रूमः— तस्याः श्रुतेराद्यन्तपर्यालोचनया अतिशब्दार्थालोचनया चैतद्विपरीत एवार्थः प्रतीयते। तथाहि— "स औघ उत्थिते नाव मापेदे। तं स मत्स्य उपन्या सुस्रुवे। तस्य शृङ्गे नावः पाशं प्रति मुमोच। तेनेत मुत्तरं गिरि मति-दुद्राव। स होवाच। अपीपरं वै त्वा। द्रप्से नावं प्रतिबध्नीष्व। तं तु त्वा मा गिरौ सन्त मुदक मत्यष्लेत्सीत्। यावद्यावदुदकं समवायात् तावत्तावदन्ववसर्पासीति। स ह तावत्तावदन्ववससर्प तदप्येतदेवोत्तरस्य गिरेर्मनोरन्ववसर्पणम्"–इति पूर्णं तच्छतपथ-

वचनम्। तदेतत्पर्यालोचनया गम्यते— कदाप्येकदा समभूतेऽत्र जलप्लावनेऽस्मादेवार्यावर्तीयसमुद्रादुत्थितस्य जलौघस्य हिमालयशृङ्गाधिरोहणम्, उपशान्ते च तदुपद्रवे ततः क्रमादभिसर्पणञ्चेत्येवेत्यस्मन्मतानुकूलैवेषा श्रुतिरिति। अत एव 'अतिदुद्राव'–इति पदस्य 'अधिजगाम'–इत्यर्थः कृतस्तङ्गाष्यकृता हरिस्वामिना। वेदार्थनिर्णयायैव यास्कप्रणीते निरुक्ते त्वभिपूजितेऽर्थेऽतिशब्दो निर्णीतः— "अति सु इत्यभिपूजिते"–इति (१. १. ५.)। 'अतिधनः'–इति, 'सुब्राह्मणः'–इति च तदुदाहरणद्वयम्। अतिशयोऽप्यर्थोऽप्यस्यतेर्यास्कीयः। अत एव "अतिमृत्यु मेति"–इत्यादौ (श्वेता० उ० ६. १५.) अतिशयोऽर्थ एव प्रतीयते, नोल्लङ्घनार्थः। "अतिरतिक्रमणे च"–इति पाणिनिसूत्रस्य (१. ४. ०५.) व्याख्यायां ह्याहैव ज्ञानेन्द्रसरस्वती— "अतिक्रमण मुचितादधिकस्यानुष्ठानम्"–इति। अथ वा 'तुष्यतु दुर्जनः'–इति न्यायादतेरुल्लङ्घनार्थत्वस्वीकारेऽपि हिमालयोत्तरवासिनां तेषां दृष्ट्यास्य हिमालयस्य उत्तरगिरित्वं कथं सम्भवेत्? अपि हिमालयोत्तरप्रदेशेषु आसिया-मध्यभूखण्डेषु न कदाप्यासीत्समुद्रो नैवाद्यापि दृश्यते, तत् कथं शिरोनास्ति शिरोव्यथेतिवत् शतपथीयार्णवजलस्फीतिवर्णनं सङ्गच्छेतेति च विचार्य मेव। आसीत् पुरोदीच्या मपि समुद्र इति चेद् वेदेषु प्रायः सर्वत्रैव समुद्रोल्लेखकाले तथाविधसमुद्रस्यानुल्लेखः कथङ्कार मुपयुज्यत इति च ध्येय मिति॥

एवं सुमेरुप्रदेशवासिनः खल्वासन्नस्मत्पूर्वपुरुषा इति वालसिद्धान्तोऽपि स्याद् वालसिद्धान्त एव। तथाहि—

उत्तरमेरुप्रदेश एवास्मत्पूर्वपुरुषाणा मार्याणा मासीद् वास्तव्यभूरिति प्रमाणयितुं तेन निष्प्रमाणोऽपि वागाडम्बरो बहु-

पन्यस्तः ; तत्र प्रमाणपरतन्त्राणां मौन मेव श्रेयः ; ततो यानि तु श्रुतिवचनादीनि प्रमाणत्वेनोपन्यस्तानि, तत्रेदं प्रथमं मन्यामहे वयम्— "अमी य ऋक्षा निहितास उच्चा,

नक्तं ददृश्रे कुहचिद् दिवेयुः ।

अदब्धानि वरुणस्य व्रतानि,

विचाकशच्चन्द्रमा नक्त मेति ॥"—इति ऋ० १. २४. १० ।

तत्सम्मतोऽस्यार्थः—'अमी' 'ये' 'ऋक्षाः' सप्तर्षयः 'उच्चा' उच्चैः शिरःप्रदेशे 'निहितासः' स्थापिताः, सृष्टिकर्त्रेति शेषः । ते 'नक्तं' रात्रौ 'ददृश्रे' दृश्यन्ते 'दिवा' 'कुहचित्' 'ईयुः' गच्छेयुः, न दृश्यन्त इति यावत् । 'चन्द्रमाः' अपि 'नक्तम्' एव 'विचाकशत्' प्रदीप्यमानः 'एति' दृश्यत इति भावः । तदेतदेवमादीनि 'वरुणस्य' राज्ञः 'अदब्धानि' कदमप्यविनाश्यानि 'व्रतानि' कर्माणि, ज्ञेयानीति । एवञ्च शिरःप्रदेशे सप्तर्षिमण्डलावस्थानं गम्यते, तच्च सुमेरावेवोपपद्यते ; अत एतादृशत्वद्रष्टृणा माद्यार्यर्षीणा मासीत् पुरा तत्रैवावास इति तदभिप्रायः । वयन्तु ब्रूमः— यास्कमते ऋक्षा इति पदेनेह सर्वेषा मेव नक्षत्राणां ग्रहण मिष्टम् (नि० ३. २०) ; सर्वेषा मेव तेषां रात्रावेव द्योतमानत्वात् सुसङ्गच्छत एवात्र यास्कस्य तन्मतम् । अपि सुमेरुप्रदेशतो नक्षत्राणि उच्चैर्दृश्यमानानि, इतोऽपि उच्चैरेव दृश्यमानानि, कुमेरुतोऽपि तानि उच्चैरेव दृश्यमानानीति तेषा मुच्चैःस्थत्वं सर्वत्र प्रत्यक्षम्, किं सुमेरुत एव । न ह्युच्चैःपदेन मस्तकोपरि वर्तमानं भ्राम्यमानं वा गम्यते । यद्युच्येत शतपथब्राह्मणे (२. १. २. ४.) ऋक्षशब्दः सप्तर्षिवाचकोऽपि ; तत्रापि न नः क्षतिः । "उत्तरम्, उद्ततरम्"—इत्यादिनैरुक्तवचनात् (२. ३. २.) उच्चैष्टनिबन्धन मेवोत्तरनामव्यपदेश

इत्यवगमात् उच्चैरित्यस्येह सप्तर्षिपक्षे उत्तरस्या मित्येवार्थः फल्यते ; श्रुतञ्च तत् तत्रैव शतपथे तदनुपदम् – "उत्तरा हि सप्तर्षय उद्यन्ति"–इति। तदित्थं तत्प्रदर्शित एव मन्त्रस्तन्मतसमुच्छेदको भवितु मर्हति न वेति सुधीभिरेवाकलय्यम्।

वस्तुत एष मन्त्रो वरुणविज्ञानपरस्ततो वरुणकर्मपरिचायक एव प्रधानतः ; तदस्माद् वरुणपदार्थबोधाच्च विलीयत एवैतद् वालविजृम्भितं समन्तात्। तथाहि—"रात्रिर्वरुणः"–इतिश्रुतेः (ऐ० ब्रा० ४. २. ४.) वरुणस्य रात्रिदेवत्वम् ; निघण्टौ द्वादशादित्यनामप्रक्रमे वरुणशब्दपाठात् सूर्यविशेषत्वम् ; "येना पावक चक्षसा०—०पश्यन् जन्मानि सूर्य"–इतिस्वोदाहृतश्रुतिव्याख्यानेन भगवता यास्केन तदेव प्रतिपादितञ्च (१३. ३. ९.) ; एवं हि रात्रिकालिकोऽधःस्थः सूर्य एव वरुण इति प्रतिपद्यते। एवं वरुणार्थस्वीकारेणोपपद्यते वरुणराजकर्त्तृकः सप्तर्षिप्रभृतीनां चन्द्रमसश्च प्रकाशः। परं न चेतद् वचः सङ्गच्छते मेरुप्रदेशवासिनाम् ; तत्र सूर्यविशेषस्य वरुणस्य तदधःस्थत्वेन चन्द्रमःप्रभृतीनां प्रकाशकत्वासम्भवात्, प्रत्युत आर्यावर्त्तवासिना मेव सङ्गच्छते ; अतस्तत्प्रदर्शितोऽप्येष मन्त्रोऽस्मन्मतपोषक एवेति ध्रुवम्। एव मपि स्वमतप्रमाणायास्येहोपन्यासो नूनं नूतनमतप्रकाशव्यग्रमानसस्य तस्य, सुदीर्घप्रान्तरमध्यापतितस्य क्षुत्तृट्क्षामस्य रुद्धकण्ठस्य मरीचिकादिग्भ्रम इवेति॥

तद्द्वितीयप्रमाण मप्येव मेव। तथाहि—

अस्त्येक मष्टादशर्चं सूर्य्यस्तुन्नाम सूक्तम् (ऋ० सं० १०. ८९.)। तस्य द्वितीयस्याः ऋचः प्रथमार्द्धर्च एषः—

"स सूर्यः पर्युरू वरांस्येन्द्रा ववृत्याद्रथ्येव चक्रा"–इति।

इम मेव मन्त्रांश मवलम्ब्य सुमेरोराद्यार्य्यावासभूत्वं प्रमाणयितुं चेष्टितं तेन। तदुक्तम्— मस्तकोपरि रथचक्राकारेण, नक्षत्राणां भ्रमणं तत्रत्याना मेव सम्भवतीति। वस्तुतस्तन्मन्त्रस्य व्याख्यानालोचनतो न तादृक्षतच्छायापि गम्यते; प्रत्युत तन्मतविपरीतं यत् सत्यं तदेव प्रमाणितं भवति। तद्यथा — 'इन्द्रः' परमैश्वर्यादिगुणयुक्तः 'सः' 'सूर्यः' 'उरू' उरौ विस्तीर्णान्तरिक्षे 'वरांसि' पृथिव्यादिग्रहोपग्रहमण्डलानि 'आवर्तयात्' सदेव आवर्त्तयति। तत्र दृष्टान्तः— 'रथ्या चक्रा इव' यथा अक्षः मध्यस्थः सन् रथसम्बन्धीनि चक्राणि भ्रामयति, चक्राणा मितस्ततोविच्छिन्नपतनतो रक्षयति च तद्वदिति। एतेन मध्यस्थितसूर्य्याकर्षणशक्तितः सर्वेषां ग्रहोपग्रहाणा मितस्ततोविच्छिन्नपतनराहित्यं भ्रमणञ्चेति विज्ञान मुपदिष्टं भवति। बालमते तु तेषां मस्तकोपरि सूर्यस्याविद्यमानत्वादक्षरूपत्वेन सूर्यस्य मध्यस्थितिर्वं कथं सङ्गच्छेतेति पक्षपातशून्याः सुधिय एव विभावयन्तु। सुव्यक्त मपि श्रुत मक्षरूपेण सूर्यस्य स्थितिवर्णनं तदुत्तरत्र—

"यो अक्षेणेव चक्रिया शचीभिर्
विश्वक् तस्तम्भ पृथिवी सुत द्याम्"—इति।

अस्यार्थः।— 'यः' सूर्यः 'शचीभिः' आकर्षणक्रियाभिः 'पृथिवीम्' स्वनीचैःस्थितां भूमिम्, ग्रहमण्डलनिम्नार्द्धभागगता मिति भावः; 'उत' अपि 'द्याम्' स्वोच्चैःस्थितां सुतरां द्युस्थाम्, ग्रहमण्डलोर्द्धभागगता मिति भावः; 'विश्वक्' सर्वतः 'तस्तम्भ' स्तम्भन् वर्त्तते। तस्तम्भेति "छन्दसि लङ्लुङ्लिटः"—इति सार्वकालिको लिट्। तादृशस्तम्भनेन ग्रहाणा मितस्ततः पतनजन्यं कक्षाच्यवनं वारितं भवति। अत्र दृष्टान्तः— "अक्षेणेव चक्रिया"—इति। 'चक्रिया'

चक्रिणौ, चक्रगतौ निम्नोर्ध्वप्रान्तौ यथा 'अक्षेण' स्तब्धौ दृश्येते लोके, तद्वदिति ॥

तत्तृतीयप्रमाणन्तु स्वसिद्धान्ताघातमेव न सहते, किम्पुनः सत्यसिद्धान्ताघातम् । तथाहि— यदिदं श्रूयते सप्तविधसोमयागेषु अग्निष्टोमादिषु प्रातरनुवाकविधावैतरेयके— "प्रातर्वै स तं देवेभ्योऽन्वब्रवीत्"–इत्यादि (२. २. ५.) । एतया श्रुत्या प्रातरनुवाकपाठस्य प्रातरेव कालो व्यक्तीकृतः । ततस्तदुत्तरत्र प्रातरनुवाकर्चां सङ्ख्याविधौ श्रूयते— "सहस्रं मनूचं स्वर्गकामस्य"–इत्यादि पञ्चान्तरत्वेन । स एषः सहस्रर्चां पाठः प्रातरुषःकाले कथमिहार्यावर्त्ते सङ्गच्छेत ? सुमेरुप्रदेशे तु सङ्गच्छते; तत्रोषसो मासद्वयव्यापित्वात् । तदित्थमुभयसि सहस्रर्चानां पाठविधानं गमयत्येवाद्यार्याणां दीर्घौषसे सुमेरौ तदानीं मासोदृ वास इति ।

अत्र ब्रूमः– नैषः प्रातरनुवाकविधिः क्वचिदृक्संहितायां श्रुतः, अपि श्रूयते ब्राह्मणेऽतैरेयके, तत् किमिदं मैतरेयकमपि तत्रैव प्रोक्तम् ? तथा स्वीकारे यदिदं श्रूयतेऽतैरेके— "ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपञ्चालानां राजानः"–इत्यादि (३८पृ० ६पं०), तत् कथं सङ्गच्छेत ? किञ्च यदि प्रातरनुवाकपाठस्य कालो द्विमासात्मको मन्येत, तर्हि प्रातस्सवनमाध्यन्दिनसवनतृतीयसवनानां कालाः कीदृशा मन्तव्याः ? संवत्सरसत्रकालश्च कीदृशः ? इत्यादि च तेन निरूपणीय एव । अथापरम्, यदि दीर्घौषसे सुमेरावेव प्रातरनुवाकपाठसम्भव इति मन्येत, तर्हि युधिष्ठिरादिभिर्वाजिरावान्तेरार्यावर्त्तवासिभिरनुष्ठितेष्वश्वमेधादिषु सोमयागेषु प्रातरनुवाकानां पाठो न बभूवेति किं मन्तव्यम् ?

अन्यच्च; यथा सहस्रवार्षिकसत्रस्यासम्भवता मालक्ष्य मीमांसायां

मधिकरण मारभ्य सिद्धान्तितम्, तथैवोषसि सहस्रसङ्ख्याकाना मृचां पाठोऽसम्भव इति किं नात्र विचारित मित्यपि विचार्य मेवेति।

वस्तुतस्तु "महति रात्र्या अनूच्यः पुरा शकुनिवादात्"–इत्येव विधिः। 'रात्र्याः' पूर्वस्योपवसथाख्यस्य दिनस्य अग्निष्टोमीयपशु-नुष्ठानयुक्तस्य या रात्रिः तस्या रात्रेः सम्बन्धिनि शेषे महति' अवतिष्ठमाने सति प्रातरनुवाकाख्याना मृचां पाठ आरभ्यः, 'शकुनिवादात्' शकुनयः पक्षिणः, ते यस्मिन्नुषःकाले प्रबुध्य वदन्ति ध्वनिं कुर्वन्ति, ततः 'पुरा' पूर्व मेव तत्पाठः समाप्य इत्यर्थः। अत्राह सायणः— "एतदुक्तं भवति, यस्मिन् काले प्रारब्धः प्रातरनुवाकः तमसोपघातात् पुरैव समापयितुं शक्यः स्यात्, तदा प्रारब्धव्यः"–इति (२. २. ५.)। अवश्यपाठ्य-प्रातरनुवाकस्य सङ्ख्या त्रेकविंशतिरेव (ऐ० ब्रा० २. २. ६.); काम्यपाठ्यस्य तु शतादिका सहस्रान्ता। तदत्रावश्यपाठ्याना मृचां पाठस्तु प्रातरेव नूनं सम्पद्यत इति प्रातरनुवाकनाम-करण मुपपद्यत एव। काम्यपाठ्यानां शतादिसहस्रान्ताना मृचां पाठस्तत्रोषस्यसम्भव इत्येव "महति रात्र्या अनूच्यः"–इति विधिः। सहस्रप्रातरनुवाकीयासु ऋक्षु एकपदादीना मप्यस्ति विद्यमानता, न चाभ्यस्तर्चां पाठे विशेषवेलस्यात्र सम्भवति; अतो रात्र्या महति भागेऽवशिष्टे आरब्धः प्रातरनुवाकपाठः शकुनि-वादात् पुरा समाप्तो भवेत्, किं तत्र चित्रम्? किन्तु सहस्रर्च-पाठपक्षे "पुरा शकुनिवादात्"–इति नियमाभावश्च। अत एवेद मपि श्रुतं तत्र तदुत्तरम्— "अपरिमित मनूचम्"–इति (२. २. ७.)। "शतं सहस्र मित्यादि सङ्ख्यापरिमाणं परित्यज्य मध्यरात्रादूर्ध्वमुपक्रम्य सूर्योदयात् प्राचीनकाले यावतीरनुवक्तुं

शक्तिरस्ति तावतीरनुब्रूयात्"–इति तत्र सायणभाष्यम्। एतेन सहस्रानुवचनपक्षे परा शक्वनिवादादिति नियमो परित्याज्य इति स्फुटम्। अप्यस्मन्मते 'शतं सहस्र मित्यादि सङ्ख्यापरिमाणं परित्यज्य'–इत्यत्र स्थाने 'सहस्रं सङ्ख्यापरिमाणं परित्यज्य'–इत्येव मन्तव्यम्; सहस्रपाठमात्रस्य कृच्छ्रसाध्यतया तत्रैवापरिमित-पाठव्यवस्थाया औचित्यादिति।

अस्ति चान्यत्र प्रातरनुवाकस्य सर्वदिवापाठ्यत्वश्रुतिः— "उदित आदित्ये प्रातरनुवाक मनुब्रूयात्; सर्वं ह्येवैतदहर्दिवाकीर्त्यं भवति"–इति (ऐ० ब्रा० ४. ३. ४.)। काम्ये बहुसङ्ख्याकर्त्वा पाठपक्षे एतदपि स्याच्छरणम्; नित्यपाठ्यानां प्रातरनुवाकर्त्वा मल्पसङ्ख्यात्वेन प्रातःपाठस्य वश्यम्भावित्वात् प्रातरनुवाक इति नामधेयस्यान्वर्थतापि नानुपपन्नेति विचार्य मेतत् सुधीभिरिति॥

उषोदीर्घत्व श्रवणपरं तदीयचतुर्थप्रमाण मप्यकिञ्चित्करम्। तथाहि— "स क्षपः परिषस्वजे"–इति (ऋ० सं० ८. ४१. ३.) मन्त्रे श्रूयते "तस्य वेनीरनु व्रत मुषस्तिस्रो अवर्धयन्"–इति। तदिह उषसस्त्रित्वश्रवणात् दीर्घत्वं गम्यते, तच्च सुमेरावेव सङ्गच्छत इति तदीयम्। तत्वतस्त्विह वरुणविज्ञानोपदेशके मन्त्रे नोषस-स्त्रित्व मभिहितम्, प्रत्युत 'तस्य' वरुणस्य 'व्रतम्' कर्म 'अनु'-सृत्य 'उषः' कालः 'तिस्रः वेनीः' त्रिविधाः जरायुजाजरायुजो-द्भिज्जाः 'वेनीः' प्रजाः 'अवर्धयन्' वर्धयति इत्येवोपदिष्टम्। अन्यत्रान्यत्र च "प्रजा ह तिस्रो अत्याय मीयुः"–इत्यादौ (ऋ० सं० ८. १०१. १४.) प्रजानां त्रिविधत्वं श्रुत मेवेति द्रष्टव्यम्। 'अव-र्धयत् + नभन्ताम्–इतिपदद्वयसन्धिजन्यम् अवर्धयन्नभन्ता मिति रूपम्; अपिवा व्यत्ययकृतं बहुवचनम्।

उषसो दीर्घत्वप्रमाणाय तेन यदिय मृगुदाहृता— "कियात्या यत् समया भवति"–इति (स० १. ११३. १७.), सैषा उषोविज्ञान-सूक्तान्तर्गता उषसोऽनन्तत्वं वेदयति, न तु प्रादेशिकदीर्घत्वम्।

तथोषसः पञ्चविभागव्याख्यानेन दीर्घत्वं सूचयितुं यत् तैत्तिरीयानुवाकस्योद्धरणम् (सं० ७. २. २०.), तदपि निरर्थकम्; तादृशविभागस्यात्रार्यावर्त्तेऽप्युपयोगित्वात्।

किञ्चेहेद मपि विवेच्यम्,— सुमेरुप्रदेशीयोषसो दीर्घत्वं किं मायावर्त्तवासिना मस्माकं दृष्ट्या प्रतिपाद्यते, उत तत्रत्याना मिति। इहत्याना मिति चेत्, तेन कथं सिध्येत् तत्रद्यार्याणां वासः? अथ तत्रत्यानां तादृशमन्त्रकृत्त्वं प्रमेय मिति चेत्, तदपि नोपपद्यते; दीर्घत्वं ह्यापेक्षिकं भवति, न हि तत् उषोऽन्तरदर्शन-विरहादपि सङ्गच्छते! तत् किमेतेन उषोदीर्घत्वप्रकाशकमन्त्रा-न्वेषणेनेति धीषणावता तेनैव स्वय मालोच्य मिति॥

यदिदं श्रूयते— "तानीदहानि बहुलान्यासन् या प्राचीन मुदिता सूर्यस्य"–इति (ऋ० सं० ७. ७६. ३.), तदितः खलू-षसः कतिदिनव्यापित्वं गम्यते स्फुट मिति तेषा माद्यार्याणां सुमेरुवासित्वे पञ्चमं प्रमाण मित्याह। अस्माकं तु नात्र श्रुतौ तिल-कोद्भावित मर्थतिलकं प्रतीयते, प्रतीयते तु अह्ना मानन्त्यम्; तदिहाशेषशेमुषीमन्तो भूमिदेवा एव प्रमाणम्॥

उषःशब्दस्यानेकत्र बहुवचनान्तप्रयोगोऽप्यत्रास्यैकं प्रमाणम्, तदिदं षष्ठं स्यात्। तद्यथा तैत्तिरीयब्राह्मणे मन्त्रः—

"इमा एव ता उषसो याः प्रथमा व्यौच्छन्।
ता देव्यः कुर्वते पञ्चरूपा। शश्वतीर्नावपृज्यन्ति।
न गमन्त्यन्तम्"–इति (२. ५. ६. १४.)।

तत्वतस्तत्प्रदर्शितो ह्येष मन्त्रः पुनर्जन्मविषयो न तूषसो दैर्घ्य मावेदति ; तत् पश्यत्वेतत्पूर्वमन्त्रावेतौ—

"पूर्वं देवा अपरेणानुपश्यञ्जन्मभिः । जन्मान्यवरैः पराणि ।

वेदानि देवा अय मस्मीति माम् ।

अहꣳ हित्वा शरीरं जरसः परस्तात्"—इत्येकः ,

अथापरः— "प्राणापानौ चक्षुः श्रोत्रम् । वाचं मनसि सम्भृताम् । हित्वा शरीरं जरसः परस्तात् । आ भूतिं भूतिं वय मश्नवामहै" —इत्यतस्तृतीय एवैष यः प्रदर्शितपूर्वः । तथा च पूर्वजन्मनि दृष्टा एवेमा उषस इत्येव तत्फलितार्थः सम्पद्यते । एवञ्च न कथ मप्येष मन्त्रः सुमेरुप्रदेशीयोषसो बहुदिनव्यापित्वे प्रमाणं भवितु मर्हतीति स्फुटम् । किञ्च तत्रत्योषसो बहुदिनव्यापित्वं तत्रत्यानां कथं भवेदधिगन्तव्य मित्यपि विचार्य मेव ॥

यदप्युक्तं सूर्यस्य उषसश्च सुमेरुतो दक्षिणोदयदर्शनादेव "पुत्रश्चरति दक्षिणायाः (ऋ० सं० ३.५८.१.)"—इति दक्षिणापुत्रत्वव्यपदेशोऽपीति । तच्चैतत् सप्तमं प्रमाण मपि मज्जमानस्य वहमानतृणावलम्बन मिवाकिञ्चित्करम् । उत्तरः = ऊर्द्धस्थः सूर्यः, दक्षिणा = अधःस्था पृथिवी , इत्येव सर्वत्र ज्ञेयम् । सुमेरुवासिनां तु येयं दिगस्माकं पश्चिमा, सैव स्याद् दक्षिणा ; यस्यां दिशि सूर्योदयस्तस्या एव प्राक्त्वनियमात् । पुरः, पुरस्तात् , प्राक्, पूर्वेत्यभिन्नार्थाः ; सूर्योदयास्तनिबन्धन एवात्र भवत्यस्माकं दिग्व्यवहारः प्राक्प्रत्यगुदगर्वागितीति । श्रुतिसिद्धं (ऐ० ब्रा० १. २. ३.) युक्तिगम्यञ्चैतत् किं तेन स्वमतप्रतिपादनव्यग्रतया विस्मृत मपि वा हठैकपरतया अस्माकं चक्षुःषु धूलिमुष्टिप्रक्षेपायोद्युक्त इति लुक्कायितुं यतित मिति विचारयन्तु धीमन्त एव ॥

अहो चित्र मिदम् ! "सप्तर्षिहस्तावचितावशेषानधोविवस्वान्" –इति कुमारसम्भवस्थोकोऽपि तेन स्वमतप्रमाणत्वेनोपन्यस्तः, तत् किं मद्ययुगीयस्य "अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः"–इतिवादिनः कालिदासस्यापि सुमेरुस्थत्वं मन्तव्यम् ? तदिदं तदीय मष्टमं प्रमाण मस्मानतीव विस्मापयतीत्यत्र मौनावलम्बन मेव श्रेयः ॥

"दीर्घतमा मामतेयः"–इत्येतदनुक्तो 'दीर्घतमाः'–इति सञ्ज्ञापदमपि स्वमतप्रमाण मस्मानि तेन । तदिदं तदीयं नवमं प्रमाणम् । तत्वतो वेदार्थमीमांसैकप्रयोजनस्य मीमांसादर्शनस्य मते दीर्घतमा इति हि प्रावाहणिरितिवत् कल्पितं नाम ; यः खलु ममताप्रसूतः, स नूनं दीर्घतमास्तत्र कः सन्देहः । द्रष्टव्यश्चैष सिद्धान्तो मी० द० १. १. २८–३२ सूत्रभाष्ये ॥

यदपि निर्णीतम् ,— वैदिकमन्त्रेषु 'नवग्वा'–इतिपदस्वारस्यात् नवमासात्मको वर्षः 'दशग्वा'–इतिपदस्वारस्याद् दशमात्मको वर्षश्च गम्यते, तादृशवर्षौ नास्मत्प्रदेशेष्विति नूनं सुमेरुप्रदेशीय एवेवं वर्षौ वर्णित इति स्वीकार्य मित्थ मपि सिध्यति तस्यार्यादिवासभूत्व मिति । तदिदं दशमं प्रमाण मपि निर्बीज मेव । अत्र हि बह्वः पृच्छाः समुत्थीयन्ते । तद्यथा— सुमेरुप्रदेशे किं मद्यापि नवमासात्मकोऽब्दः प्रचलितो विद्यते ? उत दशमासात्मकः ? आद्यश्चेत् दशग्वशब्दस्य का गतिः ? द्वितीयश्चेदाद्यस्य का गतिः ? उभयविध एवाब्दस्तत्राद्यापि भवतीति चेत् , कथ तयोरेकत्र समावेशः ? यथास्मद्देशेष्वत्र भूभ्रमणजन्य मब्दपरिगणनं भवति, तथा तत्र तत् किन्निबन्धनम् ? अस्मदब्द एव तेषा मेकदिनम् , तादृशकतिदिनात्मकः को मासः ? तादृशकतिमासात्मकश्चाब्दः ? तादृश-

कत्यब्दस्थायि च तेषां जीवनम् ? श्रुतिसिद्धं शतायुष्ट्वञ्च तेषां कथङ्कार मुपपद्यत इति ।

इहापर मपि विवेच्य मस्ति,—यथा नवग्वा पदं नवमासात्मकवर्षवाचकम्, दशग्वा पदं दशमासात्मकवर्षवाचकं चेति मन्यते, तथैव शतग्विपदं किं शतमासात्मकवर्षवाचकं मन्तव्यम् ? श्रूयते तु शतग्विपद मपि । तद्यथा—

"शनेश्चिदन्तो अद्रिवोऽखावन्तः शतग्विनः ।
विवक्षणा अनेहसः"—इति ऋ० सं० ८. ४५. ११ ।

"आ न इन्दो शतग्विनम्"—इति च ऋ० सं० ९. ६७. ६ ।

वस्तुतस्त्वेवमादिषु स्वमतपोषकत्वदर्शनं तस्य नूनं पाण्डुरोगिणां सर्वत्र पीतदर्शन मिवेति मन्यामहे वयम् ॥

यच्च सिद्धान्तितं तेन,— वैदिकमन्त्रादिषु देवयानशब्दतः सूर्यस्य सुमेरुयान मुत्तरायण मवगम्यते, पितृयानशब्दतश्च सूर्यस्य कुमेरुगमनं दक्षिणायनम् ; तथा च सुमेरुप्रदेशेषु देवयानेऽहः सम्भवति, पितृयाने च रात्रिरतो देवयानपितृयानशब्दान्वितमन्त्राणां तत्रैव रचना बभूवेति तत्रार्यादिवासस्येद मेकादशं प्रमाण मिति । एतच्च सर्वं स्यात् प्रेक्षावतां परीक्षणासह मेव । तच्चैवम् ,— मध्यभूभागत एव हि उत्तरायणदक्षिणायने परिदर्शनीये , उत्तरदक्षिणकेन्द्रभूवासिनान्तु नेते समधिगम्ये ; तत् किमु देवयानपितृयानशब्दार्थतो दिवानिशेत्यादिसमुद्भावनादिविचारेणेति । यद्युच्येत इहत्या एवर्षयो देवयानपितृयानशब्दान्वितमन्त्रद्रष्टारो बभूवुरिति स्वीकार्येऽपि देवयानार्थस्तु सुमेरुगमनमार्गः, सुमेरोश्च देवस्थानत्वकथन मार्यपूर्वपुरुषावासनिबन्धन-गौरवसूचक मिति, एतदप्यसङ्गतम् ; शतपथब्राह्मणादौ (१४. ९. १.) देवयानपितृयानशब्दयोरपरार्थ-

प्रतीतेः, सुमेरोर्देवस्थानत्वे स्वीकृतेऽपि तत्रास्मदादिपुरुषाणां वासस्य हेतूपलाभाभावाच्चेति स्वच्छधिया ध्यातव्यम्। वस्तुतस्तु 'देवाः' द्युस्थाः अश्विप्रभृतयो 'यान्ति' गच्छन्ति, येन मार्गेण, स एव भमण्डलादिभ्रमणमार्गो देवयानाख्यः; तथा 'देवाः' द्युस्थाः रश्मयः पृथिव्यादौ गच्छन्ति, यैर्मार्गैस्तेषाञ्च सुतरां देवयानसञ्ज्ञा; तेरेव मार्गैः पृथिव्यादिशनैश्चरान्तनिवासिनो विनिर्मुक्तस्थूलदेहा जीवा रश्मिभिराकृष्यमाणा द्युलोकं गच्छन्ति। तथैव पितृस्थानानां चन्द्रमण्डलादीनां भ्रमणमार्ग एव पितृयानम्; अपि अन्तरिक्षस्थं यमनामवायुविशेषाधिकृतं चन्द्रलोक मपरं वा तत्सन्निहितं पितृलोकं त्यक्तस्थूलदेहा अर्चिरादिसहाया गच्छन्ति येन, स एव मार्गः पितृयानाख्यः। तिलकोदाहृतमन्त्राभ्याञ्चैवमेव बुद्ध्यते। तत्र प्रथम एषः (ऋ० सं० १. १८३. ६.)—

"अतारिष्म तमसस्पार मस्य प्रति वां स्तोमो अश्विनावधायि।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम्"—इति।

अस्यार्थः— हे 'अश्विनौ' प्रातरुद्यमानप्रथमयुग्मदेवौ! 'देवयानैः पथिभिः' द्युस्थैः स्वमार्गैः 'इह' पृथिव्याम् 'आयातम्' उदयताम्। तथाचेह युवयोरुदयात् 'अस्य तमसः' रात्रिजन्यान्धकारस्य 'पारम्' पर्यन्तम् 'अतारिष्म' उत्तीर्णाः स्मः। 'वां प्रति' 'स्तोमः' कृतज्ञतासूचकं स्तोत्रम् अस्माभिः 'अधायि'। 'इषम्' अन्नम्, 'वृजनं' मनोबलम्, 'जीरदानुं' जरान्तव्यापिनं सुदीर्घजीवनञ्च 'विद्याम' लभेम, वय मिति। एवञ्चाश्विनोरुदयकाले जायतः स्तोत्रगानं कुर्वतोऽन्नादीनि अवश्यम्भावीनीति समर्थैर्जनैस्तथा कर्त्तव्य मित्युपदेशः फलितः।

अथापरः ऋ० सं० १. २. १८ पूर्वार्द्धः—

"परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात्"–इति।

अस्यार्थः— हे 'मृत्यो!' 'ते' 'देवयानात् इतरः यः स्वः' पन्थाः, 'तं' 'पन्थां' पन्थानम् 'अनु'-सृत्य 'परेहि' इति। अत्र मृत्युर्माध्यमिको वायुविशेषः, आन्तरिक्ष्यो मार्ग एव पितृयानाख्यस्तस्य स्वकीयः। यथा भूस्थाना मग्निः राजा, द्युस्थानां सूर्यः, तथैव मध्यस्थानां पितॄणां मृत्युर्यमो वा राजेति। यायजूकानां स्वर्गगामिनां पितॄणा मर्चिरादिसाहाय्येन पितृयान मेव शरणम्।

संहिताया मन्यत्रान्यत्र चैवं श्रुतम्। तद्यथा (१० २. ७.)—

"पन्था मनु प्र विद्वान् पितृयाणं द्युमदग्ने समिधानो वि भाहि"

हे 'अग्ने!' 'पितृयाणं विद्वान्' त्वं 'समिधानः' सन् 'द्युमत्' यथा स्यात् तथा 'प्रविभाहि' इति तत्सङ्क्षेपार्थः। एतेनाग्निशिखानां पितृयानगामित्वम्, तदनु अनुष्ठितयागानां त्यक्तपार्थिवदेहानाञ्चेति ध्वनितम्॥

श्रुतं च तैत्तिरीयब्राह्मणे— "एकं वा एतद् देवाना महः यत् संवत्सरः"–इति (३. ९. २२. २.)। अप्येतन्मूलकं स्यादेतन्मनुवचनम् (१. ६७.)—

"द्वे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः।

अहस्तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्"–इति। तदेवमादिवचनानि तूपपद्यन्ते सुमेरावेवेत्यतः स एव देवलोको मन्तव्यः। अत एव महाभारतीयवनपर्वणि— "उदीचीं दीप्रयत्नेष दिशं तिष्ठति वीर्यवान्। महामेरुर्महाभागः शिवो ब्रह्मविदां गतिः"–इत्यादिः कथा च वर्णिता (१६३अ०१२श्लो०)। तानीमान्येव वचनान्यवलम्ब्य प्रथमं सुमेरोर्देवनिलयत्वं सर्वसम्मत मिति प्रमाणयितुं चेष्टितं तेन; ततस्तत्रार्यपितृपुरुषाणां वास

आसीदित्यत एव देवनिलयत्वेन स मेरुर्वर्णित इति सिद्धान्तितं निराबाध मिवेति। अहो वत! तस्यैष सिद्धान्तोऽपि दरिद्राणां मनोरथ इवैव प्रतिभात्यस्माकम्। न हि श्रुत्युक्तस्य देवाना मित्यस्य सुमेरुवासिना मित्यर्थावगतौ किञ्चिन्मान मस्ति; अस्ति च ततोऽन्यत्र। मनुसंहितायान्तु अस्मत्संवत्सरकालमितं भवति देवाना महरित्युल्लिखित मिति तु सत्यम्, परं न तत्र सुमेरोर्गन्धोऽप्यस्तीत्यपि नासत्यम्। एवं महाभारतादौ सुमेरुवासिनां देवत्वं वर्णित मिति च सत्यम्, परमिहापि न तेषां देवानां मासर्त्वयनवत्सरमानान्यभिहितानीत्यपि नासत्यम्। ज्ञातव्यानि तु सुमेरुप्रदेशीयदेवशब्दवाच्यानां तानि च भवन्ति कथम्भूतानि? आयुःपरिमाणञ्च तेषां तदब्दमानतो भवति कीदृश मित्यपि ज्ञेय मेव। अप्येवं "शतायुर्वै पुरुषः"-इत्यादिश्रुतिसिद्धं शतायुष्टं तत्प्रदेशवासिनां तद्देशीयाब्दमानेनैव भवति चेत् कथं न तत्र श्रुतिविरोधः सम्पद्यते? वेदेषु हि यच्छ्रूयते मानवानां पूर्णायुः शतवर्षाणीति, तन्नून मस्मद्देशीयाहोरात्रमानत एवेति सर्व मेवैतच्चिन्त्य मेव। किञ्च यथा सुमेरुप्रदेशेषु "दैवे रात्र्यहनी वर्षम्"-इति मनुवचन मुपपद्यते, तथैव कुमेरावपि किं नोपपद्यते इत्यपि विचार्य मेव। विचारितेषु चैतेषु सुमेरोरादार्यावासनिर्णयाय तेन प्रदर्शितं प्रमाणपारायणं कुतो न जलमध्यगतलवणवद् विलीयेतेत्यपि ध्येयम्।

वस्तुतो महाभारतादौ यद् वर्णितं सुमेरोर्देवलोकत्वम्, तत्त्वापेक्षिक मित्यस्माभिर्मन्यत एव। यथेह सौरजगति भूलोकान्तरिक्षलोकद्युलोकविभागास्तथैवास्मच्छरीरेऽपि मन्यन्त एव शारीरविद्भिरस्मद्देशीयैः। एव मग्निवायुसूर्यज्योतिषां प्रधानतो

भूरादीनि स्थानानीति स्वीकारकारिणोऽपि वयमिहैकत्र भुव्येव किं तेषां विद्यमानता न स्वीकुर्महे ? भुवि तेषा मस्तित्वस्य कथा तु दुरे आस्ताम्, भौमपदार्थेषु स्मच्छरीरादिषु च सर्वत्रैव तेषां त्रयाणा मेव देवानां सत्ता स्वीकुर्महे एव। तदेवं यथास्य सौरजगत ऊर्ध्वभागे स्वर्गस्थितिः स्वीक्रियते, तथैवास्यां पृथिव्या मपि वङ्गादिदेशत ऊर्ध्वस्थाः काश्मीरादयो वङ्गादिदेशीयानां स्वर्गाः, तत ऊर्ध्वस्थाः कैलाश-गन्धमादन-रावणह्रद-मानससरोवरादयः काश्मीरीयादीना मपि स्वर्गाः, ततोऽपि ऊर्ध्वस्थाः सुवीर्यप्रदेशाः शान्तपितृवर्गादयश्च रावणह्रदादिवासिना मपि स्वर्गाः, तेभ्योऽप्यूर्ध्वतनः सुमेरुप्रदेशस्तु सर्वभूवासिनां स्वर्ग एवेत्यत्र कः संशयः। अपि हि पृथिव्या उत्तरकेन्द्रस्योपरिभागे ध्रुवस्य संस्थानदर्शनात् तत्केन्द्रभागस्योर्ध्वत्वम्, तत एव तस्योत्तर इति व्यपदेशश्चेति सिद्धान्तः सर्ववैदिकसम्मतः। अत एव महाभारते उदीच्यां देवनिलयो वर्णितः, अपाच्यां यमनिलयश्च, एव मन्यत्रान्यत्र च। तदित्थं सुमेरुप्रदेशस्य तस्य स्वीकृतेऽप्यापेक्षिकदेवनिकेतनत्वे न सिध्यति तत्रार्यावास इति ध्रुवम्॥

यदपि स्वमतपोषिकेत्युद्धृता मत्कृता सामटीप्पन्येका तेनायुष्मता, तदपि तथैव। पश्यतु तावत्,— अस्ति सामोत्तरामन्त्रः "समानो अध्वा स्वस्रोः"–इति (सा० स० ८. ३. १४. ३.), श्रुतञ्चात्र 'सुमेके'–इति पदम्; विवरणकृन्माधवाचार्येण तद्व्याख्यायां 'संवत्सरे दक्षिणायने रात्रेर्वै वृद्धिः, उत्तरायणे ह्रासः'–इत्यलेखि, मया चैषा पङ्क्तिस्तत्र स्वकीयठीप्पन्यां प्रकाशिता च। सुमेरुप्रदेशवासिना मेव दक्षिणायने प्रसरति रात्रिः, उत्तरायणे च तथा दिन मिति तद्वर्णनपरैवैषा ऋगित्याह स श्रीमान् बालगङ्गाधरः।

तत्त्वतस्त्वे तदार्यावसीययोरेवाहोरात्रमानयोर्वर्धनकालप्रकाशने एव तस्याः पङ्क्तेस्तात्पर्यम् ; दक्षिणायने हि वर्धत एवेह रात्रिमानम् , तथोत्तरायणे च दिवामान मिति। किञ्चात्रैव मन्त्रे यच्छ्रूयते 'समानो अध्वा स्वस्रोः'–इति, भगिनीरूपयोः रात्र्युषसोः सञ्चर-मार्गः एक एव, येनाकाशमार्गेणोषा निर्गच्छति तेनैव रात्रिरपीति तदर्थः। तदेव मिदं स्वप्नदृष्टाश्रुतपूर्वरत्नोद्धरणाय वेदावेस्तादि-जलधिप्लवमानस्याश्रयहीनस्य तस्य कुशकाशावलम्बनं सर्वथा निरर्थकमेव भवितव्यं तत्रास्ति किमु शोच्य मिति दिक् ॥

अथैवम् "अनु प्रत्नस्यौकसो हुवे (१. ३०. ९.)"— इत्यादि-श्रुतिगम्य मार्याणां प्रत्नौकस्त्वं कतमस्य प्रदेशस्य स्यान्मन्तव्य मिति चेत्, अत्रोत्तरन्तु "स चार्यावासः पूर्वं तावत् हिमवत्पृष्ठस्य दक्षिण-भागे सुवास्तुप्रदेशे एवासीत्"–इत्यादिनोक्त मिवैव द्रष्टव्यम् (२२पृ० १८पं०)। अपि "अनु प्रत्नस्यौकसो हुवे"–इत्यृक्श्रवणमात्रेण किं सर्वेषा मेवार्याणा मादिवासोऽन्यत्र क्वचिदासीदित्यनुमानं स्यात् सङ्गतम्, किं मु स्यात् तन्मन्त्रद्रष्टुरेवेति च विवेच्यम्।

श्रूयते ह्येवम् (ऋ० सं०. ३. ५८. ६.)—

"पुराण मोकः सख्यं शिवं वां
युवोर्नरा द्रविणं जक्षाव्याम्।
पुनः क्षत्राणाः सख्या शिवानि
मध्वा मदेम सह नू समानाः"–इति।

एतस्य मन्त्रस्य द्रष्टुः शुनःशेपस्य पूर्वावास आसीद् जाङ्गल्या मूले जङ्गूनाञ्चाधिपत्ये (ऐ० ब्रा० ७. ३. ६.) जङ्गुमुन्यात्रम-कान्तारे ; तत एव हरिश्चन्द्रपुत्रो रोहितः तं क्रीत्वा सारस्वतप्रदेश मानीतवान्। तच्चाख्यान मिहैव (७. ३. १—६.) श्रुतम्।

जह्नोस्तदाश्रमारण्यं त्वद्यापि जाह्नवप्रदेश इति गङ्गाप्रभवे हिमपत्पृष्ठे प्रसिद्धम्। तत एव जाह्नवप्रदेशात् गङ्गायाः प्रकाशदर्शनाद् गङ्गायाश्चापरं नाम जाह्नवीति। तदित्थम् "अनु प्रत्नस्यौकसो हुवे"–इति श्रुतिः सिद्धान्तपक्षेऽपि सुसङ्गच्छत एव।

अपिवा हिमवत्पृष्ठस्थौकोनामनदीतीरभूमय एव प्रत्नौकसः; तत्र चासीत् केषाञ्चिदार्याणां पुरा वास इत्यपि सुवच मिति॥

इदानीं सैषार्यावर्त्तभूमिः पश्चिमत उत्तरतश्च क्रमात् सङ्कुचिता, दक्षिणस्याम्प्रायः पूर्ववदेव, पूर्वस्यान्तु हुवृद्धिङ्गतेत्युत्कल-राढ़-गौड़-वङ्ग-नरक-प्रदेशा अप्यद्यार्यावर्त्तान्तर्गताः पुण्यभूमय एव गण्यन्ते; अतोऽत्रत्यवाङ्गाद्याश्चाद्य यूरोपादीनां म्लेच्छदेशत्वं मत्त्वा तत्र गन्तुं न हृदयेनोत्सहन्ते! कालो हि बलवत्तर इति॥

अथ प्रकृत मनुसरामः। एतस्मिन्नेवार्यावर्त्तेऽस्यैतरेयस्यासीद् वास इति स्वीकृतेऽपि, तदानीन्तनार्यावर्त्तस्वरूपेऽभिज्ञातेऽपि, कतमस्मिन् प्रदेशे स उवासेति निर्णयोऽसम्भव इव प्रतिभात्यस्माकम्; वक्ष्यमाणप्रकारेणास्य पाणिनियास्कादिभ्योऽतिप्राचीनत्वनिर्णयात्। एव मपि तत्र कृतेऽतियत्नेऽवगम्यते स्यादैरावतीतटसन्निहिते क्वचित् प्रदेशे इति। श्रुतं ह्यत्रैकत्र ऐरावतीपारदृष्टान्तः—"यथा सैरावतीं नावं पारकामाः समारोहेयुः"–इति (६. ४. ५.)। इह 'सा' इति द्वितीयैकवचनस्य सौ रूपम्, ता मित्यर्थः। सायणेन तु सैरावती मित्येकं पदं नाव मित्यस्य विशेषणं कृतम्, समुद्र मित्यध्याहृतञ्च। तन्न रोचतेऽस्मभ्यम्; अकृतेऽध्याहारेऽपि सम्पन्नेऽर्थेऽध्याहारस्यानौचित्यात्, समुद्रस्यैवं सर्वदैव नावा तरणं सर्वदेशीयानां सर्वेषां मनुपलम्भाद् दृष्टान्तयोग्यत्वाभावाच्चेति। सैषा नदी संहिताकाले परुष्णीति प्रसिद्धासीत्, तदुक्तं निरुक्तकारेण "इमं मे गङ्गे"–इति

मन्त्रस्य व्याख्यानावसरे "इरावतीं परुष्णीत्याहुः"-इति (९. ३. ५.)। तदेव मत्वैवार्यावर्त्ते इरावत्या नद्याः सन्निधौ कस्मिंश्चिज्जनपदे स विरराज महिदास ऐतरेय इति सिद्धम् ॥

---

(४)

अथ कः कालोऽस्यैतरेयस्येति विचार्यम्। श्रूयते हि ऋक्संहितायां चतुर्दशर्चं सूक्त मिदम्— "प्रैते वदन्तु प्र वयं वदामः"-इति (१० ९४. १—१४.)। तदिदं सर्वचरुनामजनपदे अर्बुदनामर्षिणा दृष्टम्। तदाहैतरेयः— "देवा ह वै सर्वचरौ सत्रं निषेदुः, ते ह पाप्मानं नापजघ्निरे। तान् होवाचार्बुदः काद्रवेयः सर्पऋषिर्मन्त्रकृत्"-इति (६. १. १.)। तस्मिन सर्वचरौ अर्बुदोदासर्पणी, नामैका प्रपदासीत्। प्रपद् = जलप्रपातो निर्झरो वा। ऐतरेयकालेऽपि सा प्रपदासीत् प्रसिद्धा। तदुक्तं तत्र तदुत्तरम्— "तद्वाप्येतर्ह्यर्बुदोदासर्पणी नाम प्रपदस्ति"-इति। सैषा प्रपत् यास्ककालात् पुरैवाभवद् विलुप्तेति गम्यते, अन्यथा तदानीन्तनं तन्नाम निरुच्येत तेन, यथा विपाशः। तथाहि— "आर्जीकीये शृणोह्या सुषोमया" -इति (ऋ० सं० १०. ७५. ६.) ऋगंशव्याख्यावसरे निरुक्तं तेन— "आर्जीकीयां विपाडित्याहुः०—०पूर्व मासीदुरुञ्जिरा"-इति (निरु० ९. ३. ५.)। तदेवम्— यास्कसमये या नदी विपाडिति प्रसिद्धा, सैवासीत् तन्मन्त्रकाले आर्जीकीया, ततः पुरा उरुञ्जिरेति च व्यक्तम्। एव मेकस्या एव नद्याः कालभेदात् त्रिधा

गुग्गुलूर्णास्तुकाः सुगन्धितेजनानीति" ... ... १।२००
"को ऽनड्वा पुरुष इति, न देवान् न पितॄन् न मनुष्यानिति" ... ४।३८
"को नाम प्रजापतिः श्वशुरः" ... ... २।६८
"कोऽर्हति मनुष्याः सर्वं सत्यं वदितुं सत्यसंहिता वै देवा
अनृतसंहिता मनुष्या इति" ... ... १।५४

"ग्रहान् मेऽग्रहीत् प्राचारीन्म आहुतीर्मेऽहौषीदित्यध्वर्यवे
दक्षिणा नीयन्ते, उदगासीन्म उद्गात्रे,
अप्रंसीन्मेऽयाचीन्म इति होत्रे" ... ... ३।२०६

"घृतं प्राश्य प्रंसेट्, यथा ह वा इदं मनो वा रथो वाक्तो वर्त्तत
एवं ह्येवाक्तो वर्त्तते" ... ... २।२७८

"चक्षुः पुरुषस्य प्रथमं सम्भवतः सम्भवति" ... ... २।७
"चितेध सुकृथ मिति ह स्म वा एतदाचक्षते" ... २।२६२

"ज्यायान्त्सन् गर्भः कनीयांसं सन्तं योनिं न हिनस्ति" ... ३।८६

युधानि यदस्यरथः कवच इषु धन्व" ... ... ४ । १०३

"एतानि ह वै वेदाना मन्त्रःश्लेषणानि यदेता व्याहृतयस्तद्यथात्मना-
त्मानं सन्दध्याद्, यथा पर्वणा पर्व, यथा श्लेष्मणा चर्मणयं वान्यद्वा
विश्लिष्टं संश्लेषयेदेव मेवैताभिर्यज्ञस्य विश्लिष्टं सन्दधाति" ३ । १६७

"एता वै प्रजा हुतादो यद् ब्राह्मणा अथैता अहुतादो यद्राजन्यो
वैश्यः शूद्रः" ... ... ४ । १०३

"एतेन ह वा ऐन्द्रेण महाभिषेकेणोदमय आत्मे योऽङ्ग मभिषिषेच" ४ । २६३

"एवं ह वाव स ऋत्विजि प्रतितिष्ठति यो दादशाहेन यजते" २ । २७४

"एष एतेषां प्रयुक्ततमो यदजः" ... ... १ । २६४

"ऐतशो ह वै मुनिरग्नेरायुर्ददर्श ;०—०सोऽब्रवीत् पुत्रान्, पुत्रका
अग्नेरायुरदर्शं तदभिलपिष्यामि ; यत् किञ्च वदामि तन्मे मा
परिगातेति ०—० तस्याभ्यग्नेरैतशायन एत्याकाले ऽभिहाय
मुख मप्यगृह्णादृषन्नः पितेति ; तं होवाचापेह्यलसोऽभूर्यो मे
वाच मवधीः, शतायुं गा मकरिषंः सहस्रायुं पुरुषम्, पापिष्ठां
ते प्रजां करोमि यो मेत्थ मसक्था इति" ... ३ । ३६४

"ओकसारी वा इन्द्रो यत्र वा इन्द्रः पूर्वं गच्छत्येव तदापरं गच्छति" ३ । ३०१

प्रसिद्धिर्दर्शिता ; नात्र तथा अर्बुदोदासपर्ण्यास्तात्कालिकं नामादिकं किमप्युक्तम् ; इत एव गम्यते ततः पुरैव सा विलुप्ता, विभिन्ननामहेतुतोऽपरिचेया वाभूदिति। तथा चाय मैतरेयो निरुक्तकृतोऽस्माद् यास्कात् पूर्वतनः। उपलभ्यते चेत ऐतरेयतोऽपि बह्वनि वचनान्युद्धृतानि यास्केनेति। तद्यथा— "यस्यै देवतायै हविर्गृहीतं स्यात् तं मनसा ध्यायेत् वषट् करिष्यन्निति ह विज्ञायते"—इति निरु० ८. ३. ७। एतत्त्वाम्नात मैतरेये ३. १. ८।

भगवता पाणिनिमुनिना यस्याय मितराशब्दः शुभ्रादिगणे पठितः (४. १. ११३.), यतः सम्पद्यते इतराया अपत्यं पुमानैतरेय इति ; गणकारश्च पाणिनिरेवेति ध्वनितं पूर्वापरावरेतिसूत्रभाष्ये ; अतोऽत्रगम्यते अय मेतरेयः पाणिनितोऽपि पूर्वतन इति। अपि नडादिगणे (पा० सू० २. १. ९९.) आश्वलायनशब्दमूलस्य अश्वलशब्दस्य पाठश्चावगम्यते तदेव ; आश्वलायनाच्चायं पूर्वतनइतिसिद्धान्तात्। सूत्रितश्चैतत् "छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ् जः"—इति (पा० ४. ३. १२९.)। अनेनैव सूत्रेण छन्दोगानां धर्म्म आम्नायो वेत्यर्थे सिध्यति छान्दोग्य मिति पदम् ; तया च छान्दोग्यात् परभवत्वं पाणिनेर्नूनं मन्तव्यम् ; श्रूयते च तत्र छान्दोग्ये "तद्विद्धानाह महीदास ऐतरेयः"—इति (५. १९. ७.)। इतोऽप्यसन्दिग्ध मस्य पाणिनिपूर्वजत्वम्।

कल्पकृदाश्वलायनोऽपि नून मेतस्मादैतरेयात् परतनः ; तत्र बहुत्र ऐतरेयनामस्मृतेः। तद्यथा — "अन्तरेण हविषी विष्णु मुपांश्वैतरेयिणः"—इति आश्व० श्रौ० सू० १. ३. १२, पुनः ३. ६. २, १०. १. १३ इत्यादीनि च।

पञ्चशाकलशाखाप्रवक्तृभ्यः शिशिरायाश्वलायनाक्तेभ्यः पञ्चभ्य-

स्याय मैतरेयः पूर्वतनः ; इहोद्गृतमन्त्राणां तत्रादर्शनात् । तदिद मनुपदं प्रतिपादयिष्यामः शाखाविचारप्रसङ्गे ।

एतेन यत् सिद्धान्तितं केनचित् पाश्चात्येन विदुषा—"इहैतरेये 'पारिक्षितस्य जनमेजयस्य'–इति (७. ५. १.)-श्रवणात् स्यादय मैतरेयो जनमेजयाच्च राज्ञः परभवः"–इति, तन्नून मपास्तम् । वस्तुत एतन्नामश्रुतित एव अर्जुनपौत्रस्य परिक्षिन्नाम बभूव, बभूव च तथा तत्पुत्रनाम जनमेजय इत्येव स्यात् सर्वसामञ्जस्य मिति ।

अथ यदत्र श्रूयते (३. ४. ५.)—

"तदेषाभियज्ञगाथा गीयते—

यदस्य पूर्वं मपरं तदस्य यदस्यापरं तदस्य पूर्वम् ।
अहेरिव सर्पणं शाकलस्य न विजानन्ति यतरत् परस्तादिति"
–इति । तदेतेनास्य शाकलाचार्यात् परभवत्वं स्पष्टम् । एष च शाकलः शकलस्यानन्तरापत्यं नूनम् ; गोत्रे तु "गर्गादिभ्यो यञ् (पा० ४. १. १०५)"–इत्येतेनैव भाव्यम् , तथाच सम्पद्यते शकलस्य गोत्रापत्यं पुमान् शाकल्य इति । मुद्रिते ऐतरेयारण्यकभाष्ये (३. २. १.) यद् दृश्यते 'शकलस्य पुत्रः शाकल्यः'–इति, तदशात् गोत्रविवक्षयैव ; अनन्तरापत्यविवक्षया यञोऽप्रवृत्तेः । अपि वा मुद्राशोधकप्रमादत एव तत्र तथा पाठः सम्पन्नः ; 'शकलस्य पौत्रः'–इति, 'शाकलस्य पुत्रः'–इति, 'शाकलस्य गोत्रः'–इति वा स्यात् तत्रत्यपाठो विशुद्धः । ये तु शाकल्यशिष्याः शिशिरादयः, ते चासन् शाकला एवोच्यमानाः ; छात्रेऽपि विवक्षिते "गोत्रे लुगचि"–इति (पा० ४. १. ८९.) गोत्रप्रत्ययस्य यञो लुग्विधानात् । परं नात्र यज्ञगाथायां तेषा मन्यतमस्य नामग्रहणं सम्भाव्यते ; कथं हि स्यादैतरेयतोऽतिप्राचीनगाथायाम्

ऐतरेयोत्तरभवस्य शाकलस्य नामश्रवण मिति। तेषा मैतरेयपरभवत्वं त्विहैवोपरिष्टादुपपादयिष्यामः।

"अपत्यं पौत्रप्रभृति गोत्रम्"–इति (४. १. १६२.) पाणिन्युपदेशात् शाकलस्य गोत्रापत्यत्वं तु शाकलपौत्रस्य, शाकलप्रपौत्रस्य, शाकलाच्छततमाधिकपुरुषस्य च स्वीकार्य मेव; तदेवं शाकलगोत्र इति विवक्षिताः सर्व एव पुरुषाः शाकल्य इत्याख्याता भवन्ति। अत एव बह्वृक्प्रातिशाख्ये 'शाकल्यस्य'–इत्येतन्मात्रोक्तितः प्रसिद्धस्य पदकारस्यैव शाकल्यस्य बोधः स्यादिति क्वचित् 'स्थविरस्य शाकल्यस्य –इत्युक्तम् (१अ० २प० ८व०), क्वचित् (१. ४. १.) 'शाकल्य पतुः'–इत्युक्तम्, क्वचिन्निर्विशेषणञ्च 'व्याड़िशाकल्यगार्ग्याः'–इति (३. १. ३.)। तदत्र व्याड़िशाकल्यगार्ग्या इत्यत्रातिप्रसिद्धस्य पदकारस्य शाकल्यस्य ग्रहणं भवति, शाकल्यपितेत्युक्त्या चास्यैव ग्रहण मिष्यते, स्थविरविशेषणविशिष्टस्तु ततोऽपि प्राचीनः कश्चिद् बुध्यते। एवं यत् श्रूयते शतपथब्राह्मणे— "अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्येति"–इत्यादि (१४. ६. ९. १.), सोऽयं याज्ञवल्क्यसमसामयिकः शाकल्योऽन्य एव। अद्यप्रचलितायाः शाकलान्यतमाया आश्वलायन्याः शाखायाः प्रवक्तुराश्वलायनस्याचार्यश्चाभवदपरः शाकल्यः। त इमे सर्व एव शाकल्याः प्रदर्शितगाथान्नातशाकल्यात् परतनाः प्रतीयन्ते।

तत्र स्थविरात् शाकल्यात्, विशेषणशून्यात् शाकल्याच्च नूनमयं परभवः; एतदारण्यके तदुभयोरेव नामश्रवणात्। तथाहि— "अथ शाकल्यस्य"–इत्यादि ३आ० १अ० २ख०, ततः "प्राणो वंश इति स्थविरः शाकल्यः ३आ० २अ० १ख०"–इति। किञ्चातैवारण्यके (३. १. २.) श्रूयते— "पृथिव्यायतनं निर्भुजम्, दिव्या-

यतनं प्रश्लेषम्, अन्तरिक्षायतन मुभय मन्तरेण"–इति , ततस्तन्नि-र्भुजादिस्वरूपबोधनाय च श्रुत मिदम्— "यद्धि सन्धिं विवर्त्तयति, तन्निर्भुजस्य रूपम् ; अथ यच्छुद्धे अक्षरे अभिव्याहरति, तत् प्रश्लेषस्य; अग्र उ एवोभय मन्तरेणोभयं व्याप्तं भवति" इति। 'निर्भुज-शब्दः संहितावाची, प्रश्लेषशब्दः पदवाची, उभयमन्तरेणेत्यनेन क्रमो विवक्ष्यते'–इति चाह तद्भाष्ये सायणः। तदेवं पदपाठप्रादु-र्भावात् क्रमपाठप्रादुर्भावाच्च परतनोऽय मत्र कोऽस्ति संशयः। पदकारस्त्वेकः शाकल्य एव। तथाहि "वने न वायो"–इति निगम-व्याख्यानावसरे निर्णीत मिदं भगवता यास्केन— "वेति च य इति च चकार शाकल्यः"–इत्यादि (६. ५. ५.)। क्रमप्रवक्ता त्वभवद् 'बाभ्रव्यः'। तथाहि बह्वृक्प्रातिशाख्यम्— "इति प्र बाभ्रव्य उवाच च क्रमम्"–इति (२अ० ५प० ६व० २श्लो०)।

तदित्थ मेष महिदास ऐतरेयोऽद्यप्रचलितशाखाप्रवक्तुः शाक-लाश्वलायनस्याचार्यात् शाकल्यात् प्राक्तनोऽपि पदसंहिताप्रवक्तुः शाकल्यात् परतन इति सिद्धम् ॥

---

(५)

अथेदानीं विचार्य मस्ति, कीदृशान्यासन् तदानीन्तनाचार-व्यवहारविज्ञानानीति। तत्र प्रथमं तावत् तेषा माचारानालोचयितुं प्रवृत्ता वयं बह्वना माचारपार्थक्यानां मूलं जातिपार्थक्य मुपल-भामहे, अतस्तज्जातिपार्थक्य मेव प्रथमं समासतो वर्णयामः—

यथा गोत्वोष्ट्रत्वमनुष्यत्वादयो जातयो निसर्गजा इति आकृति-ग्रहणा भवन्ति, न तथा ब्राह्मणत्वादयः ; ब्राह्मणत्वादयस्तु सामाजिकानाम् ऐहिकाभ्युदयिककार्यव्यवहारसौकर्य्याध्यात्माद्युन्नतिसिद्धयर्थाः पूर्वं गुणकर्मानुसारतः पूर्वसामाजिकैः कल्पिताः। तदेतदिहापि श्रुतम्— "देवविशः कल्पयितव्या इत्याहुस्ताः कल्पमाना अनु मनुष्यविशः कल्पन्त इति"–इत्यादि १. २. ३.। तथा चाध्ययन मध्यापनं यजनं शंसनं स्तवन मुद्गानं ब्रह्मणं मन्त्रणादान मुपदेशदानादिकञ्चेति मुख्यानि मुखकर्माणि च येषां समाजेषूपलभ्यन्ते, तेषा मेव ब्राह्मणजातिः कल्पिता। क्षत्रियादीनामप्येवं बलादिप्रकाशकबाह्वादिभिरौपम्यं तज्जातिकल्पनाबीजम्। तदेव श्रुत मृक्संहितायाम् १०. ९०. १२—

"ब्राह्मणोऽस्य मुख मासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत"–इति।

एतच्च प्राचीनतमजातिविभागाः श्रेणिविभागा एव गम्यन्ते। अत एव देवतिर्यङ्मनुष्यछन्दःस्तोममन्त्राणा मपि सर्वेषां जातिविभागाः समाम्नाताः। तद्यथा देवानाम्—

"ब्रह्म वै देवानां बृहस्पतिः"–इति तै० सं० २. २. ९. १।

एवमादिषु ब्रह्मशब्दार्थो ब्राह्मणः ; तथाहि—

"ब्रह्म हि ब्राह्मणः"–इति च श० ब्रा० ५. १. १. ११।

"अग्ने ! महाꣳ असि ब्राह्मण ! भारत !"–इति तै० ब्रा० ३. ५. ३।

अन्यत्रान्यत्र च— "ब्रह्म ह्यग्निः"–इति श० ब्रा० १. ५. १. ११।

"ब्रह्म वै बृहस्पतिः"–इति श० ब्रा० ३. ९. १. ११.।

"तच्छ्रेयोरूप मत्यसृजत क्षत्रं, यान्येतानि क्षत्राणि ; इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति०—० स विश

मसृजत, यान्येतानि देवजातानि गणश आख्यायन्ते ; वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति०—०स शौद्रं वर्ण मसृजत पूषणम्"–इति श० ब्रा० १४. ४. २. २३, २४, २५ ।

तिरश्चां जातिविभागो यथा—

"ब्रह्म वा अजः", "क्षत्रं वा अश्वः", "वैश्यश्च शूद्रश्चानु रासभः"

–इत्यादि श० ब्रा० ६. ४. ४. १२—१५ ।

उद्भिदां जातिविभागो यथा—

"ब्रह्म वै पलाशः"–इति श० ब्रा० १. १. १. ४ ।

"क्षत्रं वा एतदोषधीनां यद् दुर्वा ; क्षत्रं राजन्यः" ऐ० ८. २. ४ ।

स्तोममन्त्राणां जातिविभागो यथा—

"ब्रह्म वै स्तोमानां त्रिवृत् , क्षत्रं पञ्चदशः,०—०

विशः सप्तदशः, शौद्रो वर्ण एकविंशः"–इति ऐ० ८. १. ४ ।

त्रिवृत्पञ्चदशसप्तदशैकविंशाः सामवेदीयस्तोममन्त्राः ।

छन्दसां जातिविभागो यथा—

"गायत्र्यश्छन्दसा (ब्राह्मणः)", "त्रिष्टुभश्छन्दसा (क्षत्रियः)"

–इत्यादिग्रन्थो द्रष्टव्यः ऐ० ७. ४. ५, ६ ।

तैत्तिरीयसंहितायान्त्वेकत्रैव स्तोमदेवताच्छन्दःसाममनुष्यपशूनां श्रेणीविभाग आम्नातो द्रष्टव्यः (७. १. ६–९.) । ततश्च, त्रिवृत्स्तोम-अग्निदेव-गायत्रीच्छन्दो-रथन्तरसाम-ब्राह्मणमनुष्य-छागपशूनां मुख्यत्वेनैकश्रेणीत्वम् , पञ्चदशस्तोम-इन्द्रदेव-त्रिष्टुप्छन्दो-बृहत्साम-राजन्यमनुष्य-मेषपशूनां बलवत्त्वेनैकश्रेणीत्वम् , सप्तदशस्तोम-विश्वेदेव-जगतीच्छन्दो-वैरूपसाम-वैश्यमनुष्य-गोपशूनां बहुत्वेनान्नसाधकत्वेन चैकश्रेणीत्वम् , एकविंशस्तोम-अनुष्टुप्छन्दो वैराजसाम-शूद्रमनुष्य-वाजिपशूनां पादोपजीवित्वेनैकश्रेणीत्वञ्चेति

सुव्यक्तम्। एषु च स्तोमच्छन्दस्सामां पादोपजीवित्वं त्वच्चरसङ्ख्यानुगतत्वाद् बोध्य मिति।

तदेवं यद्यपि गुणकर्मानुसारतो ब्राह्मणाद्या जातयः कल्पिता इति स्पष्टम्, तथापि पशूड्डिज्जमनुष्येषु सम्प्रति ता जन्मानुसारिण्य एव मन्यमाना भवन्ति। यथा मिष्टाम्बबीजतो मिष्टाम्बाणा मेव फलनं प्रायो नैसर्गिकम्, तथैव ब्राह्मणवीर्य्यादिजातानां ब्राह्मणादित्व मवश्यम्भावीत्येव तत्र हेतुः। एव मपि यथा क्षेत्रादिदोषतो वस्तुगुणान्यथाभावोऽपि दृश्यते, तथैव ब्राह्मणाद्यौरसजाता अप्यब्राह्मणादयो भवन्तीत्यपि नादृष्टचरम्। अत एव "जातो नार्या मनार्यायाम्"-इत्याद्यपि स्मृतं मन्वादिभिः, इह चोद्धृतं तत् पुरस्तात् (१७ पृ० ८पं०)।

अथ तेषां ब्राह्मणादिचतुर्वर्णानां स्वभावादय इहैतरेये यथा वर्णितास्त एवेह क्रमात् प्रदर्श्यन्ते। तत्र स्वभावाः—

ब्राह्मणानाम्— आदायित्वम्, आपायित्वम्, अवसायित्वम्, यथाकामप्रयाप्यत्वञ्चेति चत्वारो धर्म्मा विशेषतो लक्षिताः। 'आदायी' आदानं ग्रहणम्, प्रतिग्रहादिना जीविकादीना मादानकारी। 'आपायी' अपायस्त्यागः, दानादिना धनादीनां त्यागकारी। 'अवसायी' अवसाय सिद्धान्तः, विद्याबलेन सर्वतत्त्वानां निश्चयकारी। 'यथाकामप्रयाप्यः' प्रयाणं युद्धाय प्रस्थानम्, तत्र राजादिभिः सेनानायकत्वादिना प्रेर्यः 'प्रयाप्यः', काम मनतिक्रम्य यथाकामम्, स्वकामनानुरूप मिति यावत्; तदेवं राज्यरक्षणाद्यर्थं युद्धाय प्रयाण मिच्छेच्चेत् राज्ञा प्रेषणीयो 'यथाकामप्रयाप्यः'। तदेतदिह ७. ५. ३ द्रष्टव्यम्। क्षत्रियाणान्तु—बलप्रतिष्ठा, आश्रितरक्षणम्, सर्वोपकारित्वम्, तेजस्वित्वम्, यशस्वित्वञ्चाऽऽदृ

वर्णनीयम्। वैश्यानां खलु — अन्यस्य बलिकृत्त्वम्, अन्यस्य आद्यत्वम्, यथाकामज्येयत्वञ्चेति त्रीणि लिङ्गानि। शूद्राणां हि— अन्यस्य प्रेष्यत्वम्, कामोत्थाप्यत्वम्, यथाकामवध्यत्वञ्चेति च वर्णितं तत्रैव (७. ५. ५. ६.)। अथ भक्ष्याः—

ब्राह्मणानां बलकरो भक्ष्यः सोमो निर्णीतः, क्षत्रियाणां न्यग्रोधोदुम्बराश्वत्थप्लक्षफलानि बलहेतुभक्ष्याणि निर्णीतानि, तथा वैश्यानां दध्येवैकं बलकरं भक्ष्यं सूचितम्. शूद्राणां त्वाप एव भक्षिताः सम्यग् बलकरा भवन्तीति च तत्र ७. ५. ३—६। अपर मपि— "एता वै प्रजा हुतादो यद् ब्राह्मणा अथैता अहुतादो यद्राजन्या वैश्यः शूद्र इति"—इति ७. ४. १। अथायुधानि—

"एतानि वै ब्राह्मणस्यायुधानि यद्यज्ञायुधानि; अथैतानि— क्षत्रस्यायुधानि— यदश्वो रथः कवच इषु धन्व"—इति च तत्रैव। तानि च यज्ञायुधान्यन्यत्र परिगणितानि— "स्फ्यश्च कपालानि च, अग्निहोत्रहवणी च शूर्पं च, कृष्णाजिनं च शम्या च, उलूखलं च मुशलं च, दृषच्चोपला चैतानि वै दश यज्ञायुधानि"—इति तै० सं० १. ६. ८. २, ३।

तदानी मासीदपि क्षत्रियतोऽपि भूयस्त्वं ब्राह्मणानाम्। तद्यथा— "भूयान् वै ब्राह्मणः क्षत्रियादिति"—इति ७. २. २.।

शूद्राणां ब्राह्मणपङ्क्तावुपवेशनमप्यासीद्दोषावहम्। तथाहि— "दास्याः पुत्रः कितवो ऽब्राह्मणः कथं नो मध्येऽदीक्षिष्टेति" —इयादि (२. ३. १.) समालोच्यम्। यज्ञकार्येषु गोदोहनादिष्वपि तेषां निषिद्धोऽधिकारः, तथा च तैत्तिरीयकम्— "शूद्र एव न दुह्यात्, असतो वा एष सम्भूतो यच्छूद्रः। अहविरेव तदित्याहुर्यच्छूद्रो दोग्धीति"—इति (ब्रा० १. २. ३.)। अत एव

Padumawati, Face. 1-4 @ 2/	... ...	Rs. 8	0
Paricişta Parvan, (Text) Fasc. 1-5 @ /6/ each...	... ...	1	14
Prāk ta-Paingalam, Fasc. 1-7 @ /6/ each	... ...	2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ /6/ each	... ...	1	14
Ditto (English) Part II, Fasc. 1	... ...		12
Prāk ta Lakşaṇam, (Text) Fasc. 1	... ...	1	8
Parācara Smriti, (Text) Vol. I, Fasc. 1-8 Vol. II, Fasc. 1-6 ; Vol. III, Fasc. 1-6 @ /6/ each	... ...	7	8
Parācara, Institutes of (English)	... ...	0	12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each	...	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10 ; II, 1-6 ; III, 1-7 ; IV, 1-6 ; V, 1-8 @ /6/ each Fasc....	... ...	12	6
Sānkhya Sūtra V.tti, (Text) Fasc. 1-4 @ /6/	...	1	8
Ditto (English) Fasc. 1-3 @ /12/ each	...	2	4
Shaddarsana-Samucchchaya, Fasc. 1,	... ...		6
Sraddha Kriya Kaumudi, Fasc. 1-6 ...	... ...	2	4
Sucruta Saṁhitá, (Eng.) Fasc. 1 @ /12/	... ...	0	12
Suddhi Kaumudi, Fasc. 1-4	... ...	1	8
*Taittereya Saṁhitā, (Text) Fasc. 22-45 @ /6/ each	...	9	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each	...	7	2
Tantra Vartika (English) Fasc. 1-6 @ /12/	... ...	4	8
Tattva Cintāmaṇī, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V. Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /6/ each	... ...	14	4
Tattvarthadhigama Sutrom, Fasc. 1-3	... ...	1	2
Trīkāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ /6/	... ...	1	2
Tul'si Satsai (Text) Fasc. 1-5 @ /6/	...	1	14
Upamita-bhava-prapañcha-kathā (Text) Fasc. 1-8 @ /6/ each		3	0
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/	... ...	4	8
Vallala Carita, Fasc. 1	... ...	0	6
Varsa K yā Kaumudi, Fasc. 1-6@ /6/	... ...	2	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6 ; Vol. II, Fasc. 1-7 , @ /6/ each		4	8
Vidhano Parigata, Fasc. 1-7	... ...	2	10
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each	... ...	2	10
Vṛhat Sayambhū Purāṇa, Fasc. 1-6	... ...	2	4

Tibetan Series.

Pag-Sam Ţhi Śiñ, Fasc. 1-4 @ 1/ each	... ...	4	0
Sher-Phyin, Vol. I, Fasc. 2-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc. 1-6 @ 1/ each		14	0
Rtogs *brjod dpag hkhari* Śiñ (Tib. & Sans.) Vol. I, Fasc. 1-5 ; Vol. II. Fasc. 1-5 @ 1/ each		9	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each ...	...	4	14
Al-Muquaddasi (English) Vol. I, Fasc. 1-3 @ /12/	... ...	2	4
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	... ...	22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each	... ...	29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each	...	37	0
Ditto (English) Vol. I, Fasc. 1-8 ; Vol. II, Fasc. 1-2 @ 1/	...	10	0
Arabic Bibliography, by Dr. A. Sprenger	... ...	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ oach	...	7	2
Catalogue of Arabic Books and Manuscripts 1-2	...	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each	...	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each		14	0
Fihrist-i-Ţūsī, or, Ţūsy's list of Shy'ah Books, (Text) Fasc. [illegible] @ /12/ each		3	0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each		3	6
Ditto of Āzādī, (Text) Fasc. 1-4 @ /6/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1		0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ /6/ each		1	2
Işābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Masīr-ul-Umarā, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-9 ; Vol. II Fasc. 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc 10-12 ; Index to Vol. III, Fasc. 11-12 ; @ /6/ each			
Maghāzi of Wāqidī, (Text) Fasc. 1-5 @ /6/ each		13	2
[illegible]		1	14

* The other Fasciculi of these works are out of stock, and co[illegible]te copies cannot be supplied.

		Rs		
Muntakhabu-t-Tawārikh, (Text) Fasc. 1-15 @ /5/ each ...	...		5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-5 and Indexes ; Vol. III, Fasc. 1 @ /12/ each	...	...	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /5/ each	...	...	7	2
Ma'āṣir-i-Ālamgīrī, (Text) Fasc. 1-6 @ /5/ each	...	...	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	...	...	0	6
Niẓāmī's -Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each	...	...	1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1-5 @ /5/ each ...	...	...	1	1 4
Ditto Ditto (English) Fasc. 1-5	...	...	3	1 2
Tabaqāt-i-Nāṣirī, (English) Fasc. 1-14 @ /12/ each	...	...	10	8
Ditto Index	...	...	1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1-7 @ /5/ each	...	...	2	1 0
Tārikh-i-Fīrūshāhi, of Shams-i-Sirāj Alif, (Text) Fasc. 1-5 @ /6/ each	...	...	2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	...	...	3	0
Tuzuk-i-Jahāngirī, (English) Fasc. 1	...	...	0	1 2
Wīs o Rāmīn, (Text) Fasc. 1-5 @ /6/ each ...	...	...	1	1 4
Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /6/ each	...	...	6	6

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES, Vols. XIX and XX @ 10/ each	20	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No. ; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7); 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), 1902 (9), 1903 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.		
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Journal and Proceedings, N. S., Vol. 1, No. 1, 1905, @ 1-8 per No. to members ana Rs. 2/ per No. to Non-members.		
5.	Memoirs Vol 1, No 1,4,5 @ 1/8 to non members and to members ...	1	2
	Ditto No. 2 @ 1/- Ditto Ditto ...		12
	Ditto No. 3 @ 2/- Ditto D tto ...	1	0
6.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	8
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S-B.*, 1875)	4	0
7.	Anīs-ul-Musharrahīn	3	0
8.	Catalogue of Fossil Vertebrata	3	0
9.	Catalogue of the Library of the Asiatic Society, Bengal	3	8
10.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each ...	32	0
11.	Jawāmlu-l-'il a ir-riyyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
12.	Khizānatu-l-'ilm	4	0
13.	Mahābhāra ls. III and IV, @ 20/ each	40	0
14.	Moore an witson's Descriptions of New Indian Lepidopters, Parts I— ith 8 colored plates, 4to. @ 6/ each	18	0
15.	Sharaya-ool-Islm	4	0
16.	Tibetan Dictionary, by Csoma de Körös	10	0
17.	Ditto Grammar ,, ,, ...	8	0
18.	Kacmīracabdāmta, parts I and II @ 1/8/	3	0
19.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson...	1	0
20.	Memoir on maps illustrating the Ancient Geography of Kacmīr, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	4	0
21.	Persian Translation of Hāji Bābā of Ispāhān, by Hāji Shaikh Ahmad-i-Kirmāsi, and edited with notes by Major D. C. Phillott.	10	0
	Notices of Sanskrit Manuscripts, Fasc. 1-29 @ 1/ each	29	0
	Nepalese Buddhist Sanskrit Literature, by *Dr.* R. L. Mitra	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

BOOKS ARE SUPPLIED BY V.-P.-P. 6-4-'06.

BIBLIOTHECA INDICA :

A

Collection of Oriental Works

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1146.



॥ ऐतरेयब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE AITAREYA BRĀHMAṆA

OF THE RIG VEDA,

WITH THE

COMMENTARY OF SĀYAṆA ĀCĀRYA.

EDITED BY

ĀCĀRYA SATYAVRATA SĀMAS'RAMI.

VOL. IV, FASCICULUS VII.

CALCUTTA :

PRINTED BY HITAVRATA CHATTERJI, SATYA PRESS.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1906.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No, 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS MR. BERNARD QUARITCH, 15, PICCADILLY, LONDON, W, AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.		
*Advaita Brahma Siddhi, (Text) Fasc. 2,4 @ /1/ each	0	12	
Advaitachinta Kaustubhe, Fasc. 1-2	0	12	
*Agni Purāṇa, (Text) Fasc. 4-14 @ /1/ each	4	2	
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol, IV, Fasc. 1-8 @ /1/	8	10	
Aphorisms of Sāṇdilya, (English) Fasc. 1	0	12	
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /2/ each	2	4	
Acvavaidyaka, (Text) Fasc. 1-5 @ /1/ each	1	14	
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 2-5; Vol. II. Fasc. 1-5 @ 1/ each	9	0	
A Lower Ladakhi version of Kesarsaga, Fasc. 1...	1	0	
Bāla Bhaṭṭī, Vol. I, Fasc. 1-2	0	12	
Baudhayana Srauta Sutra, Fasc. 1-3 @ /2/ each	1	2	
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-5	1	14	
Bṛhaddēvatā, (Text) Fasc. 1-4 @ /1/ each	1	8	
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /2/ each	2	4	
Bodhicaryavatara of Cantidevi, Fasc. 1-3	1	2	
Çatadusani, Fasc. 1 2	0	12	
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0	
Çatapatha Brāhmaṇa, Vol I Fasc 1-7, Vol II Fasc 1-3, Vol III Fasc 1-7,...	6	6	
Çatasahasrika-prajñāpāramitā, (Text) Part I, Fasc. 1-12 @ /1/ each ...	4	8	
*Caturvarga Chintāmaṇi, (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18 Part II, Fasc. 1-10 @ /1/ each; Vol. IV, Fasc. 1-5	21	12	
Çlokavartika, (English) Fasc. 1-5	3	12	
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 6-17 @ /2/ each ...	4	8	
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4 @ /1/ each; Vol 4, Fasc. 1	6	0	
Çrī Bhāshyam, (Text) Fasc. 1-3 @ /1/ each	1	2	
Dan Kriya Kaumundi, Fasc. 1-2	0	12	
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-7...	2	10	
Ditto Ācārasāra, Vol II, Fasc. 1.	0	6	
Kāla Viveka, Fasc. 1-6	2	4	
Kātantra, (Text) Fasc. 1-6 @ /12/ each	4	8	
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each	10	8	
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /1/ each	3	6	
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each	2	4	
Madana Pārijāta, (Text) Fasc. 1-11 @ /1/ each...	4	2	
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1-9 & Vol. II, Fasc. 1-12, Vol. III, Fasc. 1-4, @ /1/ each	9	6	
Manuṭīkā Sangraha, (Text) Fasc. 1-3 @ /1/ each	1	2	
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9 @ /12/ each	6	12	
*Mīmāṁsā Darcaṇa, (Text) Fasc. 7-19 @ /1/ each	4	14	
Nyāyavārtika, (Text) Fasc. 1-6 @ /1/	2	4	
*Nirukta, (Text) Vol. IV, Fasc. 1-8 @ /1/ each	3	0	
Nityacarapaddhati Fasc. 1-7 (Text) @ /1/	2	10	
Nityacarapradiph, Fasc. 1-6	2	4	
Nyāyabinduṭikā, (Text)	0	10	
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6, Vol. II, Fasc. 1-5 @ /1/ each	3	6	

तेषा मयज्ञियत्वम्। यज्ञे दीक्षितस्य देवभाव मापन्नस्य यज मानस्य तेश्वायज्ञियैः सह वाक्यालापोऽपि निषिद्धः शतपथादौ— "स वै न सर्वेणेव संवदेत ; देवान् वा एष उपावर्त्तते यो दीक्षते, स देवताना मेको भवति ; न वै देवाः सर्वेणेव संवदन्ते,— ब्राह्मणेन वैव, राजन्येन वा, वैश्येन वा [संवदन्ते] ; ते हि यज्ञियाः"-इत्यादिना (३. १. १. १०.)। मूर्खानां सामीप्य मप्यासीत्तदानीं क्लेशायेत्यान्नातम्—"तेभ्यो वै देवा अपैवाबीभत्सन्त मनुष्यगन्धात्"-इति ३. ३. ६। अत्र देवा इति सत्यवादित्वा-दिनाप्तदेवत्वानां ग्रहण मिष्टम्, मनुष्यशब्देन चानृतभाषणादि-मनुष्यधर्मवतां मूर्खाणां शूद्राणा मित्येव। तदिदं शूद्राणा मयज्ञियत्वम्, मूर्खाणां सामीप्यायोग्यत्वञ्चातिमूर्खत्वकञ्चरत्वकदा-चारत्वकदाकारत्वादिनिबन्धन मेव ; नान्यथा तान् प्रति कृत-दुर्व्यवहारस्य प्रायश्चित्तशासनं विहितं श्रूयेत। तच्च यथा य० वा० सं० २०. १७. १—

"यच्छूद्रे यदर्ये यदेनश्चकृमा वयं
यदेकस्याधिधर्मणि तस्यावयजन मसि"-इति।

शूद्राणा मुन्नत्यर्थं यथायोग्यज्ञानोपदेशविधिश्च विहितो ऽत्र संहितायाम् २६. २. १—

"यथेमां वाचं कल्याणी मावदानि जनेभ्यः।
ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय चारणाय"-इति।

चतुर्णा मेव वर्णानां हितप्रार्थने साम्यञ्च श्रुतं बहुत्र। तद्यथा तत्रैव यजुस्संहितायाम् १८. ४८. १—

"रुचं नो धेहि ब्राह्मणेषु, रुचं राजसु नस्कृधि।
रुचं विश्येषु शूद्रेषु, मयि धेहि रुचारुचम्"-इति।

आथर्वणिका अप्यामनन्त्येव मेव १९. ७. ८—

"प्रियं मा कृणु देवेषु, प्रियं राजसु मा कृणु ।
प्रियं सर्वस्य पश्यत, उत शूद्र उतार्ये"–इति ।

चतुर्णां वर्णाना माह्वानप्रयोगपार्थक्य मपि श्रुत मन्यत्र—

"तानि वा एतानि चत्वारि वाचः,— एहीति ब्राह्मणस्य, आगच्छाद्रवेति वैश्यस्य राजन्यबन्धोश्च, आधावेति शूद्रस्य"–इति श० ब्रा० १. १. ४. १२ ।

वाग्व्यवहारविषये त्वासीदिह बह्वपदेशः । तद्यथा— "वाक् तु सरस्वती" (२. १. १.), "वाग्घि सरस्वती" (२. १. २.), "वाग्वै सरस्वती" (३. ३. १३.) "वाचो वाव तौ स्तनौ, सत्यानृते वाव ते" (४. १. १.), "कोऽर्हति मनुष्यः सर्वं सत्यं वदितुम्, सत्यसंहिता वै देवा अनृतसंहिता मनुष्याः" (१. १. ६.), "विदुषा सत्य मेव वदितव्यम्" (५. २. ८.), "एतद्ध वै मनुष्येषु सत्यं निहितं यच्चक्षुः, तस्मादाचक्षाण माहुरद्रागिति, स यद्यदर्शं मित्याहाथास्य श्रद्दधति ; यद्धु वै स्वयं पश्यति न बह्वनाश्च नान्येषां श्रद्दधाति" (१. १. ६.), "अबलेनं सत्यं नैन मनृतं हिनस्ति" (४. १. १.), "विचक्षणवतीं वाचं वदेत्" (१. १. ६.), "असुर्या ह वा इतरा गिरः" (३. ५. ५.), "मनसा वा दूषिता वाग् वदति, यां ह्यन्यमना वाचं वदति असुर्या वै सा वागदेवजुष्टा" (२. १. ५ ; ४. ४.), "यां वै दृप्तो वदति, या मुन्मत्तः, सा वै राक्षसी वाक्" (२. १. ७.), "वाक् च मनश्च वर्त्तन्यौ ; वाचा च हि मनसा च यज्ञो वर्त्तते ; इयं वै वागदो मनः" (५. ५. ८.), "श्रद्धा पत्नी, सत्यं यजमानः, श्रद्धा सत्यं तदित्युत्तमं मिथुनम् ; श्रद्धया सत्येन मिथुनेन स्वर्गांल्लोकान् जयति" (७. २. ९.),

"पापस्य वा इमे कर्मणः कर्त्तार आसते ऽपूताय वाचो वदितारो यच्छापर्णा इमामुत्थापतेमे मेऽन्तर्वेदि मासिषतेति" (५. १. १.), "सोऽब्रवीत् तदहं तुभ्य मेव ददामि य एव सत्य मवादीरिति ; तस्मादेवं विदुषा सत्य मेव वदितव्यम्"–इति (५. २. ९.) च। अवच्छेदकावच्छिन्नव्यवच्छिन्नासम्बद्धसम्बन्धसम्बद्धान्यायभाषापीदानीन्तनन्यायभाषेतिविदेहवङ्गप्रसिद्धा ननु का भाषा, राक्षसी वा, यावनिकी वा ? इत्यप्यत्र प्रसङ्गतश्चिन्तनीयम् ; अपौरुषेयवैदिकग्रन्थेषु, अतिप्राचीनस्मृतिन्यायमीमांसावेदान्तादिषु, अनतिप्राचीनेतिहासपुराणतन्त्रवैद्यकज्योतिषसङ्गीतकाव्यादिषु वा क्वचिदपि तथाविधवाग्जालाच्छन्नोच्छन्नहेतुनिवेशप्रवेशाप्रतीतेः।

विवाहबन्धन मपि तेषा मासीद्धितकरत्वेनाभिप्रेतम्। अत एवैवं श्रूयते— "नापुत्रस्य लोकोऽस्ति"–इति, "ऋण मस्मिन्सन्नयत्यमृतत्वञ्च गच्छति। पिता, पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्"–इति च ७. ३. १। पिता एव पत्नीगर्भं प्रविश्य पुत्ररूपेण पुनः प्रकाश मापद्यत इति च तत्रैव। तथाहि— "पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम्। तस्यां पुनर्नवो भूत्वा दशमे मासि जायते"–इति। तदेव मुत्पादिते पुत्रे वंशपरम्परया अमृतत्व मेव स्वस्यापादितं भवतीति तेषा मभिप्रायः।

न क्षत्रियाणां वैश्यशूद्रस्वभावपुत्रनिन्दायासु का कथा, ब्राह्मणस्वभावपुत्रोऽप्यासीदनीप्सितः। तथाहि— "ब्राह्मणकल्पस्ते प्रजाया मा जनिष्यत"–इत्यादि (७. ५. ३.) द्रष्टव्यम्। वैश्यशूद्रस्वभावपुत्रानीप्सापि तत्रैवाम्नाता।

तदानी मेकस्यां तदधिकायां वा जायायां जीविताया मपि जायान्तरपरिग्रहणं नासीद् दोषावहम्, ततश्च जीवत्पत्नीकस्यापि

पुंसः क्रमाद् युगपद्वा बहुविवाहो नैवासीदसामाजिकः। तदुक्तमिह— "यदि ह वा अपि बह्व्य इव जायाः पतिर्वाव तासां मिथुनम्"–इति (३. ५. ३.)। इतोऽपि व्यक्तमाम्नातम्— "एकस्य बह्व्यो जाया भवन्ति"–इति (३. २. १२.)। अपि नासीच्च तदानीमपि जीवत्पतिकायाः स्त्रियाः पत्यन्तरग्रहणाचारः। तदप्युक्तं तत उत्तरम्— "नैकस्यै बहवः सह पतयः"–इति। अत्र सहशब्दश्रुतेर्मृतपतिकायाः त्यक्तपतिकाया वा पत्यन्तरग्रहणं न तदानीन्तनाचारविरुद्धमित्यपि गम्यत एव। किन्तु तथाविधविधवावेदनन्त्वासीन्नीचजातिष्वेव प्रचलित मिति च पुराणेतिहासाख्यानतोऽवगम्यते, तत्त्विदानीमपि वर्त्तत एवेत्यस्माकम्। स्वयम्वरसभायां समागतेषु कन्यापाणिग्रहणार्थिषु पणजयकारिणे कन्यादानप्रथाप्यासीच्चलितैव। तदाह— "प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीम्; तस्यै सर्वे देवा वरा आगच्छंस्तस्या एतत् सहस्रं वहतु मन्वाकरोद्, यदेतदाश्विन मित्याचक्षते"–इति (४. २. १.)। तदानीन्तनस्त्रीणा मप्यासीदसाधारणपाण्डित्यम्। तदग्निहोत्रकालनिर्णायकाख्यायिकायाम्— "कुमारीगन्धर्वगृहीता वक्ता स्म:"–इत्यादि (५. ५. ४.)।

तदानीमपि स्नुषा श्वशुराल्लज्जते स्मैवार्याणाम्। तथाहि— "स्नुषा श्वशुराल्लज्जमाना निलीयमानेति"–इति (३. २. ११.)। अपि तदाप्यार्याणां सोदर्य्याणा मपि भगिनीनां भ्रातृजायानुगतत्व मेवासीत्। तच्चाम्नात मिह यथा— "समानोदर्या स्वसा ऽन्योदर्यायै जायाया अनुजीविनी जीवति"–इति (३. ३. १३.)। तदेवं सोदर्य्याया अपि स्वसुरनात्मीयत्व मन्यकुलतो लब्धाया अपि जायाया आत्मीयत्वं पारम्पर्यागत मेवेति स्यात् स्वीकार्यम्।

अत्राग्निहोत्रस्य खतिकर्त्तव्यतया अपत्नीकस्यापि तत्कर्त्तव्यता प्रतिपादिता । तथाच— "तदाहुर्वाचापत्नीको ऽग्निहोत्रम्"-इत्यादि (७. २. ९.)। तस्य ह्यग्निहोत्रस्य दृष्ट मदृष्टञ्च फलं तैरधिगतम् ; अत एव तैर्नित्याग्निहोत्रिभिः सद्भिः सदैव स्वस्व-गृहेषु अग्निरक्षणं कर्त्तव्य मिति सिद्धान्तितम्। तदिदं श्रूयते —"मनुषो दुरोणे"-इति (ऋ० सं० १०. १११. १.), व्याख्यातञ्चैतद् यास्केन 'मनुष्यस्य मनुष्यस्य गृहे (८. २. २.)' -इति। हिमानीवासिनां तेषां प्राचीनार्याणां हिमपातक्लेशनिवा-रणाय स्वस्वगृहेष्वग्निरक्षणं नून मासीत् सुखावहम् ; श्रुतं ह्येवम् -"अग्निर्हिमस्य भेषजम्"-इति (वा० सं० २३. १०.)। तत्र चाग्नौ विविधसुगन्ध्यादिद्रव्यदानविधानञ्च श्रुत मस्ति। तद्यथा—"कुलाय मिव ह्येतद् यज्ञे क्रियते यत् पैतुदारवाः परिधयो गुग्गुलूर्णासुकाः सुगन्धितेजनानीति"-इति (१. ५. २.)। तैत्तिरीये त्वत्र आख्यायिकाख्यान मपि सं० ६. २. ८ द्रष्टव्यम्। तैः सुगन्ध्यादिभिः गृहजातवायुदोषोऽपि प्रशमितो भवतीति च दृष्टम्। यत् तौ प्राज्या-शिरपयःपयस्यासान्नाय्यचरुपुरोडाशसोमाद्याहुतयः प्रदीयन्ते ततस्त-द्धाप्यप्रसूता दृष्टिधारास्तत्तद्गुणयुक्ता भवन्त्येवेति तज्जातौषध्यादीनां भक्षणतः खल्वाद्यादिसाराहार एव सम्पद्यतेऽस्माक मिति च दृष्ट मेव। अदृष्टं तु स्वर्गादि, श्रुतिमानगम्यम्। तदेवं दृष्टादृष्टफल-सिद्ध्यर्थ मेवासीत् तेषां नित्याग्निहोत्रानुष्ठान मिति प्रतीयते स्फुटम्।

अग्निहोत्रानुष्ठानाय प्रातःस्नानस्य कर्त्तव्यता चात्र सूचिता। तथाहि— "य आहिताग्निर्यदि प्रातरस्नातोऽग्निहोत्रं जुहुयात्, का तत्र प्रायश्चित्तिरिति"-इत्यादि ७. २. ८। तत्रैव आग्रयणे-नानिष्ट्वा नवान्नप्राशने, पाकयज्ञे नष्टे, पवित्रनाशे, हिरण्येऽनुद्दिष्टे

अपह्नुते च, जीवत्यपि कस्मिंश्चिदात्मीये स मृत इति श्रुते, जायायाः स्व-गोर्वा यमसन्तानजननेऽपि प्रायश्चित्तं विहितम्। तथा तत्रैव सूतकान्नप्राशनकारिणा मपि प्रायश्चित्तं विहितम्। यथा-विहितहोमादिरूपप्रायश्चित्तत एव तथाविधपापानां भवति सङ्क्षय इति च तत्र तत्र सुव्यक्तम्। अग्निहोत्राद्यनुष्ठानाय ततः प्राक् स्नानं तु विहितम्, न पुनः किञ्चिद् भोजनं तु निषिद्धम्; प्रत्युत किञ्चिद् भुक्त्वैव कर्माणि कुर्वीतेत्येवेहान्यत्र ध्वनितम्। तथाहि— "घृतं प्राश्य शंसेद् यथा ह वा इद मनो वा रथो वाक्तो वर्त्तत एवं हैवाक्तो वर्त्तते"–इति ४. २. १।

मृतस्य शरीरालाभे पर्णशरीरदाहोऽप्यासीत्तदानी मपि व्यवस्थितः। तदाह— "यदि शरीराणि न विद्येरन्, पर्णशरः षष्टिस्त्रीणि च शतान्याहृत्य तेषां पुरुषरूपक मिव कृत्वा तस्मिंस्ता मावृतं कुर्युः। अथैनाञ्छरीरैराहृतैः संस्पर्शोद्वासयेयुः; अर्धर्च-शतं काये, सक्थिनी द्विपञ्चाशे च विंशे, चोरू द्विपञ्चाशे, शेषन्तु शिरस्युपरि दध्यात्"–इति ७. २. १।

तदानीन्तनार्याणां देवपितृमानुषार्चनपरताप्यासीत्, तदभावे 'अनड्वापुरुषः'–इतिनिन्दाभाजनत्वं तेषा मवश्यम्भाव्येव। तदाह— "कोऽनड्वापुरुषः? इति, न देवान्, न पितॄन्, न मनुष्यान्"–इति (७. २. ८.)। अत्रार्चतीति पदन्तु शेषयितव्यम्। स्फुट मेतच्छत-पथे— "एष ह वा अनड्वापुरुषो यो न देवानर्चति, न पितॄन्, न मनुष्यान्"–इति (६. ३. १. १४.)। 'अड्वा'–इति सत्यनाम (निघ० ३. १०. ४.), अनड्वा=असत्यः, तथाचानड्वापुरुषोऽसत्य-पुरुषः। एवं हि यः पुरुषो देवान् पितॄन् मनुष्यांश्च नार्चति, 'अजा-गलस्तनस्येव तस्य जन्म निरर्थकम्'–इति भावः। तदेवं तादृशपुरु-

षस्य निन्दावादः सम्पन्नः। तदत्र समासतो देवादीनेव पूर्वं निरूपयामः।—

देवाः। निघण्टौ द्युस्थानभाजनेषु 'देवाः'–इति षड्विंशं पदम्। ततो गम्यते द्युलोक एव प्रधानतस्तेषां स्थानम्। 'देवाः रश्मय उच्यन्ते'–इति तन्नाथै देवराजः। महामुनियास्केनापि निरुक्ते देवा इत्यस्यैष एवार्थ उल्लिखितः— "रश्मयोऽत्र देवा उच्यन्ते"–इति (१३. १. १२.)। यास्कप्रदर्शित मुदाहरण मेव च देवराजेन प्रदर्शितम्— "देवानां भद्रा सुमतिर्ऋजूयताम् (ऋ० सं० १. ८९. २.)"–इति, निघ० ५. ६. २६। निरु० १२. ४. ५; १३. १. ११ द्रष्टव्यम्। पार्थिवस्याग्नेर्माध्यमिकस्य च विद्युतोऽपि रश्मिजन्यत्वेन, उत्तमाग्नेः सूर्यस्य तु रश्मिजनकत्वेन जन्यजनकयो-रभेदात् रश्म्यभिन्नत्वम्। किञ्चास्त्येषां प्रथममध्यमोत्तमानां त्रयाणा मेवाग्नीनां रश्मिवत्त्वम्; "त्रयः केशिनः"–इत्यस्य व्याख्याने सुव्यक्त मुक्तञ्चैतद् यास्केन— "केशा रश्मयः, तैस्तद्वान् भवति०—० आदित्य माह, अथाप्येते इतरे ज्योतिषी केशिनी उच्येते, धूमेनाग्नी रजसा च मध्यमः"–इति (निरु० १२. ३. ६, ७, ८.)। एषा मेव त्रयाणां भक्तिसाहचर्यादितो बहवो देवा अर्च्यन्ते। तदपि व्यक्त मुक्तं यास्काचार्येण— "तिस्र एव देवता इति नैरुक्ताः०—० तासां महाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवन्ति" –इत्यादि ७. २.१; ३. १०। "यो देवः सा देवता"–इति च निरु० ७, ४. २। विवरिष्यामश्चैतदिहैवोपान्त्यप्रकरणे।

पितरः। निघण्टौ अन्तरिक्षस्थानभाजनेषु 'पितरः'–इति द्वादशं पदम्। ततो गम्यते अन्तरिक्षलोक एव प्रधानतस्तेषां स्थानम्। "पिता, 'पाता वा पालयिता वा'–इत्यादिना (निरु०

४. ३. ५.) व्याख्यातः ; जस्"–इति तद्भाष्ये देवराजः । महामुनियास्केन हि— "पितरो व्याख्यातास्तेषा मेषा भवति"–इत्युक्त्वैव

"उदीरता मवर उत् परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु"–इत्येषा ऋक् दृह (सं० १०. १५. १.) उदाहृता । व्याख्याता चैवम्— "उदीरता मवर उदीरतां पर उदीरतां मध्यमाः पितरः सोम्याः सोमसम्पादिनस्तेऽसुं ये प्राण मन्वीयुरवृका अनमित्राः सत्यज्ञा वा यज्ञज्ञा वा ते न आगच्छन्तु पितरो ह्वानेषु"–इति (निरु० ११. २. ६.) ।

तथाच तस्या ऋच एषोऽर्थः सम्पद्यते— "हवेषु" 'ह्वानेषु' अस्मदाह्वानेषु सत्सु "ते" 'पितरः' पितृगणाः "नः" अस्मान् "अवन्तु" 'आगच्छन्तु' । ते कीदृशाः ? इत्याह— "ये" "असुं" 'प्राणम्' "ईयुः" 'अन्वीयुः' प्राप्तवन्तः, पूर्वं प्राणान्विता आसन्निति यावत् । तत्र जीवितकाले "अवृकाः" 'अनमित्राः' सर्वत्र सर्वदैव साधुव्यवहारतः अमित्रशून्याः, "ऋतज्ञाः" 'सत्यज्ञा वा यज्ञज्ञा वा' कर्त्तृतया कारयितृतया वा यज्ञानुष्ठानविदः, "सोम्यासः" 'सोम्याः=सोमसम्पादिनः' च आसन्निति । ते च कतिविधाः ? इत्याह—"अवरे", "परासः" 'परे', "मध्यमाः" चेति त्रिविधाः । तत्र, 'परे' द्युस्थान्तरिक्षचारिणः, "ये चेमेऽरण्ये श्रद्धा तप इत्युपासते"–इत्यादिना छान्दोग्ये (५. १०. १, २.) वर्णिता देवयानमार्गेण सूर्यलोकं गताः ; 'मध्यमाः' द्यावापृथिव्योरन्तरेण स्थायिनः "य इमे ग्राम इष्टापूर्त्ते दत्त मित्युपासते"–इत्यादिना छान्दोग्ये (५. १०. ३–६.) वर्णिताः पितृयानमार्गेण चन्द्रलोकं गताः ; 'अवरे' भूपृष्ठस्थान्तरिक्षचारिणः, "अथैतयोः पथोर्न कतरेण च"–इत्यादिना छान्दोग्ये (५. १०. ८.) वर्णिताः पृथिव्या

मेव निरन्तरावर्त्तिनः। तदेषां त्रिविधानां पितृणां मध्ये येऽवरास्तेषा मप्राप्तमार्गाणा मसकृदावर्त्तित्वेन क्वचिदपि दीर्घकालस्थिति-सम्भावनाभावात् न पितृलोकस्थत्वम्; ये परास्तेषा मप्यनावर्त्ति-त्वश्रुतेस्तथात्व मेव; ये तु मध्यमाश्चन्द्रलोकं पितृलोकं वा गता-स्तेषा मेव स्वस्थानस्थत्वेन प्राधान्य मिष्टम्। अतएव अन्तरिक्षस्थानेष्वेव पठितं पितर इति पदम्। यास्कमुनिनाप्युक्तम्—"माध्यमिको यम इत्याहुस्तस्मान्माध्यमिकान् पितॄन् मन्यन्ते"—इति (११. २. ५, ६.)। 'स हि तेषां राजेति'—इति च तत्र दौर्गो वृत्तिः। "परेयिवांसं प्रवतो महीरनु"—इत्यादिसूक्तद्वये (ऋ० सं० १०. १४, १५.) यमस्य पितृराट्त्वं पितॄणां स्वरूपञ्च सुव्यक्तम्।

तत्वतस्तु अन्नरससाहाय्येन स्वजनकदेहे प्रविष्टो जीवो रेतोऽन्तःस्थः प्रथमगर्भः सम्पद्यते; यदैव तद्रेतो योनौ सिक्तं भवति, तदेव तस्य प्रथमं जन्म। ततस्तद्रेतो मातृयोनौ द्वितीयगर्भाकारेण परिणतं भवति; भूमिष्ठे हि तस्मिन् गर्भे पुरुषस्य द्वितीयं जन्मेति मन्तव्यम्। ततो मृते च यत् पित्राद्यन्यतमं शरीरं लभते, तदेव तस्य तृतीयं गर्भरूपम्; ततः पित्राद्यन्यतमलोकप्राप्तिरेव तत्तृतीयं जन्मेति मन्यते। तदाहुरैतरेयिणः—"अपक्रामन्तु गर्भिण्यः। पुरुषे ह वा अय मादितो गर्भो भवति, यदेतद् रेतस्तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजः सम्भूत मात्मन्येवात्मानं बिभर्त्ति, तद्यदा स्त्रियां सिञ्चत्यथैनं जनयति; तदस्य प्रथमं जन्म। तत् स्त्रिया आत्मभूयं गच्छति, यथा स्वमङ्गन्तथा तस्मादेनां न हिनस्ति, सास्यैत मात्मान मत्र गतं भावयति, सा भावयित्री भावयितव्या भवति, तं स्त्री गर्भं बिभर्त्ति, सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति, स यत्कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मानमेव तद्भावयति एषां लोकानां

सन्तत्या एवं सन्तता ह्येमे लोकाः ; तदस्य द्वितीयं जन्म । सोऽस्याय मात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते ; अथास्याय मितर आत्मा कृतकृत्यो वयोगतः प्रैति, स इतः प्रयन्नेव पुनर्जायते ; तदस्य तृतीयं जन्म"–इति (२ आ० ५. १.)। शतपथे तु मृत्युप्रकारो मृतस्य तस्य पित्रादिदेहलाभश्चान्नातः परिव्यक्तम् । तथाहि— "स यत्रायꣳ शरीर आत्माबल्यं नीत्य सम्मोह मिव न्येत्यथैन मेते प्राणा अभिसमायन्ति, स एतास्तेजोमात्राः समभ्याददानो हृदय मेवान्ववक्रामति । स यत्रैष चाक्षुषः पुरुषः पराङ् पर्य्यावर्ततेऽथारूपज्ञो भवत्येकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयतीत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुतइत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुः । तस्य हैतस्य हृदयस्याग्रं प्रद्योतते, तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेहेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राण मनूत्क्रामन्तꣳ सर्वे प्राणा अनूत्क्रामन्ति, सज्ञान मेवान्ववक्रामति, स एष ज्ञः सविज्ञानो भवति ; तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च । तद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमुपसꣳहरत्येव मेवायं पुरुष इदꣳ शरीरं निहत्याविद्यां गमयित्वान्यमुपसꣳहरति । तद्यथा पेशस्कारी पेशसो मात्रा मुपादायान्यन्नवतरं कल्याणतरꣳ रूपं तनुत एव मेवायं इदꣳ शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरꣳ रूपं तनुते, पित्र्यं वा गान्धर्वं वा, ब्राह्मं वा प्राजापत्यं वा, दैवं वा मानुषं वान्येभ्यो वा भूतेभ्यः"–इति १४. ७. २. १—५. । अत्र पित्र्यं गान्धर्वञ्च मिथो गुणकर्मादितः किञ्चिद्भेदयुक्त मन्तरिच-

लोकगं रूपम् ; ब्राह्मं प्राजापत्यं च तथा मिथः सामान्यभेदयुक्तं द्युलोकगं रूपम् ; एवं देवं मानुषञ्च विद्वत्त्वाविद्वत्त्वभेदभिन्न मिहत्यं रूपम्। इत्थ मपि छान्दोग्याद्युक्तं पितृणां गतित्रैविध्यम्, उदीरतामितिमन्त्रान्नातपितृत्रैविध्यञ्चोपपन्नं भवति। तदेवं यास्क-व्याख्यातस्योदीरतामितिमन्त्रस्थस्य 'अमुं य ईयुः'-इत्यंशस्य पित्रा-द्यनतमदेहगतं प्राणं ये अन्वीयुरित्येवार्थः सुष्ठुतर इत्यस्माकम्। पिण्डपितृयज्ञप्रकरणादौ च (य० वा० २. २०—३४. ; श० ब्रा० २. ४. ४. १—२४. ; तै० ब्रा० १. ३. १०, २. ६. ३.) पितृगण-स्वरूपं पर्यालोच्यम्। पितृलोक मपि निर्णेष्याम इहैवान्त्यप्रकरणे।

मनुष्याः। ऐतरेये त्विहैतच्छब्दनिर्वचन मेवं प्रोक्तम्— "मेदं प्रजापते रेतो दुषदिति०—०तन्मादुषं सन्मानुष मित्याचक्षते परोक्षेण"-इति (३. ३. ९.)। "मनुष्याः कस्मात् ? मत्त्वा कर्म्माणि सीव्यन्ति, मनस्यमानेन सृष्टाः, मनस्यतेः पुनर्मनस्वी-भावे ; मनोरपत्यम्, मनुषो वा"-इति त्वाह यास्कः (निरु० ३. २. १.)। "मनोर्जातावञ्यतौ षुक् च"--इति च पा० ४. १. १६१ सूत्रम्। 'समुदायार्थो जातिः ; मानुषः मनुष्यः'-इति तत्र दीक्षितः। तत्रास्मत्तु "षडर्घ्या भवन्ति,— आचार्य ऋत्विक् स्नातको राजा विवाह्यः प्रियोऽतिथिरिति"-इति गो० गृ० सू० ४. १०। मातृपित्राचार्य्याणां पूजनीयत्वं तु तैत्तिरीय-(आ० ७. ११.)-मन्वादि-(२. २२५.)-प्रसिद्धम्॥

शतपथब्राह्मणे त्वेषां देवपितृमनुष्याणा मेकत्रैव विशेषपरिचय आम्नात उपासनाप्रकार॰। तथाहि— "ततो देवाः ; यज्ञोपवीतिनं भूत्वा दक्षिणं जान्वाच्योपासीदन्। तानब्रवीत्— यज्ञो वोऽमृतत्वं वः, ऊर्ग् वः, सूर्यो वो ज्योतिरिति।

प्राचीनावीतिनः सव्यं जान्वाच्योपासीदन्। तानब्रवीत्— मासि मासि वोऽशनए, स्वधा वः, मनोजवो वः, चन्द्रमा वो ज्योतिरिति। अथैनं मनुष्याः; प्राञ्चता उपस्थं कृत्वोपासीदन्। तानब्रवीत्— सायम्प्रातर्वोऽशनम्, प्रजा वो, मृत्युर्वो, ऽग्निर्वो ज्योतिरिति"-इति (२. ४. २. १, २, ३.)।

एषा मेव देवपितृमनुष्याणामर्चनं कर्त्तव्यत्वेनैतरेये समाम्नातम् "एष ह वा अनड्वापुरुष इत्यादिना। तत्र हि अग्निहोत्रादिभिः श्रौतैः, वैश्वदेवादिभिश्च गृह्यैर्देवाना मर्चनं सम्पद्यते; पिण्डपितृयज्ञादिभिः स्मार्तैः स्वस्वसूत्रोक्तप्रकारैः श्राद्धयान्नजलादिप्रदानात्मकश्राद्धादिभिश्च पितृणा मर्चनं सम्पद्यते; निष्कपटविनीतभावप्रदर्शनाज्ञापालनससमादरपक्वापक्वान्नाद्याहारादिप्रदानैर्मनुष्याणा मर्चनं सम्पद्यते।

अतिथिसत्कारविषये गाथाप्येकाम्नाता— "तद् यददो गाथा भवति,— अनेनस मेनसा सो ऽभिशस्तादेनस्वतो वाप्रहरादेनः। एकातिथि मपूसायं रुणद्धि बिसानि स्तेनो जहारेति"-इति ५. ५. ५। गाथैषा नैतद्ब्राह्मणप्रवक्तुः कल्पिता; अपि तु बहुप्राचीना, अनेनात्र स्मृतेत्येव। तदाह तद्भाष्ये सायणः— 'पुरा कदाचित् सप्तर्षीणां संवादप्रसङ्गे कश्चित् पुरुषो बिसस्तेन्यलक्षण मपवादं प्राप्य तत्परिहारार्थं मृषीणा मग्रे शपथं चकार, तदीयशपथोक्तिरूपेयं गाथा'-इति। तच्छपथस्वरूपञ्च तत्र तेनैवैवं व्याख्यातम्— 'बिसानि पद्ममूलानि, तेषा मपहर्त्ता (एवं) प्रत्यवायपरम्परां प्राप्नोतु;— पापरहिते पुरुषे बिषस्तेन्य मपवादं कृतवतो यः प्रत्यवायः, पापिनः पुरुषस्य सम्बन्धि पापं स्वीकुर्वतो यः प्रत्यवायः, सायङ्काले गृहे समागच्छत एकातिथेर्वैदेशिकस्यारोधने

यः प्रत्यवायः, सेयं प्रत्यवायपरम्परा बिसस्तैन्ये सति मम भूयादित्येवं शपथः'--इति। अस्माकं त्वस्या गाथाया ऋजुतरोऽर्थान्तरः प्रतिभाति। तद्यथा— यः कश्चित् 'अनेनसम्' अपापम् आरोप्यमानपापशून्यं जनम्, 'एनसा' आरोप्यमानेन पापेन 'अभिशस्तात्' निन्देत्, 'सः' निन्दकः 'एनस्वतः' स्वभावजातपापिनः तस्य निन्दितस्य यत् किमपि स्वभावजम् 'एनः' पापम् अस्ति, तदेव 'अपहरात्' अपहरणं कुर्यात्। सन्ति हि सर्वेषा मेव मानवानां स्वभावजानि पापानि। तदप्याहात्रैव-- "व्यतिषक्त इव वै पुरुषः पाप्मना"-इति (४. १. ४.)। इत्थं गाथापूर्वार्द्धेन वृथापवादकीर्त्तनं निषिद्धम्, अथापरार्द्धेनातिथिविमुखीकरणं निषिध्यते— यः कश्चिद् 'सायं' काले समागतम् 'एकातिथिं' सर्वातिथिलक्षणसम्पन्न मत एव प्रधानातिथिम्, एकसङ्ग्रामात्र मतिथिं वा 'अपरुणद्धि' स्वागतासनान्नपानादिक मदत्त्वा विमुखीकरोति, 'सः' 'स्तेनः' चौरः सन् 'बिसानि' मृणालानि, तन्नतानीव सूक्ष्मतन्तुरूपाणि तदतिथिशरीरस्थानि स्नायुनामजीवनहेत्वङ्गबन्धनानि 'अपजहार' तज्जीवनापहरणपातकभाग् भवतीति।

अहोऽतिथिसत्कारायासीत् तदाघ्न्याघातश्च प्रचलितः। तत एव सोमे राजन्यागते या आतिथ्येष्टिर्विहिता, तत्र पशुघातानुकल्पश्च विहितः— "तद्यथैवादो मनुष्यराज आगते, ऽन्यस्मिन् वार्हति उक्षाणं वा वेहतं वा क्षदन्त एव मेवास्मा एतत् क्षदन्ते, यदग्निं मन्यन्ति; अग्निर्हि देवानां पशुः"-इति (१. ३. ४.)। अप्युषःशब्दस्य पोषार्थतानिर्णयाय चाम्नात मेवम्— "एतर्हि गव्यं मीमांसमानाः पृच्छन्ति, सन्ति तत्रोषाः इति"-इति (४. ४. ५.)। सायणकृत मेवैतद्व्याख्यानं द्रष्टव्यम्।

मांसभक्षणविधिस्त्वाम्नात इहान्यत्रापि। तथाहि— "नाग्नीषो-मीयस्य पशोरश्नीयात्०—० तत्तन्नाट्टत्यम्०—० तस्याशितव्यञ्चैव लीप्सितव्यञ्च"—इति (२. १. ३.)। अमेध्यमांसभक्षणे दोषो मेध्यमांसभक्षणेऽदोषश्चाम्नातः। तथाहि— "एत उत्क्रान्तमेधा अमेध्याः पशवस्तस्मादेतेषां नाश्नीयात्"—इति २. १. ८.। 'एते' पुरुषकिम्पुरुषगौरगवयोष्ट्रशरभा इति षट् अमेध्याः, अखगोऽव्य-जपृथिवीभवाः पञ्च मेध्या भक्षणीया इति विवेकः। पृथिवीभव-त्वेनेह व्रीह्यादीनां ग्रहण मिष्टम्। अतएव श्रुतम्— "स वा एष पशुरेवालभ्यते यत् पुरोडाशः"—इत्यादि २. १. ८। तत्राप्यज-मांसस्यासीद् बहुप्रचलन मिति च प्रतीयते। तथाहि— "एष एतेषां पशूनां प्रयुक्ततमो यदजः"—इति च तत्रैव। इदानीं पशुघात-निन्दाप्यस्ति— "अथ येऽतोऽन्यथा सेडगा वा पापकृतो वा पशुं विमथ्नीरंस्तादृक्त्"—इति ७. १. १। स एष पशुहिंसाव्यवहारः खलु यद्यप्यस्मभ्यं न रोचते, तथाप्युदाहृतवाक्याना मवैदिकत्व मतथार्थत्वं वेदविरुद्धत्वं वा यावन्न प्रतीयते, तावदेवमादिषु "आम्नायवचनादहिंसा प्रतीयेत (१. ५. २.)"—इति निरुक्त-वचन मेव शरणं मन्यामहे वयम्।

अतिथिसत्कार इवेहान्योऽन्योऽप्युपदेशो लभ्यते। तद्यथा— "अभिहेषते पिपासते क्षिप्रं प्रयच्छेत्" इति (६. २. ५.)। एतेन स्थानविशेषे द्रव्यविशेषस्य दानक्षिप्रता विहिता। "अप्रसूतः करोत्यकृतं तदकृत मकरिति वै निन्दन्ति"—इति (२. ५. ६.)। एतेन सर्वेष्वेव विचार्य्यकर्मसु गुर्वाद्यनुज्ञा स्वाम्यनुज्ञा वा ग्रह-णीयेत्युपदिष्टम्।

आसीच्च तदानी मार्त्विज्यप्राशस्त्यम्, अयाज्ययाजननिषेधश्च।

तदाह— "यशसा वा एषोऽभ्येति, य आर्त्विज्येन। तं यः प्रतिरुन्धेद्, यशः स प्रतिरुन्धेद्; तस्मान्न प्रत्यरोत्सीदिति। यदि त्वस्मादपोज्जिगांसेद्, यज्ञेनास्मादपोदियात्। यदि त्वयाज्यः स्वयमपोदितं तस्मात्"—इति ६. ४. ८। तदेव मार्त्विज्याय आहृतस्य तत्त्यागो दोषाय भवति, त्यागायोपदेशो बाधनं वापि दोषायैव। यदि तु स्वयं यष्टुमिच्छुः स्यादन्यत्र हुतो वा भवेत्, तर्हि परार्त्विज्यत्यागो न दोषाय। एव मयाज्ययाजनं च न कर्त्तव्यम्। पापपुरुषयाजनस्य निषेधस्त्विहान्यत्रापि ज्ञातः— "न पापः पुरुषो याज्यः" —इति (४. ४. ३.)। अपि यथा पापपुरुषाणा मयाज्यत्वं विहितम्, तथैवार्त्विज्याय पापपुरुषाणां वरण मपि निषिद्धम्— "पापस्य वा इमे कर्मणः कर्त्तार आसते ऽपूतायै वाचो वदितारो यच्छ्यापर्णा इमानुत्यापतेमेऽन्तर्वेदि मासिषतेति"—इति ७. ५. १। अपरत्र चेह लोभाद्याहतचित्तानां तेजःशून्यानाम्, मात्सर्य्यादिपूर्णानां च तमःप्रकृतीनाम्, पापानुष्ठातृणां दुर्मतीनाञ्चार्त्विज्याय वरुणं निषिद्धम्। तथाहि— "त्रीणि ह वै यज्ञे क्रियन्ते,— जग्धं गीर्णं वान्तं०—०स एतेषां त्रयाणा माशां नेयात्"—इति ३. ५. २। यः खलु धनलोभादार्त्विज्यं कामयमानः कथ मपि यजमानं तत्कर्मकारयितार मपरं वा चाटुवृत्त्यादिभिस्तोषयन्नार्त्विज्यं लभते, ताट्शेन तेन कृतं तत् कर्म 'जग्धं' भक्षितं, मुखमध्ये प्रविष्ट मिव दूषितं भवति यो हि समाजाधिपत्येन ग्रामप्रभुत्वेन वापरेण केनापि वा हेतुना यजमानादेर्भीतिं मुत्पादयन्नार्त्विज्यं लभते, ताट्शेन तेन कृतं तत् कर्म 'गीर्णं' गिलितं, गलाधःकृत मिव दूषितं भवति। यस्तु विद्वानपि पापकर्मा भवति, तत्कृतं यत् किञ्चन कर्म तत् सर्वं 'वान्तं' उद्गीर्णं, छर्दित मिव घृण्यं भवति देवानाम्। तदेवं-

विधानां त्रिविधाना ऋत्विजां वरणाय यजमानो मनसि आशा मपि न कुर्यादिति। मूर्खस्यार्त्विज्यदूषणन्तूक्त मिहान्यत्रापि— "त ऋत्विजो यजमानं कर्त्वं मन्वस्य वित्त मादाय द्रवन्ति य मनेवं-विदो याजयन्ति"–इति ८. २. ७।

अथ व्यवहारः।— राज्ञां पुरोहितस्यावश्यकता चात्र बहुधा प्रत्यायिता। तद्यथा— "न ह वा अपुरोहितस्य राज्ञो देवा अन्न मदन्ति, तस्माद्राजा यज्यमाणं ब्राह्मणं पुरो दधीत, देवा मेऽन्न मदन्निति"–इति ८. ५. १। इत्थं ब्राह्मणजातेरेव पौरोहित्य मिति च ज्ञापितम्। एतद्वचनोपक्रमे व्यक्तञ्चाम्नातम् "ब्राह्मण: पुरोहित:"–इति। राजन्यवैश्ययोः पुरोहितार्षेयेण दीक्षादेदनञ्च विहितम्— "पुरोहितस्यार्षेयेण दीक्षा मावेदयेयुः, पुरोहितस्या-र्षेयेण प्रवरं प्रवृणीरन्"–इति (७. ४. ७.)। इतो वैश्याना मपि पुरोहितापेक्षा सूचिता। बुद्धिमत्तमाना मार्याणां पुरो-हितविधेः कथा तु दूरे आस्ताम्, जडाना मपि पृथिव्यादीनां पुरोहिताः सन्तीति च कल्पितम्— "अग्निर्वाव पुरोहितः पृथिवी पुरोधाता, वायुर्वाव पुरोहितो ऽन्तरिक्षः पुरोधाता, आदित्यो वाव पुरोहितो द्यौः पुरोधाता; एष वै पुरोहितो य एवं वेद, अथ स तिरोहितो य एवं न वेद"–इति ८. ५. ४। तदेवं यथा पृथि-व्यादिष्वग्न्यादीनां प्राधान्यम्, तथैव यजमानगृहेषु पुरोहितानां प्राधान्यं ध्वनितम्, विहितञ्च पुरोहिताना मेतद्विज्ञानवत्त्वम्; ब्राह्मणाना मपि येषां पृथिव्यादिनिष्ठाग्न्यादिपुरोहितत्वविज्ञान मविदितम्, तादृशा मविदुषां पौरोहित्यं सुतरां निषिद्धम्। तस्यै-तस्येतदुपसंहारवचनम्— "यो ह वै त्रीन् पुरोहितान् वेद, स ब्राह्मणः पुरोहितः"–इति। एतेन च वचनेन वेदविदा मेव

ब्राह्मणानां पौरोहित्यं व्यवस्थापितम्। "अयुव मार्यस्य राष्ट्रं भवति, नैनं पुरायुषः प्राणो जहाति, आजरसं जीवति, सर्व मायुरेति, न पुनर्म्रियते, यस्यैवं विदाम् ब्राह्मणो राष्ट्रगोपः पुरोहितः (८. ५. ३.)"—इत्यादिना पुरोहितानां यजमानमङ्गलकारित्वं बहुधैव प्रपञ्चितम्। "तदप्येतदृषिणोक्तम्"—इत्युपक्रम्य सांहितिकमन्त्रत्रयप्रमाणेनाप्येतदेव (ऋ० सं० ४. ५०. ७, ८, ९.) दृढीकृतम् (८. ५. ३.)। तत्रैव—"बृहस्पतिर्ह वै देवानां पुरोहितः, त मन्वत्ये मनुष्यराज्ञां पुरोहिताः। बृहस्पतिं यः सुभृतं बिभर्त्तीति यदाह, पुरोहितं यं सुभृतं बिभर्त्तीत्येव तदाह"—इत्यादि द्रष्टव्यम्। बृहस्पतिशब्देनात्र सूर्यो निरुक्तादिप्रसिद्धः। स यथा वायुादिदेवानां पुरोहितः पुरःस्थितः, प्राधान्यभागुपकारी च; मनुष्येष्वपि राजपुरोहितास्तथैव भवेयुः। तदत्र संहितावचन मपि प्रमाण मित्याह—"बृहस्पतिं यः सुभृतं बिभर्त्तीति (४. ५०. ७.)। "अग्निर्वा एष वैश्वानरः पञ्चमेनिः"—इत्यादिना (८. ५. १.) पुरोहितानां कोपनत्वं संवर्ण्य, यजमानानां तदुपशमने यत्नस्य कर्त्तव्यता चात्र विहिता। तदेतत्सर्व मालोच्य प्रतीयते,— तदानीन्तनराजपुरोहिताना मसाधारणसम्मानभाक्त्वं, राजसु राजगृहेषु च प्राबल्यं विशेषशक्तिप्रसारित्वञ्चासीदिति। अपि तेषा मद्यतनपुरोहिताना मिव कर्मकारयितृत्वं तत्तत्कर्ममन्त्रपाठयितृत्वं च न क्वापीह गम्यते, न वा क्वचिदिह ब्राह्मणस्य पुरोहितापेक्षा श्रूयत इति च सुधीभिरालोच्य मेव॥

कर्मकारयितृभ्यो दक्षिणादानस्यातिकर्त्तव्यता चासीत् तदानी मपि। तदाह—"दातव्यैव यज्ञे दक्षिणा भवत्यल्पिकापि"—इति ६. ५, ८। केनापि हेतुना सा परित्यक्ता चेन्न पुनर्ग्रहणीया

केनापि प्रकारेणागतापि सा आपन्नश्चुभावाय कस्मैचन प्रदेयेति चेदेव। तथाहि— "न निहत्तदक्षिणां प्रतिगृह्णीयात्" -इति, "यदि त्वेनां प्रतिगृह्णीयात्, अप्रियायैनां भ्रातृव्याय दद्यात्"-इति च ६. ५. ९। यशोलिप्साप्यासीत्तदातिप्रबला। तदाह— "यम् ब्राह्मण मनूचानं यशो नर्च्छेदिति ह स्माहारुणं परेत्य दर्भस्तम्बानुद्गृह्य दक्षिणतो ब्रह्माण मुपवेश्य चतुर्होतॄन् व्याचचीत"-इति ५. ४. ४। कस्मिंश्चिद् दानादिकर्मणि स्वश्रेष्ठताभिमानस्य पापहेतुत्वञ्चाभिमतं तेषाम्। तत एवैव माम्नातम्— "यो वै भवति, यः श्रेष्ठता मश्नुते स किल्बिषं भवति" इति १. ३. २।

आम्नातञ्चेह हस्त्यश्वगवादिधनदानप्रशंसागाथाभिगानम्। तथाहि दौष्यन्तिभरतस्य (८. ४. ९.)—

"हिरण्येन परीवृतान् कृष्णाञ्छुक्लदतो मृगान्।
मघवारे भरतोऽददाच्छतं बद्धानि सप्त च"-इत्यादि।

इह श्रुतस्य मृगशब्दस्य हस्तिपरव्याख्यानं सायणीयम्; अस्तु तत् तथैव मन्तव्यम्, परं तत्कृतं बद्धशब्दस्य वृन्दसङ्ख्यापरत्वं तु नास्मभ्यं रोचते; तादृशदानं ह्यत्यधिक मित्यसम्भवमिति।

आत्रेयाङ्गराजदानगाथाश्लोकेषु दासीदानं च श्रुतम्— "दासीसहस्राणि ददामि ते"-इति (८. ४. ८.)। एतेन तदानीं मासीदार्यावर्त्तेऽत्र च मनुष्याणा मपि हस्त्यश्वादीना मिव क्रयविक्रयदानप्रथेति स्पष्टम्। अत एव शौनःशेपाख्यानेऽपि श्रुतम्— "तस्य ह शतं दत्त्वा स त मादाय सोऽरण्याद् ग्राम मेयाय"-इति (७. ३. २.)। 'तस्य' तस्मै शुनःशेपपित्रे सौयवसयेऽजीगर्त्ताय 'सः' हरिश्चन्द्रपुत्रो रोहितः 'शतं' बहु, शतसङ्ख्याकं वा मुद्रात्मकं

धनं 'दत्त्वा' 'तम्' शुनःशेपम् आदायेत्याद्यर्थः। निरुक्ते (३. १. ४.) तु "स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते, न पुंसः; पुंसोऽपीत्येके; शौनःशेपे दर्शनात्"–इत्युक्तम्।

एवं पुत्रेषु पितुः स्वेच्छाजनितोऽन्यान्यविधोऽत्याचारोऽप्यासीत् तदानीं सुदुर्वारः। तद्यथा (७. ३. ५.)—

"अथ विश्वामित्रः पुत्रानामन्त्रयामास,—

मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्टकः

ये के भ्रातरः स्थ नास्मै ज्यैष्ठ्याय कल्पध्व मिति"–इति।

एव मन्यत्रान्यदपि —"ऐतशो ह वै मुनिरग्नेरायुर्ददर्श;०—० सोऽब्रवीत् पुत्रान्, पुत्रका अग्नेरायुरदर्शं तदभिलपिष्यामि, यत् किञ्च वदामि तन्मे मा परिगातेति०—०। तस्याभ्याग्नेरैतशायन एत्याकाले ऽभिहाय मुख मप्यगृह्णाददृपन्नः पितेति; तं होवाचापेह्यलसोऽभूर्यो मे वाच मवधीः०—० पापिष्ठां ते प्रजां करोमि यो मह्य मसक्था इति"–इति ६. ५. ७।

पुत्राणां पितृदायभाक्त्व मपीह सूचितम्। तद्यथा— "नाभानेदिष्टं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो निरभजन्त्सोऽब्रवीदेत्य किं मह्य मभाक्तेति"–इत्याद्याख्यानं (५. २. ९.) द्रष्टव्यम्।

वाणिज्याद्यर्थं समुद्रयानारोहणपूर्वकं महासमुद्रे परिप्लवनं चासीत् तदानीं सुप्रचलितम्। अतएव तद्दृष्टान्ततयाम्नात एवम्— "यथा समुद्रं प्रप्लवेरन्नेवं हैव ते प्रप्लवन्ते, ये संवत्सरं वा द्वादशाहं वा ऽऽसते"–इति ६. ४. ५। वनदस्यूना मप्युपद्रव आसीत्तदानी मिति चात्र सूचितम्। तद्यथा— "निषादा वा सेडगा वा पापकृतो वा वित्तवन्तं पुरुष मरण्ये गृहीत्वा कर्त्त्वं मन्वस्य वित्त मादाय द्रवन्ति"–इति ८. २. ७। एवं नागरिकग्रन्थिच्छेदका

मपि दृष्टान्तविधया समुल्लेखोऽत्र श्रुतः— "त ऋत्विजो यजमानं कर्त्वं मन्वस्य वित्त मादाय द्रवन्ति"–इति ८. २. ७ ।

आसीत्तदानीं चौर्य्य मपि तन्निन्दा च । तद्यथा सायणमते— पुरा कदाचित् सप्तर्षीणां संवादप्रसङ्गे कश्चित् पुरुषो बिसस्तेन्यलक्षण मपवादं प्राप्य तत्परिहारार्थं मृषीणा मग्रे शपथं चकार, तदीयशपथो क्तिरूपेयं गाथा— "अनेनस मेनसा सोऽभिशस्तादेनस्वतो वापहरा देनः। एकातिथि मप सायं रुणद्धि, बिसानि स्तेनो अप सो जहार" –इति (५. ५. ५.) । सायणमते गाथयैतया मृषापवादकारिणां साय मतिथिप्रत्याख्यातॄणां स्तेनकारिणाञ्च पापविद्धत्वं ज्ञापितम् ।

एकराट् सार्वभौमोऽप्यासीत्तदानीं संविज्ञातः । ततस्तत्परिचयोऽत्रैवम्— "अयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुषः आन्तादापरार्द्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति"–इति ८. ४. १ । तथाविधसार्वभौमनरपतेः सर्वेभ्यो मित्रराजेभ्य उपढौकनग्रहणञ्चेहाम्नातम्— "सर्वे हैव महाराजा आसुरादित्य इव ह स्म श्रियां प्रतिष्ठितास्तपन्ति, सर्वाभ्यो दिग्भ्यो बलि मावहन्ते" –इति ७. ५. ८ । 'सर्वे' च ते इमे— कावषेयः तुरः, साहदेव्यः सोमकः, सार्ञ्जयः सहदेवः , दैवावृधो बभ्रुः, वैदर्भो भीमः, गान्धारो नग्नजित् , अरिन्दम इति विश्रुतः जानकिः क्रतुवित् , पैजवनः सुदास्चेत्यष्टावैतरेयपूर्वपूर्वजाः सार्वभौमा बभूवु रिति च तदुपक्रमग्रन्थतः प्रतीयते ।

महाराजस्य प्रियतमभार्य्यायाः सन्निधौ प्रजाना मावेदनप्रथासीत् तदानीम् ; अत एव इन्द्रस्य प्रियायै वावातायै देवानां ाभिप्रायज्ञापनम् , तस्याश्च इन्द्रं ज्ञापयामीति प्रतिश्रुत्यादिकथा ्ते चात्र –"ते देवा अब्रुवन्नियं वा इन्द्रस्य प्रिया जाया वावाता

प्रासहा नाम, अस्या मेवेच्छामहा इति। तथेति तस्या मैच्छन्त। सेनानव्रवीत्,— प्रातर्वः प्रतिवक्तास्मीति"–इति ३. २. ११।

राजभ्रातॄणां राजसहचरणव्यवहारश्चासीत्। तत एवैव माम्नातम्— "ऋतवो वै सोमस्य राज्ञो राजभ्रातरो यथा मनुष्यस्य, तैरेवैनं तत्सहागमयति"–इति १. ३. २।

राजधानीपरिरक्षणाय तदभितः प्राकारनिर्म्माणप्रथाप्यासीत्तदानीम्। तदाह— "देवासुरा वा एषु लोकेषु समयतन्त, ते वा असुरा इमानेव लोकान् पुरोऽकुर्वत"–इत्यादि १. ४. ६। 'पुरोऽकुर्वत, प्राकारवेष्टितानि नगराणि कृतवन्तः'–इति तत्र सायणः। एतदाख्यायिकाया मसुरैः सहोपस्थिते सङ्ग्रामे असुरेभ्यस्त्रिपुररक्षणार्थं मयोरजतसुवर्णमयप्राकारा निर्मिता देवैरिति सूचितम्। असुरोपद्रवतो यज्ञरक्षार्थं मभितोऽग्निप्राकारनिर्म्माणञ्च देवैः कृत मिति च श्रुत मेतस्या माख्यायिकायाम्—"देवा वै यज्ञ मतन्वत०—०अग्निमयीः पुरस्त्रिपुरं पर्यास्यन्त"–इति २. २. १। प्रबलतरैः शत्रुभिराक्रान्ते राज्ये तद्रक्षणाय तदानीन्तनप्रजाना मपि परस्परं मन्त्रणाकरणम्, स्वत एव योधप्रवृत्तिः, परस्पर मैकमत्याय प्रतिज्ञारूढत्वम्, राजरक्षितगृहादौ पुत्रकलत्रादीन् संस्थाप्य युद्धाय प्रयाणञ्चेति सर्व मिह १. ४. ७ द्रष्टव्यम्। प्रियवस्तुदानादिरूपसामकौशलतो रक्तपात मन्तरेण स्वकार्योद्धारचेष्टाप्यादृतासीत् तदानीम् (१. ५. १.)। परस्परैकमत्यस्थितये आज्यस्पर्शपूर्विका प्रतिज्ञाप्रवृतिश्च तदानीन्तनी प्रशंसनीया। तथाविधं प्रतिज्ञानं हि तानूनप्त्र मिति सर्ववेदेषु विश्रुतम्। तदिदम् ऐ० ब्रा० १. ४. ७, श० ब्रा० २. ४. २, तै० सं० १. २. ११, ६. २. २–६ श्रुतिवाक्येषु विहितं द्रष्टव्यम्। "न सतानूनप्त्रेण द्रोग्धव्यम्"–इ

चेह (१. ४. ७.) तदुपसंहारः । 'सतानूनग्निणे' सहृणपथकारिणे न द्रोग्धव्य मिति तदर्थः । शतपथे चैवम्--३. ४. ४. ९ ।

सैनापत्यनिर्णयः, तस्य च सेनापतेर्भागशः शत्रुसेनाक्रमणोपायश्चेह वर्णितः— "स त्रिश्रेणिर्भूत्वा त्रनीकोऽसुरान् युद्ध मुपप्रापद् विजयाय"–इत्यादि (३. ४. १.) । युद्धकाले राजसाहाय्यकारिणां प्रजानां सामन्तानाञ्च प्रसादलाभकथाप्यत्र — "सोऽवेदिमे वै किल मे सचिवा इमे माऽकामयन्त हन्तेमानस्मिन्नुक्थआभजा इति, तानेतस्मिन्नुकथ आभजत्"–इति ३. २. ९ । युद्धजयानन्तरं राज्ञो मर्यादाहृद्धिश्चेह सूचिता ; तदत्र "इन्द्रो वै वृत्रं हत्वा"–इत्याद्याख्यायिका द्रष्टव्या (३. २. १०.) । पराजितानां मन्तर्हस्तीनानि धनानि समुद्रतीरे प्रोथितानि भवन्ति स्मेत्यषीह श्रुतम् (५. २. ६.) । हस्तमुष्टिमध्ये एव गोपनीयं यद् बहुमूल्यं रत्नादिकं धनम् , तदेवान्तर्हस्तीनम् । एवञ्च तदाप्यासीदेव बहुमूल्यहीरकादीनां व्यवहार इति चास्मात् प्रतीयते स्फुटम् ॥

प्रायः सर्वसभ्यदेशेषु विद्यमान एष उपविमोकव्यवहारोऽप्यासीत् तदानीम् । तथा चाम्नायते— "अश्वैर्वानडुद्भिर्वान्यैरन्यैरश्वान्ततरैरश्वान्ततरैरुपविमोकं यान्ति"–इति ४. ४. ५ । तदिदं श्रुत मुपविमोकस्वरूप मद्यतन मिवैव । दूराध्वगमने एवेदृशोपविमोकस्यावश्यकता चाम्नाता — "दीर्घाद्ध उपविमोकं यायात्"–इति (६. ४. ७.) ।

स्कन्धतो भारवहनाय वीवधस्य व्यवहार आसीत्तदानी मिति च प्रतीयते— "बृहत्पृष्ठं सवीवधतायै"–इत्येवमादिश्रुतेः (८. १. १.) । 'उभयतः शिक्यद्वयेन जलकुम्भद्वयं वोढुं यः काष्ठविशेषः स्कन्धाग्रे क्रियते, स वीवध इत्युच्यते'–इति तत्र सायणः ।

'विविधवीवधशब्दौ उभयतो बड़िशिके स्कन्धवाह्ये काष्ठे वर्त्तेते'–इति सि० कौ० (पा० सू० ४. ४. १७.)। वीवधदण्डस्तु प्रायेण वंशस्येव भवति, ततः स इह तेजतीति श्रुतम्—"तेजन्या उभयतोऽन्तयोरप्रस्रसाय बर्सौ नह्यति"–इति (१. २. ५.)। सूच्या सूतानां सभ्यजनोचिताङ्गरक्षादीनाञ्चासीत्तदापि व्यवहारः। श्रुतं ह्येतत्–– "सूच्या वासः सन्दधदियात्"–इति (३. २. ७.)।

एवं तदानीमपि कर्मठत्वं श्रमकारित्व मुद्योगित्वञ्चैवासीत् प्रशंसनीयम्, अलसस्य श्रमकातरस्योद्योगहीनस्य त्वासीन्निन्दनीयतैव। तत एवैव मिह (७. ३. ३.) श्लोकपञ्चक मान्नातम्—

"नानाश्रान्ताय श्रीरस्ति, इति रोहित शुश्रुमः।
पापो नृषद्वरो जनः, इन्द्र इच्चरतः सखा ॥ १ ॥
पुष्पिण्यौ चरतो जङ्घे, भूष्णुरात्मा फलेग्रहिः।
शेरेऽस्य सर्वे पाप्मानः, श्रमेण प्रपथे हताः ॥ २ ॥
आस्ते भग आसीनस्य, ऊर्ध्वस्तिष्ठति तिष्ठतः।
शेते निपद्यमानस्य, चराति चरतो भगः ॥ ३ ॥
कलिः शयानो भवति, सञ्जिहानस्तु द्वापरः।
उत्तिष्ठंस्त्रेता भवति, कृतं सम्पद्यते चरन् ॥ ४ ॥
चरन् वै मधु विन्दति, चरन् स्वादु मुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं, यो न तन्द्रयते चरन् ॥ ५ ॥"–इति।

यद्यप्येते गाथारूपाः श्लोका अनैतरेयेणेह प्रसङ्गत उद्धृता इति नैतरेयकालिकास्तथाप्यैतरेयकालेऽप्येवंविधोपदेशाना मासीदेवादर इत्यपि प्रतीयत एव। एषा मर्थासु सुगमाः, तथापि प्रथमचतुर्थयोः किञ्चिद् ब्रूमः।— यथा घोटकादयो मनुष्याणां वहनं कुर्वन्तीति मनुष्यवाहा उच्यन्ते, तथैवात्मशरीरस्थो लोहित एवा

शारीरतापं वहतीत्यग्निवाहत्वेन व्यपदिष्टो भवति वेदे (निघ० १. १५. २.) ; लोहित एव रोहितो वैदिकः । स च सूर्यचन्द्रोदयकृत इति वाहोरात्रजन्य इति वा हारिचन्द्रीयो हारिश्चन्द्रीय इतीहाख्यातः ; रसहरणात् हरिः=सूर्य इति हि सर्ववेदप्रसिद्धः । तथाचाग्निवाहनरूपशोणितधारिणः सर्वानेव पुरुषान् सम्बुद्ध्य ऋषिराहेम मुपदेश मिति फलितम् । नानेति । हे 'रोहित !' 'इति' वयं 'शुश्रुमः',— 'अनाश्रान्ताय' आभिमुख्येन श्रान्त आश्रान्तः, तद्विपरीतोऽनाश्रान्तोऽलसस्तस्मै 'श्रीः नास्ति' । अथवा नानाविधकार्येषु श्रान्तो नानाश्रान्तस्तस्मै श्रीरस्तिति । 'वरः' तपःकर्मविद्यादिभिः श्रेष्ठोऽपि 'जनः' 'नृषत्' नरि सीदन् , व्यक्तिविशेषस्याश्रितः सन् 'पापः' भवति । 'चरतः' भ्रमणकारिणः पुरुषस्य गिरिगिरिनदीग्रामसीमादिसङ्कटेषु च सर्वत्रैव 'इन्द्रः' अनुपमैश्वर्यवान् ईश्वरः 'इत्' एव 'सखा' विद्यते । यः किल नगरे स्वगृहे च रक्षकः, स एव अरण्यान्यादावपीति अर्थाद्यर्जनाय भ्रमणशीलस्य कोऽस्ति चिन्ताविषय इति भावः । कलिरिति । सर्वविधकर्त्तव्यकर्मसु 'शयानः' शय्यागतः, अलस इति यावत् । एतदेव कलिलक्षणम् । तदेवं कलियुगे धर्मार्थकाममोक्षाद्यर्जनकर्म्मसु आलस्यबाहुल्यं भवतीति निष्पन्नम् , निष्पन्नञ्च यस्मिन् कस्मिन् वा युगे यदैवालस्यपरतया कर्त्तव्यानुष्ठानावहेलनं कृतं भवेत् , तदैवेदानीं कल्याश्रितः कल्याश्रयो वाह मिति ज्ञेय मिति । 'सञ्जिहानः' शय्यां , शयनभावं वा त्यक्तुं प्रवृत्तस्तत्रैवोपविष्टः । 'उत्तिष्ठन्' शय्यां शयनभावं वां परित्यज्यान्यत्र, शय्याया मेव वा दण्डायमानः । 'चरन्' अनलसः कर्म्म कुर्व । इत्थ मिह प्रसङ्गतश्चतुर्युगलक्षण मुपदिष्टम् ।

मनुसंहिताया मप्येवमेव युगलक्षणं संस्मृतम् ८अ० ३०२श्लो०—

"कलिः प्रसुप्तो भवति, स जाग्रद् द्वापरं युगम् ।
कर्मस्वभ्युद्यतस्त्रेता, विचरंस्तु कृतं युगम्"–इति ।

तथैतदपि प्रतीयते— कलिरेवाद्यं युगम्, द्वापरं द्वितीयम्, त्रेता तृतीयम्, चतुर्थन्तु कृत मिति । द्वापरत्रेतेतिनामान्तर्गत-द्वित्रिशब्दतश्चैव मेव लभ्यते । प्रकृतिनियमोऽप्यत्रानुकूलः ; न हि कश्चित् कुमारः खल्वेकदैव तारुण्यं यौवनं चोल्लङ्घ्य वृद्धायते, नापि हि कश्चित् शयानोऽसञ्जिहानोऽनुत्तिष्ठंश्च स्यात् कार्यकुशल इति । एवं हि कलियुगानन्तरं कृतयुगागमनप्रतीक्षणं भवेन्निसर्गव्यापारानुकूलवेदार्थानभिज्ञाना मेव । तत्त्वतस्तु कलियुगानन्तरं द्वापरागमनम्, ततो त्रेतागमनम्, ततः कृतागमनम् ; चक्रवद्भ्राम्यमाने-ऽस्मिन् जगति पुनः त्रेतागमनम्, ततो द्वापरागमनम्, ततश्च पुनः कलेः प्रादुर्भाव इत्येव वैदिकम्, क्रमोन्नतिक्रमावनति-विज्ञानसम्मतञ्च । क्रमोन्नतिपक्षस्तु प्रदर्शितयुगश्लोकश्रुतितः सुव्यक्त एव, क्रमावनतिश्च तन्नायात् किन्न मन्तव्या स्यादित्यत एतद्विपरीतं मतं वेदविरुद्ध मित्यश्रद्धेय मेवार्य्याणाम् । अपर मपि,—यथा वर्षर्त्तौ सर्वर्त्तुसद्भावो "वर्षा वै सर्व ऋतवः"–इत्युपक्रम्य वर्णितः शतपथे— "यदेव पुरस्ताद् वाति, तद् वसन्तस्य रूपम् ; यत् स्तनयति, तद् ग्रीष्मस्य ; यद् वर्षति, तद् वर्षाणाम् ; यद् विद्योतते, तच्छरदः ; यद् वृष्ट्वोद्गर्जति, तद्धेमन्तस्य"–इति (२. ३. १. ७.), तथैव सर्वयुगधर्म्माणां प्रतियुगाश्रितत्वस्वीकारेऽपि न नो हानिरिति ॥

अथ तदानीन्तनविज्ञानानि । तत्र,

पृथिव्या गतिहेतुविज्ञानम्, द्यावापृथिवीसम्बन्धविज्ञानम् वृष्टिहेतुविज्ञानम्, उदकाना मतिक्रासवृद्ध्याभावहेतुविज्ञानम्

द्यावापृथिव्योरुभयोरेव प्रतिष्ठात्वविज्ञानञ्च यथा—"असौ वै लोक इमं लोक मभिपर्यावर्त्तते ततो वै द्यावापृथिवी अभवतां न द्यावान्तरिक्षान्नान्तरिक्षाद् भूमिः"—इति ४. ४. ५। 'असौ' द्युलोकः सूर्यलोक इति यावत्, 'इमं' भूलोकम् 'अभिपर्यावर्त्तते' सदैव अभितः परितश्च 'आवर्त्तते' भ्रामयति। 'ततः' तस्माद् 'वै' एव 'द्यावापृथिवी' द्यावापृथिव्यौ परस्परसम्बद्धे 'अभवताम्'। 'अन्तरिक्षात्' व्यवधानाद् 'द्यावा' द्युलोकः 'न' भूमितो विच्छिन्नः, तथा 'भूमिः' अपि तस्मात् 'अन्तरिक्षात्' व्यवधानाद् 'न' विच्छिन्नः। अतोऽत्रानुपदमुक्तम् "इमौ वै लोकौ सहास्ताम्, तौ व्यैताम्"—इत्युपपन्नम्। 'इमौ लोकौ' 'सहास्तां वै' परस्परसम्बद्धावेव विद्येते, 'तौ' लोकौ 'व्यैताम्' विवाहसम्बन्धयुक्तौ स्त्रीपुरुषाविव। एतयोः सम्बन्धज्ञापकहेतुश्चैवं निर्दिष्ट इहैव—"नावर्षन् न समतपत् ते पञ्चजना न समजानत"—इति। एतेन विज्ञायते द्युपर्यायः सूर्य एवात्र वृष्टिहेतुस्तापहेतुश्चेति। 'पञ्चजनाः' ब्राह्मणक्षत्रियवैश्या इति त्रिविधा आर्याः, दस्युदासाविति द्विविधावनार्य्याविति च पञ्चविधा मनुष्याः। तादृशविवाहस्य पुरोहिताः 'देवाः' रश्मय एवेमे इत्याह—"तौ देवाः समनयंस्तौ संयन्तावेतं देवविवाहं व्यवहेताम्"—इति। काव्योऽश एषः। तत्रैवं विवाहितयोस्तयोः स्त्रीपुरुषयोर्मिथः प्रीतिहेतुं निगमयति—"धूमेनैवेय ममूं जिन्वति, वृष्ट्यासाविमाम्"—इति ४. ४. ५। 'धूमेन' रसहेतुवाष्परूपेणेत्यर्थः। संहिताया मप्येव माम्नातम् (१. १६४. ५१.)—

"समान मेतदुदक मुच्चैत्यव चाहभिः।
भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः" इति

'अहभिः' रश्मिभिः आकृष्टम् 'एतत् उदकम्' 'उदेति'

ऊर्ध्वं मागच्छति, 'अव च' नीचैरपि आगच्छतीत्येव। अत एव 'पर्जन्याः' मेघाः 'भूमिं' 'जिन्वन्ति' प्रीणयन्ति, 'अग्नयः' अग्निजन्यानि धूमोद्भूतवाष्पाणि 'दिवं जिन्वन्ति'। अस्मादेव हेतोरुदकस्य ह्रासवृद्धिराहित्यं चिरं तुल्य मित्याह 'समानम्'–इति। अन्यथोदकस्योर्ध्वगमनाभावे क्रमादतिवृद्धिरेव स्यात्, तथा नीचैस्तत्पात मन्तरा क्रमात् समुद्रोऽपि शुष्येदिति वृष्टिनिदानविज्ञान मुदकसमत्वविज्ञानञ्च। एतयोः प्रतिष्ठारूपत्व मान्नातं यथा— "द्यावापृथिवी वै प्रतिष्ठे; इय मेवेह प्रतिष्ठा असावमुत्र"–इति ३. ३. ५। 'इह' भूलोके, 'इयम्' पृथिवी 'प्रतिष्ठा' प्रतिष्ठानम्, 'अमुत्र' द्युलोके 'असौ' सूर्यः, प्रतिष्ठेत्येव तदर्थः। इत्थं द्युलोकभूलोकयोरुभयोरेवास्मत्प्रतिष्ठाहेतुत्वं च विज्ञापितम्।

अथ पृथिवीभ्रमणविज्ञानम्, सूर्योदयास्तमयविज्ञानम्, अहोरात्रविज्ञानञ्च यथा— "स वा एष न कदाचनास्त मेति नोदेति। तं यदस्त मेतीति मन्यन्ते, अह्न एव तदन्त मित्वाथात्मानं विपर्यस्यते; रात्री मेवावस्तात् कुरुतेऽहः परस्तात्। अथ यदेनं प्रातरुदेतीति मन्यन्ते, रात्रेरेव तदन्त मित्वाथात्मानं विपर्यस्यते; अहरेवावस्तात् कुरुते रात्रीं परस्तात्। स वा एष न कदाचन निम्रोचति, न ह वै कदाचन निम्रो[illegible]चे"–इति ३. ४. ६। तदेतस्मादाम्नायात् सूर्यकर्तृकं पृथिव्या भ्रामणादिकं विस्पष्ट मवगम्यते। एव मेवान्यत्रापि श्रूयते। तद्यथाथर्वणिकानां गोपथे— "एतत् सुशस्ततर मिव भवति,— स वा एष न कदाचनास्त मयति, नोदयति। तद्यदेनं पश्चादस्त मयतीति मन्यन्ते, अह्न एव तदन्तं गत्वाथात्मानं विपर्यस्यते; अहरेवावस्तात् कुरुते

रात्री परस्तात् । स वा एष न कदाचनास्तमयति, नोदयति । तद्यदेनं पुरस्तादुदयतीति मन्यन्ते, रात्रेरेव तदन्तं गत्वात्मानं विपर्यस्यते ; रात्रि मेवाधस्तात् कृणुते, अहः परस्तात् । स वा एष न कदाचनास्त मयति, नोदयति ; न ह वै कदाचन निम्लोचति" –इति (२. ४. १०.)। छान्दोग्येऽपि ब्राह्मणे एव मेव सूर्यस्योदयास्तमयाभाव आम्नातः, विशेषतोऽसहायस्य तस्य मध्यस्थत्वं गतिराहित्य मपि । तथाहि— "नैवोदेता नास्त मेता, एकल एव मध्ये स्थाता । तदेष श्लोकः—

'न वै तत्र निम्लोचति नोदियाय कदाचन ।
देवास्त्वेनाहं सत्येन मा विराधिषि ब्रह्मणा'–इति ।
न ह वा अस्मा उदेति, निम्लोचति"–इति (५. ११. १–३.)।

अत्र स्थातेति पदं गतिनिवृत्त्यर्थस्य स्थाधातोरिति सूर्यस्यामुष्य गत्यभावः सुबोधितः । अध्यात्मपक्षेऽप्येषा श्रुतिर्भवति व्याख्येया ।

अथ देवताविज्ञानं यथा— "परोक्षप्रिया इव हि देवाः"–इति ३. ३. ८ । "न वै देवा अन्योऽन्यस्य गृहे वसन्ति, नर्त्तुर्ऋतोर्गृहे वसतीत्याहुः"–इति ५. २. ४ । "सत्यसंहिता वै देवाः"–इति च १. १. ६ । व्याख्यातव्याश्चेमाः श्रुतयः सप्तमे प्रकरणे ।

अथ सूर्यविज्ञानं यथा— "तेषु हि वा एष एतदध्याहितस्तपति"–इति ४. ३. ४ । 'तेषु' पूर्वोक्तेषु षट्सु लोकेषु 'अधि' मध्ये 'आहितः' परमेश्वरेण स्थापितः 'एषः' सूर्यः 'एतत्' सर्वं जगत् 'तपति' इत्यर्थः । तदेव मेषां पृथिव्यादिशनैश्चरान्तानां सर्वेषा मेव लोकानां मध्यस्थित एष सूर्यः, सर्वेषा मेषां तापकश्चेति विज्ञायते । चन्द्रस्य पृथिव्युपग्रहत्वेन न पृथिवीतः पार्थक्य मिहेष्टमत एव ग्रहाणां लोकानां वा षट्त्व मव्याहतम् । सर्वेषाञ्च

लोकानां शिरसा मुपर्य्येव दृश्यते सूर्य इत्यतस्तस्य सर्वत उत्तरत्व मपि विज्ञायते। तद्यथा— "स वा एष उत्तरो ऽस्मात् सर्वस्माद् भूताद् भविष्यतः, सर्व मेवेद मतिरोचते यदिदं किञ्च"–इति ४. ३. ४। "उत्तरः=उद्ततरो भवति"–इति यास्कः (निरु० २. ३. २.)। "विश्वस्मादिन्द्र उत्तरः"–इति त्वसकृत् समाम्नातं दाशतय्या मपि (१०. ८६. १–२३.)। इन्द्रस्तु तत्र सर्वत्रैव सूर्यः। सूर्यकर्तृकं पृथिव्या धारणं तु ऋचि यजुषि च "दाधर्थ पृथिवी मभितो मयूखैः (७. ९९. ३; ५. १६.)"–इत्यादिभिर्मन्त्रैराम्नात मेव। 'अमतिः (निघ० ४९)'–इतिपदनिर्वचनप्रसङ्गे (६. ३. ३.) यास्केन ह्येष निगमः प्रदर्शितः—

"अभि त्यं देवꣳ सवितार मोण्योः कविक्रतु
मर्चामि सत्यसवꣳ रत्नधा मभि प्रियं मतिम्।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत् सवीमनि
हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः॥"

—इति सा० सं० कु० आ० ५. २. ३. ८;— य० वा० सं० ५. २५. १, २;— तै० सं० १. २. ६. २;— अथ० सं० १४. १, २। 'अमतिशब्देनात्मप्रकाशगत मादित्यस्य विज्ञान मुच्यते; स हि प्रकाशसतत्त्व एव नान्यत्प्रकाशान्तर मपेक्षत इत्युपपत्तिः'–इति तत्र दुर्गाचार्यः। सूर्यस्य तापहेतुत्वेन जीवनहेतुत्वञ्चान्यत्र श्रुतम्— "प्राणं तदादित्येन समिन्धे, तस्मादय मुष्णः प्राणः;०—० सर्वं तदात्मान मादित्येन समिन्धे, तस्मादयं सर्व एवात्मोष्णः। तद्वैतदेव जीविष्यतश्च मरिष्यतश्च विज्ञानम्— उष्ण एव जीविष्यन्मीतो मरिष्यन्निति"–इति श० ब्रा० ८. ७. २. ११। 'सूर्यो नो', 'उदु त्यं', 'चित्र'–इत्येवमादीनि सौरसूक्तान्यपीहालोच्यानि।

अथ चन्द्रविज्ञानं यथा— "एतद्वै देवसोमं यच्चन्द्रमाः"–इति ७. २. १०। देवेन सूर्येण, देवैः सूर्यरश्मिभिर्वा पेयः सोमो देवसोमः। 'योऽयं चन्द्रमा अस्ति, एतदेव 'सोमं' देवाना मपेक्षितं सोमद्रव्यसदृशं वस्तु'–इत्यर्थः कृतोऽत्र सायणाचार्येण। "एकया प्रतिधा पिबत् साकं सरांसि त्रिंशतम्। इन्द्रः सोमस्य काणुका (ऋ० स० ८. ७७. ४.)"–इतिमन्त्रस्य व्याख्यानाय प्रोक्त मेतद् यास्कमुनिना— "एकेन प्रतिधानेन पिबन्ति तान्यत्र सरांस्युच्यन्ते त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत् पूर्वपक्षस्येति नैरुक्ताः, तया एता-श्चान्द्रमस्य आगामिन्य आपो भवन्ति, रश्मयस्ता अपरपक्षे पिबन्ति" –इति (५. २. ६.)। "य मक्षिति मक्षितयः पिबन्ति"–इत्यपि तत्रैव निगमः। तं पूर्वपक्षे आप्याययन्तीति च प्रमाणितं तत्र "यथा देवा अंशु माप्याययन्ति"–इतीतिनिगमप्रदर्शनेन। निगमा-वेतौ तैत्तिरीयसंहितायाम् (२. ४. १४. २.), अथर्वसंहितायां (७. ७. ३. ११.) च पाठभेदतः समाम्नातौ; तत्त्वतस्त्विमावृग्वे-दीयावेव विलुप्तशाखीयावित्यस्माकम्। अन्यत्र चोक्तम् — "सोऽस्यान्नं तेन न म्रियते, य मक्षिति मक्षितयः पिबन्ति"–इति (निरु० ३. भा० ३८८पृ०)। 'यम्' 'अक्षितिं' सोमम् 'अक्षितयः' रश्मयः 'पिबन्ति', 'सः' सोमः 'अस्य' सूर्यस्य 'अन्नम्' भक्ष्यम्, 'तेन' अन्नेन 'न म्रियते' नोपक्षीयते, सूर्य इति तदर्थः। शत पथेऽपि — "सोमो राजा देवाना मन्नं यच्चन्द्रमाः"–इति (२. ३. ४. ७.)। तैत्तिरीयब्राह्मणे च— "सोमो वै चन्द्रमा एष ह वै साक्षात् सोमं भक्षयन्ति"–इति (३. ४. १०)। "अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते, तदेतेनोपेक्षितव्यम्, आदित्यतोऽस्य रश्मिर्भवतीति"-इति च निरु० २. ८. २। "अत्रा ह गोरमन्वत

नाम त्वष्टुरपीत्यम्। इत्था चन्द्रमसो गृहे"–इति (ऋ० सं० १. ८४. १५.) मन्त्रवात्र मानम्। अत एव गां सुषुम्णनामसूर्यरश्मिं धारयतीति गन्धर्वश्चन्द्रमा उच्यते। तत एवोक्त मिदं यास्केन— "सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः (वा० सं० १८. ४०.) इत्यपि निगमो भवति; सोऽपि गौरुच्यते"–इति २. २. २। अत्र चन्द्रमसि यः कलङ्को दृश्यते, स खलु देवयजनस्यास्य कर्म्मभूमेर्मर्त्यलोकस्य छायापातसम्भूत इति चाम्नात मैतरेयेण— "एतद्वा इय मसुष्यां देवयजन मदधाद् यदेतच्चन्द्रमसि कृष्ण मिव"–इति ४. ४. ५।

अथ वायुविज्ञानं यथा— "वायुः प्राणः"–इति ३. १. २, "सवितृप्रसूतो ह्येष एतत् पवते"–इति १. २. १, "वायुर्वै यन्ता, वायुना ह्येदं यत मन्तरिक्षं न समृच्छति"–इति च २. ५. ९। वायोः सवितृप्रसूतत्वे पुरस्ताद् व्याख्यातः (५ पृ०) "इषे त्वोर्जे त्वा"–इति निगमश्च द्रष्टव्यः।

अथाग्निविज्ञानं यथा— "अग्निर्वै देवाना मवमः"–इति १. १. १। "अग्निर्वै परिक्षिदग्निर्ह्येमाः प्रजाः परिक्षेति, अग्निं ह्येमाः प्रजाः परिक्षियन्ति"–इति ६. ५. ६। अत्रैव 'पारिक्षितीः शंसति' –इति तिसृणा मृचां शंसनं विहितम्; ताः सर्वा एवर्चोऽग्नि-विज्ञानपराः। "अग्नेर्वा एतास्तन्वो यदेता देवताः (३. १. ४.)" –इत्यादिग्रन्थश्चाग्निविज्ञानपर एव। "अग्निर्वै शर्म्माणि अन्नाद्यानि यच्छति, अग्नि मेव तत् कल्पयति, अग्नि मप्येति"–इति २. ५. ९, "आग्नेय्यो ह्योषधयः (१. २. १.)"–इत्येवमादयश्चेहालोच्याः।

अथाब्विज्ञानं यथा— "अङ्गिरभिषिञ्चन्ति; रेतो वा आपः, सरेतस मेवैनं तत् कृत्वा दीक्षयन्ति"–इति (१. १. ३.), "अमृतं वा एतदस्मिंल्लोके यदापः"–इति (८. ४. ६.), "आपो वर्

पत्नय आसन् , ता अग्नि मभ्यध्यायन् , ताः समभवन् , तस्य रेतः परापतत् , तद्धिरण्य मभवत्"–इत्यादि चान्यत्र (तै० ब्रा० १. १. ३. ८.)। श्रुता चैषा ऋक् संहितायाम् (१. २३. २०.) –

"अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।
अग्निञ्च विश्वशम्भुव मापश्च विश्वभेषजीः"–इति ।

इतो ज्ञायते सोमाग्निभागसम्मिलनेन जातं जल मिति । तथा तैत्तिरीयारण्यकेऽपि—"आपो ज्योतिरसोऽमृतम्"–इति (१०. २७.) । इतश्चावगम्यते,– अप्सु ज्योतिर्भागो रसभागश्चेत्युभौ विद्येते, अमृतत्वञ्चास्तीति । यद्युच्येत, पाश्चात्यविज्ञानत एवैवं लभ्यते, तदेतदिह तद् दृष्ट्वैव कल्पत इति ; अत्र ब्रूमः,— इत्थ मेव भवति सर्वत्र सर्वविधान्तर्हितवस्तूना मुपलम्भः ;— कालप्रभावतो भूगर्भेऽन्तर्हितानां हर्म्यवर्त्मकरिकरपञ्जरमुद्रादीनां लाभोऽप्येव मेवानुसन्धानतो भवति ; न हि तथा लब्धान् पदार्थान् मृषाकर्त्तुं कोऽपि शक्नोति ; तथैव आदिविज्ञानानि यानि तमः-कालप्रभावादितो ऽनुपलब्धिङ्गतानि क्रमात् तेषां सर्वेषा मेकस्य वा कस्य चित् कथ मपि सन्धान माप्य यदि कश्चित्तदाविष्करणे मनो निवेशयेत् , स श्रुतकल्पनाङ्कदिति कथ मग्राह्यवचनो भवे-दिति । तद्यथा, भ्राम्यमानेऽस्मिन्नुन्नत्यवनतिकरे कालचक्रे अद्य या पाश्चात्यविज्ञानप्रभावजा विद्युत्क्रिया दृश्यते, आयास्यति हि तमःकाले सैषा भविष्यत्येवान्तर्हिता ; पुनः प्रकाशकाले समु-पस्थिते कश्चित् कथ मप्येतदनुसन्धान मुपगत्यास्याविष्कारं कर्त्तुं मेषिष्यति चेत् , स किं कल्पनाङ्कदिति वाच्यो भविष्यतीति ते पाश्चात्यविज्ञानविद एव विचारयन्तु । "अप्सु ज्योतिः प्रति-ष्ठितम्"–इति च स्पष्टम् (तै० आ० ९. ८.) । "अपां रसस्य यो

रसः"–(ते० सं० १. १२. २.)–इत्यादयश्च श्रुतयोऽत्रालोचनीयाः। अपान्नपादिति ज्योतिर्नाम तन्निरुक्त्यादिकञ्च पर्य्यालोच्यम् (निघ० ५. ४. ११ ; निरु० १०. २. ५, ६.)। पुरातनाऋो ज्योतिःप्रकाशोऽप्यृक्संहितायां श्रुतः। तद्यथा— "आदित् प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम्। परो यदिध्यते दिवि"–इति ८. ६. ३०।

विष्णुविज्ञानं यथा— "विष्णुः परमः"–इति १. १. १। विष्णोस्त्रिविक्रमणादिकं च स्पष्टं मान्नातं शतपथे— १. ९. ३. ७–१२। इदं विष्णुर्विचक्रमे०—० व्यस्कभद्रोदसी। विष्णुरेते दाधार पृथिवीं मभितो मयूखैः"–इति च ते० सं० १. २. १३. २। स एव विष्णुः सूर्य एव। विष्णुविवरणन्त्विह पुनः सप्तमे प्रकरणे विशेषतो वर्णयितव्यं मस्तीतीहालं पल्लवितेन।

अथ गर्भादिविज्ञानं यथा— "पराञ्चो गर्भा धीयन्ते, पराञ्चः सम्भवति ;०—० मध्ये गर्भा धृताः०—० अमुतोऽर्वाञ्चो गर्भाः प्रजायन्ते"–इति (३. १. १०.)। "रेतस्तत् सिक्तं विकरोति ; सिक्तिर्वा अग्रेऽथ विक्तिः०—० रेतस्तद् विक्तं प्रजनयति ; विक्तिर्वा अग्रेऽथ जातिः"–इति (२. ५. ७.)। "न्यूने वै रेतः सिक्तं मध्यं स्त्रिये प्राप्य स्थविष्ठं भवति"–इति (६. ३. १.)। "यथा गर्भो योन्या मन्तरेवं सम्भवच्छेते, न वै सकृदेवाग्रे सर्वः सम्भवति, एकैकं वा अङ्गं सम्भवतः सम्भवति"–इति (६. ५. ५.)। षड्विधो वै पुरुषः षडङ्ग आत्मान मेव तत् षड्विधं षडङ्गं विकरोति" –इति (२. ५. ७.)। "चक्षुः पुरुषस्य प्रथमं सम्भवतः सम्भवति" –इति (३. १. २.)। "ज्यायान्त्सन् गर्भः कनीयांसं योनिं न हिनस्ति"–इति (५. २. १०)। "मुक्ता गर्भा जायन्ते०—० सहैवोल्वेन कुमारो जायते"–इति (

"मुष्टी वै कृत्वा गर्भो अन्तः शेते, मुष्टी कृत्वा कुमारो जायते" –इति (१. १. ३.)। "कुमारं जातं संवदन्ते प्रतिधारयति वै ग्रीवा अथो शिर इति"–इति (३. १. २.)। "कुमारं जातं संवदन्त उप वै शुश्रूषते नि वै ध्यायतीति"–इति (३. १. २.)। "कुमारो जातः पश्चेव प्रचरति"–इति (३. १. २.)। "कुमारं जातं जघन्या वागाविशति"–इति (३. १. २.)। अथाप्यस्यैवारण्यके— "पुरुषे ह वा अय मादितो गर्भो भवति , यदेतद्रेतस्तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजः सम्भूत मात्मन्येवात्मानं बिभर्त्ति ; तद् यदा स्त्रियां सिञ्चत्यथैनज्जनयति"–इति (२. ५. १.)। अतैवान्ते मृतानां जन्तूना मातिवाहिकदेहधारणं पुनर्जन्मविज्ञानञ्चाम्नातम्-- "अथास्याय मितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते"–इति । आतिवाहिकदेहधारणन्त्वन्यत्रापि सुव्यक्तम्— "तद्यथा तृणजलायुका तृणस्यान्तं गत्वाथात्मान मुपसंहरति"–इत्यादि श० ब्रा० १४. ७. २. ४ द्रष्टव्यम् ।

अथ शारीरादिविज्ञानं यथा— "रेतः पुरुषस्य प्रथमं सम्भवतः सम्भवति"–इति (३. १. २.)। "उर्ध्वाः पुरुषस्य भूयांसः प्राणाः" –इति (६. ३. ५.)। "प्राणास्त इमेऽवाञ्चो रेतस्यो मूत्रः पुरीष्य इति"–इति, "प्राणो वा अयं सन् नाभेरिति, तस्मान्नाभिस्तन्नाभेर्नाभित्वम् , प्राण मेवास्मिंस्तद्दधाति"–इति (१. ४. ३.)। "पुरा नाभ्या अपि शसो वपा मुत्खिद्यात्"–इत्यादीनि वचनानि च (२.) शारीरतत्त्वबोधकानि। "मुखतो वै प्रजा अन्न मदन्ति०—० प्रजा अन्नं धिनोति"–इति (५. १. ३.)। एकं सच्च- इति (२. ४. ८.)। "अन्तर मक्ष्णः कृष्णम्०—० येव न पश्यति"–इति, "अन्तरं कर्णस्य येनेव शृणोति"

–इति, "अन्तरं नासिकयोः येनैव गन्धान् विजानाति"–इति, "अन्तरं मुखस्य जिह्वा-तालु-दन्ताः०—० येनैव वाचं व्याकरोति, येन स्वादु चास्वादु च विजानाति"–इति च (५. ४. ३.)। "पाङ्क्तोऽयं पुरुषः पञ्चधा विहितो लोमानि त्वङ् मांस मस्थि मज्जा"–इति (२. २. ४.) "षड्विधो वै पुरुषः"–इत्यादि च (२. ५. ७.)।

अथ खाद्यविज्ञानं यथा— "असृतं वा एतदस्मिंल्लोके यदापः" –इति (८. ४. ६.), "रेतो वा आपः"–इति (१. १. ३.), "आज्यं वै देवानां सुरभि, घृतं मनुष्याणाम्, आयुतं पितॄणां, नवनीतं गर्भाणाम्"–इति (१. १. ३.), "इन्द्रियं वा एतस्मिंल्लोके यद् दधि"–इति (८. ४. ६.), तेजो वा एतद् घृतम्" –इति (८. ४. ६.), "यद् घृतं तत् स्त्रियै [स्त्रियाः] पयो ये तण्डुलास्ते पुंसः"–इति (१. १. १.)। "रसो वा एष ओषधिवनस्पतिषु यन्मधु"–इति (८. ४. ६.), "स वा एष पशुरेवालभ्यते तत् पुरोडाशः"–इत्यादि च ([illegible] १. ६.)। बिसाना मपि खाद्यत्वं तदासीत् प्रशस्तम्। [illegible] ५. ५. ५ द्रष्टव्यम्। 'बिसानि = पद्ममूलानि'–इति तद्भाष्ये सायणः। अस्मन्मतेतु मृणालानीति विशेषः। अन्यत्र पयोविकाराणां दशानां खाद्याना मपि नामान्याम्नातानि— "गोर्वै प्रतिधुक्, तस्यै शृतं, तस्यै शरः, तस्यै दधि, तस्यै मस्तु, तस्या आतञ्चन, तस्यै नवनीतं, तस्यै घृतं, तस्या आमिक्षा, तस्यै वाजिनम्"–इति श० ब्रा० ३. ३. ३।

अथ भेषजविज्ञानं यथा— "तेजो वा एतदद्भ्योर्यदाञ्जनम्" इति १. १. ३। "ज्योतिर्वै शुक्रं हिरण्यं,०—० मृत्युर्वै तमः तेनैव तज्ज्योतिषा मृत्युं तमस्काया तरति"–इति ७. २. १। धार्थं तत्प्रयोगविधिरप्यन्यत्रान्नातः— "हिरण्याद् घृ

आयुर्वै घृत मसृतꣳ हिरण्यम्, अमृतादेवायुर्निर्मिमीते शतमानं भवति"–इति तै० सं० २. ३. ११. ८। अत्राह तत्सूत्रकारः— "खादिरं पात्रं चतुःस्रक्ति प्रयुनक्ति सौवर्णस्य प्रवर्त्तं शतमानस्य क्षतम्"–इति, "ध्रुवां खादिरं सादयित्वा तस्मिन् प्रवर्त्त मवदधाति" –इति च तत्रैव। 'प्रवर्त्तः कर्णाभरणं कुण्डलम्'–इति, 'शतमानं पञ्चपलपरिमितम्'–इति, 'मानशब्दो गुञ्जाबीजं ब्रूते'–इति च तत्रैव सा० भा०। ब्राह्मणस्य भैषज्यनिषेधोऽप्यत्र— "ब्राह्मणेन भेषजं न कार्यम्; अपूतो ह्येषोऽमेध्यो यो भिषक्"–इति तै० सं० ६. ४. ८. २। भेषजकरणकाले ब्राह्मणस्य तत्रोपवेशनन्तु विहितम्— "उदपात्र मुपनिधाय, ब्राह्मणं दक्षिणतो निषाद्य भेषजं कुर्यात्"–इति च तत्रैव (४.)। भैषज्यस्य त्रिधात्व मपि विहितं तत्रैव— "अग्नौ हृतीयम्, अप्सु हृतीयम्, ब्राह्मणे हृतीयम्"–इति।

अथ कालविज्ञानम्— "उषस्यागताया मरुण मिवैव प्रभात्युषसो रूपम्"–इति ४. २. ३। "तम इव हि रात्रिर्मृत्युरिव"–इति ४. १. ५। "द्वादशमासाः संवत्सरः"–इति १. १. १। "त्रयोदशो मासो नानुविद्यते"–इत्यादि ३. १. १। "पञ्चर्त्तवो हेमन्तशिशिरयोः समासेन, तावान्त्संवत्सरः"–इति १. १. १। "पञ्च वा ऋतवः संवत्सरस्य, यद्यु षडेवर्त्तवः"–इति तु शतपथे ४. ५. ५. १२। "त्रयो वा ऋतवः संवत्सरस्य"–इति च तत्रैव १४. '. २८। "त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि" '२. २. ७, "सप्त च वै शतानि विंशतिश्च संवत्सरस्या- '–इति च २. २. ७।

'वज्ञानं यथा— "मयैव (आदित्येनैव) प्राचीं दिशं

प्रजानाथाग्निना दक्षिणां सोमेन प्रतीचीं सवित्रोदीची मिति। ०—० पुर उदेति पश्चास्त मेति०—०, दक्षिणतोऽग्र ओषधयः पच्यमाना आयन्त्याग्नेय्यो ह्योषधयः०—०, प्रतीच्यो ह्यापो बह्व्यः स्यन्दन्ते, सौम्या ह्यापः०—०, उत्तरतः पश्चादयं भूयिष्ठं पवमानः पवते, सवितृप्रसूतो ह्येष एतत् पवते"–इति १. २. १।

अथ देशप्रकृतिविज्ञानं यथा— "उत्तरतः पश्चादयं भूयिष्ठं पवमानः पवते"–इति, दक्षिणतोऽग्र ओषधयः पच्यमाना आयन्ति" –इति, "प्रतीच्योऽह्यापो बह्व्यः स्यन्दन्ते"–इति च १. २. १। प्रत्यञ्चि दीर्घारण्यानि भवन्ति"–इति ३. ४. ६। प्राच्यो ग्रामता बहुलाविष्टा"–इति ३. ४. ६.। प्राच्यां वै दिशि देवाः सोमं राजान मक्रीणन्"–इति च १. ३. १।

अथ शिल्पविज्ञानं यथा— "देवशिल्पान्येतेषां वै शिल्पाना मनुकृती ह शिल्प मधिगम्यते,— हस्ती कंसो हिरण्य मश्वतरी-रथः शिल्प मिति"- इति १. ३. ५, २. १. २। अथान्यत्रापि— "यद्वै प्रतिरूपं तच्छिल्पम्"--इति (शत० ब्रा० ३. २. १. ५.), "एतच्छिल्प मेष वर्णः"–इत्यादि च तत्रैव (१. १. ४. ३.)। तैत्तिरीयब्राह्मणान्नातमन्त्रयोस्त्वन्यविध मपि (२. ७. १५. २, ३. ३. २. १.) "दिवः शिल्प मवततम्"--इत्यादि, "येभिः शिल्पैः पप्रयाना महृ्हत्"–इत्यादि चेति।

अथ शब्दार्थविज्ञानं यथा— "यद्वै देवानां नेति तदेषा मो म्"–इति ६. ५. १। शतपथेऽप्येवम्— "यद्वै नेत्यृचि, ओ मिति तत्"–इति १. १. १. ३०। एतदुदाहरण मेवेदं गम "गौतम ! कं त्वं वैश्वानरं वेत्थ ? इति, पृथिवी मेव होवाच, ओम् इति होवाच"–इति १०. ६. १.

तत उत्तरं देवसङ्ख्यानिर्णयप्रसङ्गे — ११. ६. ३. ४। "ओ३ मित्यृचः प्रतिगर एवं तथेति गाथायाः; ओ मिति वै देवं तथेति मानुषम्"–इति चैतरेये (७. ३. ६.)। "तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति, तानेकधा समभरत्, तदेतदो मिति"–इति, "ओ मिति वै स्वर्गो लोकः, ओ मित्यसौ, योऽसौ तपति"–इति, "ओ मिति प्रणौति"–इति चात्रैव (५. ५. ७.)। "ये वा अनूचानास्ते कवयः"–इति २. १. २, "ये वै ते न ऋषयः पूर्वे प्रेतास्ते वै कवयस्तानेव तदभ्यतिवदति"–इति च ६. ४. ४। "विश्वस्य ह वै मित्रं विश्वामित्र आस"–इति ६. ४. ४। "हिरण्यकशिपावासीन आचष्टे, हिरण्यकशिपावासीनः प्रतिगृह्णाति; यशो वै हिरण्यम्"–इति च ७. ३. ६। शतपथ-तैत्तिरीययोस्त्वितोऽधिकतरं शब्दार्थविज्ञानं द्रष्टव्यम्।

इहोदाहृतेभ्योऽन्यान्यपि बह्व्याचारव्यवहारविज्ञानवचनानी-होपलभ्यन्ते, तानि चालोचनयोग्यानीत्यकथित मपि सिद्धम्॥

---

(६)

अथैतद् विचार्यं मस्ति, कस्याः शाखाया इद मैतरेयकं ब्राह्मण मिति। तत्रादौ शाखापदार्थो निरूपणीयः, ततः कति शाखा ऋग्वेदस्य?, किन्नामिका चाद्य प्रचलितेय मिति व्यम्, तत्रैव लुप्तालुप्तविचारणा चेति।

र बहुषु पुराणेषु शाखाकथा वर्णिता, तत्र च विष्णुभाग-ण। तद्यथा ऋक्शाखानिर्णयप्रसङ्गे —

"बिभेद प्रथमं विप्र पेल ऋग्वेदपादपम् ।
इन्द्रप्रमतये प्रादात् वाष्कलाय च संहिते ॥
चतुर्थी स बिभेदाथ वाष्कलिर्निजसंहिताम् ।
बोध्यादिभ्यो ददौ तासु शिष्येभ्यः स महामुनिः ॥
बोध्याग्निमाठरौ तद्वद् याज्ञवल्क्यपराशरौ ।
प्रतिशाखासु शाखायास्तस्यास्ते जगृहुर्मुनेः ॥
इन्द्रप्रमतिरेकां तु संहितां स्वसुतं ततः ।
माण्डुकेयं महात्मानं मैत्रेयाध्यापयत् तदा ॥
तस्य शिष्यप्रशिष्येभ्यः पुत्रशिष्यान् क्रमाद् ययौ ।
वेदमित्रस्तु शाकल्यः संहितां ता मधीतवान् ॥
चकार संहिताः पञ्च शिष्येभ्यः प्रददौ च ताः ।
तस्य शिष्यासु ये पञ्च तेषां नामानि वै शृणु ॥
मुद्गलो गालवश्चैव वात्स्यः शालीय एव च ।
शिशिरः पञ्चमश्चासीत् मैत्रेय सुमहामुनिः ॥
संहितानितयं चक्रे शाकपूणिरथेतरम् ।
निरुक्त मकरोत् तद्वत् बलाकश्च महामतिः ॥
निरुक्तकृच्चतुर्थोऽभूद् वेदवेदाङ्गपारगः ।
इत्येताः प्रतिशाखाभ्योऽप्यनुशाखा द्विजोत्तम ॥
वाष्कलिश्चापरस्तिस्रः संहिताः कृतवान् द्विज ।
शिष्यः कालायनिर्गार्ग्यस्तृतीयश्च कथाजवः ।
इत्येते बह्वृचाः प्रोक्ताः संहिता यैः प्रकीर्त्तिताः ॥"

—इति वि० पु० ३. ४. १६-२५

अथ भागवते १ स्क० ४ अ० २२ श्लो०—

"त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा

शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् ॥"—इति ।

पुनस्तत्रैवान्यत्र ऋक्शाखावर्णनप्रसङ्गे १२ स्क० ६ अ०—

"पैलः स्वसंहिता मूचे इन्द्रप्रमितये मुनिः ।
वाष्कलाय च सोऽप्याह शिष्येभ्यः संहितां स्वकाम् ॥
चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ।
पराशरायाग्निमाठरायेन्द्रप्रमतिरात्मवान् ॥
अध्यापयत् संहितां स्वां माण्डुकेय ऋषिं कविम् ।
तच्छिष्यो देवमित्रश्च सौभर्यादिभ्य ऊचिवान् ॥
शाकल्यस्तत्सुतः स्वां तु पञ्चधा व्यस्य संहिताम् ।
वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥
जातूकर्णश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ।
बालाकपैङ्गयवेतालविरजेभ्यो ददौ मुनिः ॥
वाष्कलिः प्रतिशाखाभ्यो बालखिल्याख्यसंहिताम् ।
चक्रे बालायनिर्भुज्युः काशीरश्चैव तां दधौ ॥
बह्वृचाः संहिता ह्येता एतैर्ब्रह्मर्षिभिर्धृताः ।
श्रुत्वैवं छन्दसां व्यासं सर्वपापैः प्रमुच्यते ॥"—इति ।

इत्थं तु गम्यते वेदांशा इति, शाखा इति चाभिन्नार्थे पदे । एवं हि यथा भागवतोऽयं द्वादशभिः स्कन्धैर्विभक्तः, पुनस्तत्स्कन्धाश्च बहुभिरध्यायैर्विभक्ताः, तथैव एको वेदः प्रथमं चतुर्धा विभक्तः, पुनस्ते चत्वारो भागाश्च बहुधा विभक्ताः; स एवैकैको भागः शाखेति व्यपदिश्यत इति । तथा च यथा भागवतीय-प्रत्यध्यायं पाठो भिन्नो विषयश्च विभिन्न एव, एवं प्रतिशाखं मन्त्रा-विभिन्न उपदेशाश्च विभिन्ना एव; किञ्च यथा भागवतस्य एकमध्यायेऽधीते न त्वेकस्यायि स्कन्धस्याध्ययनं सम्पद्यते,

तथैव कस्या मप्येकस्यां शाखाया मधीतायां नैवैकस्य वेदस्याध्ययनं भवेत् सम्याद्य मिति। आह चैतत् समासतः कूर्मपुराणे—

"एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा।
शाखानान्तु शतेनाथ यजुर्वेद मथाकरोत्।
सामवेदं सहस्रेण शाखानाञ्च विभेदतः।
अथर्वाण मथो वेदं बिभेद नवकेन तु।
भेदैरष्टादशैर्व्यासः पुराणं कृतवान् प्रभुः"—इति १. ५१।

एवञ्च यथा पुराणानि एकव्यक्तिकृतानि अष्टादशसङ्ख्याकानि, तथैव वेदशाखाः सर्वा अप्येकव्यक्तिनैव वेदानां खण्डखण्डीकरणेन सम्पादिता मिथः पार्थक्य मापन्ना इत्येवाभिमतं तेषाम्। अत एवोक्तं वाङ्न-तर्कवाचस्पतिना स्वकृते वाचस्पत्ये— "शाखा वेदैक-देशे"—इति, "चरणो वेदैकदेशे शाखापरपर्याये; 'गोत्रं च चरणैः सह' महाभाष्य-का०"—इति च। वाङ्न-विश्वकोषकारा-दयोऽप्येतच्चरणानुचरा एव। तथाच वेदपरिच्छेदविशेषो वेदांशः शाखापदार्थो निष्पद्यते, बहुना मनधिगतवेदानां तत्वतो ब्रह्मबन्धूना मेव मेव विश्वासश्च।

तदेवं पुराणवर्णितं शाखाविभागमतं प्रेक्षावतां वेदविदुषां स्यादुपेक्षणीयम्; आप्तवचनानुमानप्रत्यक्षतस्तथाप्रतीतेः।

तथाहि— आम्नात मिदं कौषीतक्यारण्यके वंशब्राह्मणे— "अथ वंशो नमो ब्रह्मणे नम आचार्येभ्यो०—० गुणाख्याच्छाङ्ग-यनादस्माभिरधीतं, गुणाख्यः शाङ्गायनः कहोलात्"—इत्या (१४ अ०)। एतस्यैव कहोलशिष्य-शाङ्गायनर्षेरध्ययनभेद सञ्जाता शाङ्गायनी शाखा; सेय मृक्शाखातीव अहो! अस्या नामापि न स्मृतं विष्णुभाग

स्फुट मिहाप्तवचनानैक्यम्। यच्चोक्तं कौर्मे वैयासिक्य एव सर्वाः शाखा इति, तदप्येतत्तदाप्तवचनविरुद्धम्।

अपरथाप्याप्तवचनविरोध उपलभ्यते यथा— अस्ति शौनकीया अनुवाकानुक्रमणी, तत्र शाकलबाष्कलशाखयोः प्रथममण्डलगत-क्रमपार्थक्यप्रदर्शनायोक्तम्—

"गौतमादौशिजः कुत्सः परुच्छेपाट्टषेः परः।
कुत्साद् दीर्घतमा इत्येष तु बाष्कलकः क्रमः"–इति (२१.)।

"अथ बाष्कलकोऽस्य विशेष माद्यमण्डले आह,— उपप्रयन्तो नासत्याभ्याम् अग्निं होतारम् इमं स्तोमं वेदिषद इति बाष्कलकः क्रमः; उपप्रयन्त इमं स्तोमं नासत्याभ्याम् अग्निं होतारं वेदिषद इति शाकलकः क्रम इत्यर्थः। अथैव मुक्तोरुत्तरमण्डलनवके न क्रम-विपर्यासः"–इति तट्टीका षड्गुरुशिष्यकृता। एवं हि शाकलबाष्क-लयोः क्वचित् क्वचिन्मन्त्रपाठक्रमान्यत्वेऽपि ग्रन्थैकत्वं सुव्यक्तम्।

किं बहुना, महामुनिवेदव्यासप्रणीत इति यः प्रसिद्धश्चरण-व्यूहाख्यः स्वल्पो ग्रन्थः, तत्राप्युक्तम्— "तेषा मध्यायाश्चतुष्षष्टिः"–इत्यादि शाखापरिच्छेदादीना मैकविध्यम्; 'तेषा माश्वलायनादि-शाखानां समानाध्ययनं सूचयति'–इति हि तद्व्याख्यानम्। तदेवं ब्रह्मविष्ण्वादिपुराणानां शाखाभेदप्रकरण माप्तवचनानैक्यविरोधा-दितो जलमध्यस्थमसिच्योदवत् विलीयत इति सुतरा मभ्युपेयम्।

सन्ति च प्रदर्शितपौराणिकमतविरोधप्रमापकानि स्मृतिवच-
तद्यथा— "वेदः कृत्स्नोऽधिगन्तव्यः"-इत्यस्ति (२. १६५.)
; तदिदं कृत्स्नाध्ययनं तत्रये सहस्रशाखसामवेदिना
कथङ्कारं भवेत् सम्माद्यम्? विहितञ्च तद-
ेषु तत्रैव— "षट्त्रिंशदाब्दिकं चर्यं गुरोस्त्रै-

वैदिकं व्रतम्"--इति (३. १.)। विष्णुगीतमयाज्ञवल्क्यसंहितास्वपि प्रतिवेदं द्वादशाब्दं ब्रह्मचर्यं विहितम्। "वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्। अविप्लुतब्रह्मचर्यो गृहस्थाश्रम मावसेत्" --इत्येवमादीनि वचनानि च (म० ३. २.) द्रष्टव्यानि। तस्मात् पौराणिकः शाखाभेदो मन्वादिमतविरुद्ध इत्यनुमानञ्च.नासङ्गतम्।

अत्रापि संशयश्चेत्, कस्याप्येकस्य वेदस्य कतमयोरपि द्वयोः शाखयोराद्यन्तपाठदर्शनादेव स विलेयः, विलीयेत च तदा 'वेदांशाः शाखाः' इति पौराणिकं मतं सूर्योदये यथान्धकारम्; प्रत्यक्षदृश्यं ह्येतत्।

वस्तुतोऽतिप्राचीनकाले लिपेरभावात् लिखितपाठकस्य निन्दाश्रवणाद्वा वेदानां लिखितपाठ्यत्वाभावादासीदानुश्रविकत्वम्; ततः कालभेददेशभेदव्यक्तिभेदादिभिरध्ययनक्रमोच्चारणादिभेदात् क्रमभेदाः पाठभेदाश्च सम्पन्नाः, तत एवैवैकस्य वेदस्य बहुनामतो बह्व्यः संहिताः प्रसिद्धिङ्गताः, तासु मन्त्रपाठन्यूनातिरिक्तता च किञ्चित् सञ्जाता; आचार्याणां प्रकृतिवैषम्यात् तत्तद्देशकालाद्यनुरोधाच्च अनुष्ठेयभेदाः प्रयोगभेदाश्चाभवन्ननिवार्याः; तत एव ब्राह्मणबाहुल्यं कल्पबाहुल्यञ्च सुतरां सम्पन्नम्। इदमेव शाखाभेदनिदानम्। तदित्थमेकैकस्य वेदस्य बहुशाखत्वेऽपि एकैकस्याः शाखाया अध्ययनत एव भवेदधीत एवैकैको वेदः; सर्वास्वेव शाखासु मूलसंहितैक्यदर्शनात्; किञ्चित्पाठन्यूनातिरिक्तेन, किञ्चित्पाठक्रमोच्चारणभेदेन, किञ्चिदनुष्ठानपद्धतिभेदादिना न ह्येवाभवत् वास्तविकः संहिताभेदः।

अतोऽत्र खेव मेवावधार्यम्— एष किल वेदशा ह्येककर्तृकः, न च ब्रह्मविष्णुपुराणादिग्रन्थभेदवत्,

ध्यायभेदतुल्यः ; प्रत्युत भिन्नकालदेशव्यक्तिलिखितानामेकग्रन्थीयानां बहुतरादर्शपुस्तकानामवश्यम्भाविन एव पाठभेदादिभावाः, तथाभूतपाठभेदादिहेतुक एवेति । एवमपि यजुषः कतिपयशाखाभिः कतिपयशाखानां महानस्ति प्रभेदः, अत एव तयोर्द्विविधयोः शाखासमूहयोः शुक्लकृष्णत्वेऽमंसत प्राचीनाः । तथा च माध्यन्दिन्यादीनां यजुःशाखानां शुक्लयजुरिति समाख्या, तैत्तिरीयादीनान्तु कृष्णयजुरिति । ईदृशासदृशभेदकारणन्तु बह्वक्तिवेद्यमित्यल मिह प्रसङ्गकीर्त्तनाडम्बरेणेति ।

तत्त्वतो न हि वेदशाखा, वृक्षशाखेव ; नापि नदीशाखेव ; प्रत्युताध्येतृभेदात् सम्प्रदायभेदजन्याध्ययनविशेषरूपैव ; अत एव शिष्यशाखापरम्परेति वचनमद्यापीह भारते प्रसिद्धम् । चरणशब्दोऽपीह न तु पादार्थत्वमूलको भागार्थः , अपि त्वाचरणार्थः ; सन्ति हि शाखास्वनुष्ठानाचरणभेद इति शाखावचनः । तदुक्तं "गोत्रञ्च चरणैः सह"–इत्यस्य (पा० सू० ६. १. ६२.) व्याख्याने कैयटेन— 'चरणशब्दोऽध्ययनवचनः इह तूपचारादध्येतृषु वर्त्तते' –इति । 'शाखाध्येतृवाची च जातिकार्यं लभते । कठौ, बह्वृची' –इति च तत्सूत्रीयसिद्धान्तकौमुदी । 'चरणः शाखाध्येता०—० कठेन प्रोक्त मधीयाना वा कठी'–इत्येव तद्व्याख्या तत्त्वबोधिनी । "अनुवादे चरणानाम् (पा० सू० २. ४. ३.)"–इत्यस्य व्याख्यायां नागेशोऽप्याह— 'चरणशब्दोऽत्र शाखाध्येतृपरः'–इति । 'शाखाध्येतृवाचिना मित्यर्थः'–इति च तत्तत्त्वबोधिनी । "चरणे ब्रह्मणि"–इत्यस्य (पा० सु० ६. ३. ८६.) व्याख्याने व्यक्तमाह "चरणः= शाखा"–इति । 'तस्य समानत्वं वेदस्य नत्वात् , तस्य तत्त्वञ्च अध्येतृभेदात् वेदभेदं व्रत-

भेदञ्च परिकल्प्य बोध्यन्ते'–इति च तत्र शेखरः। "चरणाद्धर्म्मा-म्नाययोः"–इत्यस्य (पा० सू० ४. ३. १२०. वा० ११.) व्याख्यायां "कठानां धर्म्म आम्नायो वा काठकम् , पैप्पलादक मिति"–इत्याह पतञ्जलिः। 'आम्नायः सम्प्रदायः'–इति च तत्र नागेशः।

एवं हि 'चरणं वेदैकदेशे' –इति वाचस्पत्युक्तं नूनं भ्रमविजृम्भितम्, तदुत्तरत्र तल्लिखितं 'गोत्रञ्च चरणैः सह, महाभाष्य-का०' –इति तत्प्रमाणसूचनञ्च तथैव ; तत्र भाष्ये 'गोत्रञ्च चरणानि च' –इत्येतावत एवोल्लेखदर्शनात्। पातञ्जलमूलिकैव सा वाचस्पत्युक्तिरिति भ्रमाद् वाङ्गविश्वकोषप्रणेत्रादयोऽप्यत्राभवन् विमुग्धाः ॥

तदत्र पुनरपि ब्रूमोऽध्ययनादिभेद एव शाखाभेदनिदानं न तु ग्रन्थभेद इति। अत एव एकैकवेदस्यानेकशाखत्वेऽपि तात्त्विकभेदाभावात् श्रीमत्सायणाचार्यस्यैकैकशाखाव्याख्यानेनैव सर्ववेदभाष्यकर्त्तृत्त्वं प्रसिद्धम् ; किञ्चैव मपि कृष्णयजुः-शुक्लयजुः-शाखासमूहयोर्विशेषपार्थक्यस्यास्तित्वादेव कृष्णयजुस्तैत्तिरीयशाखां व्याख्यायापि न स कृत्स्नयजुर्व्याख्याने कृतकृत्यम्मन्य इति शुक्लयजुःकाण्वशाखा मपि व्याख्यातवान्। तथा एकशाखाध्ययनेनैवैकवेदाध्ययनं सम्पद्यत इत्येव "वेदः कृत्स्नोऽधिगन्तव्यः"–इत्यादीनि मन्वादिवचनानि च सङ्गच्छन्ते। वेदशब्दस्य शाखापरत्वव्याख्यानन्त्वप्रमाणिकम्।

एवञ्च यदुक्तं विष्णुपुराणभागवतयोः 'बिभेद प्रथमं', 'बोध्यादिभ्यो ददौ तास्तु', 'चतुर्द्धा व्यस्य बोध्याय'— इत्येवमादि, तत्सर्वं नूनं शाखापदार्थज्ञानविहीनत्वावेदक मेव ; विशेषतः कूर्मपुराणे शाखाना मष्टादशपुराणतुल्यता तु वर्वर्त्ति सर्वोपरीति ॥

अहो वत ! वेदवैदिकमतप्रचारार्थोत्सर्गीकृतजी[illegible] सर्वार्यवर्येणास्मच्छ्रद्धाभाजनेनाचार्य्यदयानन्दस्वामि[illegible]

वेदव्याख्यानरूपत्वेन वेदभिन्नत्वं पुराणाद्युक्तरूपमिथोभेदवत्त्वञ्च मत्त्वेवालेखि स्वकृतवेदभाष्यभूमिकायाम्— "एकादशशतानि सप्तविंशतिश्च वेदशाखा वेदव्याख्याना अपि वेदानुकूलतयैव प्रमाणमर्हन्ति"–इति (२९१ पृ०)। शोच्यत्वे त्वेतल्लिपिसन्निधौ नूनं पौराणिकी शाखाभेदकथाप्यपास्तेति मन्यामहे वयम्। यदुक्तं पातञ्जले पस्पशायाम्— "एकविंशतिधा बाह्वृच्यम्, एकशत मध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, नवधाथर्वणो वेदः"–इति। तदेतत्सङ्कलनयैवोक्तं स्यादिदं परिगणन मेकादशशतानीत्यादि, परं तत्रापि किञ्चित्पार्थक्यम्प्रतीयते। अस्तु तत्तथैव, पर महो! काश्यानन्दीयानविचारे, यत्र वय मास्म मध्यस्थाः, विशेषतो वादिप्रतिवादिवचसा मनुलेखनेऽह मेक एवोभयपक्षतो नियुक्तः, तत्र तेनैव स्वामिनोक्तम्—'सहस्रवर्त्मा सामवेद इत्यस्य सहस्रं गीत्युपाया इति भावः" –इति। वस्तुतः सामवेदस्य गीतिकौशलबहुत्वादेव बहुशाखत्वम्, शाखासङ्ख्या तु त्रयोदशैवेत्यस्माक मपि सम्मत मेव। हन्त! का नाम संहिता शाखेतिव्यपदेशशून्या तेन महात्मनोररीकृता, यस्याः मूलवेदत्वं मत्वा शाखेतिप्रसिद्धाना मन्यासां तद्व्याख्याग्रन्थत्वं मन्तव्यम्ववेदिति त्वस्माक मज्ञेय मेव। तदत्र सम्भाव्यते,— विमिश्रमन्त्रब्राह्मणयोस्तत एव वान्त इति प्रथितयोस्तैत्तिरीयशाखीयसंहिताब्राह्मणग्रन्थयोः विशेषतस्तदारण्यकग्रन्थीयनिखिलखिलकाण्डदर्शनादेव तस्याशेषशेमुषीसम्पन्नस्यापि स्वामिन एवं मः सञ्जात इति। अपि वा शाखातत्त्वानभिज्ञेन केनचित्तच्छिन्नैवं स्याद् विनिवेशित मिति॥

ऋग्वेदशाखासङ्ख्यानिर्णयाय यतमानाश्च प्रथम तयोरेव ोः पुराणयोः प्राविशाम, परं तत्रोभयत्र मिथोऽनैक्यं

चरणव्यूहादिशाखावर्णनकृद्गन्थविरोधञ्च संलक्ष्याभीष्टसाधनेऽकृत-कार्यास्ततः पर्येत्य वाल्यपठितं पातञ्जलवचन मेवेहावलम्बामहे । तच्चेदम्— "एकविंशतिधा बाह्वृच्यम्"-इति । षड्गुरुशिष्येण च वेदार्थदीपिकाया भूमिकाया मेतद्विषयाणि कतिचित् पद्यान्युद्धृतानि, तत्र दृश्यते चैतत्— "एकविंशत्यध्वयुक्त मृग्वेद मृषयो विदुः"-इति । आह च तत्र तद्व्याख्यायाम्— 'अध्वा, गतिः, शाखा इति पर्यायाः'-इति। कौर्म्मेऽप्येवम् । इतः सुनिर्णीत मृग्वेदस्य शाखा एकविंशतिरिति ।

तदेकविंशतिशाखानां सर्वासा मेवाभिधानानि लब्धानिर्णेयानीव ; यावतीनां यथा-यथावगम्यन्ते, तावतीना मेव तथा-तथा व्यक्तीकर्त्तुं यतामहे ।—

अस्ति प्राचीनोऽष्टविकृतिविवृतिनामा लक्षणग्रन्थो महामुनिव्याडिकृतः । तस्य प्रथमवल्लीगतचतुर्थश्लोक एषः— "शैशिरीये समाम्नाये व्याडिनैव महर्षिणा । जटाद्या विकृतीरष्टौ लक्ष्यन्ते नातिविस्तरम्"-इति । अस्य व्याख्यानावसरे तट्टीकाकृता कतिचिदितिहासश्लोका उपन्यस्ताः, त मितिहास मुपगत्य व्याख्यायि च व्याख्यातव्यश्लोकगत एवकारः । तथाहि— "एवकारस्य किम्प्रयोजनम् ? अत्रोच्यते इतिहासः—

'शाकल्यस्य शतं शिष्या नैष्ठिकब्रह्मचारिणः ।
पञ्च तेषां गृहस्थास्ते धर्म्मिष्ठाश्च कुटुम्बिनः ।
शिशिरो बाष्कलः साङ्ग्यो वाल्यश्चैवाश्वलायनः ।
पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्त्तकाः ।'-इत्यादि

ततश्च शिशिरबाष्कलसाङ्ग्यवाल्याश्वलायनप्रवर्त्तिताः शाखासु शौनकाचार्याणां मते जटाद्यष्टविकृतिल-

प्रणीतस्येष्टत्वात् न माण्डूकेयप्रोक्तस्य जटालक्षणस्येत्येवाभिप्रायार्थ एवकारः"-इति। अस्ति सूत्रं पाणिनीयम्— "गोत्रे लुगचि (४. १. ८९.)'-इति, तेन हि छात्रेऽपि विवक्षितेऽत्र गोत्रप्रत्ययस्याणो लुग् कृतं भवति ; तथाच सम्प्रदायन्ते शाकल्यस्य शिष्याः शिशिरादयः पञ्चेमे शाकलाः। तेषां शाकलाना माम्नायाः= सम्प्रदायाः= शाखा वा पञ्चैव "शाकलाद्वा (४. ३. १२८.)"-इतिपाणिनीयशासनात् शाकलाः शाकलकाश्चोच्यन्ते। तदेव ऋग्वेदस्य शैशिरीया, बाष्कला, साङ्ख्या, वात्स्या, आश्वलायनीति पञ्च शाखानामानि विज्ञायन्ते, ज्ञायते चासां सर्वासा मेव शाकलशाखेति नामैक्य मपि। अपि यदुक्त मनुवाकानुक्रमण्युपक्रमे—

"ऋग्वेदे शैशिरीयायां संहितायां यथाक्रमम्।
प्रमाण मनुवाकानां सूक्तैः शृणुत शाकलाः"-इति।

अत्र शाकला इति सम्बोधनश्रवणाच्चावगम्यते, तासां पञ्चशाकलशाखाना मेकतमां शैशिरीया मेवावलम्ब्य क्रियमाणाप्येषानुक्रमणी पञ्चाना मेव शाकलानां हिताय सम्पाद्येति।

अस्ति चात्र मतान्तरता ;— शाकल्यस्य शिष्यः अतएव शाकल इत्येव प्रसिद्ध आसीत् कश्चन एक आचार्यः, तेनाध्यापिता ये पञ्च शिष्याः शिशिरादयः, तेषां पञ्चानां पञ्च शिष्यसम्प्रदाया एव शैशिरीयादयः पञ्च शाखाः सम्पन्नाः, तैः पञ्चभिरधीतानां देशकालत्वभेदतोऽध्ययनशैलीक्रमोच्चारणभेदात् किञ्चित्पाठन्यूनाधिक्याच्च भाव मापन्नानां पञ्चानां संहितानां शाकलप्रोक्तृत्वेनैव शाकलत्वम्। तथा च प्रदर्शितविकृतिवल्लीटीकाकृदुपन्यस्तः 'शाक-
शिष्याः'-इति पाठः स्यात् प्रामादिकः, तत्र 'शाकलस्य
ति निर्यकारपाठेनैव भवितव्य मिति। अतएवोक्त

महामुनिव्याडिना स्वविकृतिवल्लारम्भे — "नत्वादौ शौनकाचार्यं गुरुं वेदमहानिधिम् । ०—० । नमामि शाकलाचार्यं शाकल्यं स्थविरं तथा"—इति । अत्र शौनकस्य गुरुत्वम्, शाकल्यस्य तु परमगुरुत्वं व्याख्यातं तट्टीकायाम् ।

तदित्थं शाकल्येनाध्यापिता शाकलेनाध्यापिता वा एकैव एषा ऋक्संहिता देशकालपात्रभेदतः शिशिरादिपञ्चाचार्यकृताध्यापनशैलीपाठक्रमोच्चारणानुष्ठानभेदात् किञ्चित्पाठन्यूनाधिक्याच्च पञ्चविधत्वं गता, शैशिरीयादिपञ्चनामभिः शाकलैकनाम्ना च प्रसिद्धाद्यापीति सर्वं निरवद्यम् ।

शाखानिर्णायके चरणव्यूहे तूक्तम्— "ऋग्वेदस्य × × शाखाः पञ्च भवन्ति ; आश्वलायनी, शाङ्खायनी, शाकला, बाष्कला, माण्डूकेया चेति"—इति । इहोक्ता आश्वलायनी तु पूर्वोपात्तातोऽभिन्नैव ; शाङ्खायनी स्यात् पूर्वोल्लिखिता साङ्ख्या शाङ्ख्या वेति चरणव्यूहटीकाकृन्महिदासमतन्तु नूनं प्रामादिकम् ; प्रमापयिष्यामो ह्यनुपदं शाङ्खायन्या अशाकलत्वम् । तत्त्वतः शाङ्खायनी नाम शाखा पूर्वप्रदर्शितशैशिरीयादिभ्यः पञ्चभ्यो विभिन्ना षष्ठ्येव । शाकलेति शैशिरीयाया ग्रहणं मन्तव्यम् ; तस्याः शाकलाद्यत्वेन तथाव्यवहारोपपत्तेः । तद्यया सामवेदीयार्चिकग्रन्थयोरुभयोरपि छन्दोमयत्वसाम्येऽपि पूर्वस्यैव छन्द इति व्यवहारः, उत्तरस्य तूत्तरेति । अन्यथात्र बाष्कलायाः आश्वलायन्याश्च शाकलेत्येव ग्रहणसिद्धे पुनर्ग्रहणस्यापार्थता कथं वार्येत । बाष्कलापि पूर्वपरिचितैव । माण्डूकेया हाधिका पूर्वोपात्ताभिः शैशिरीयादिभिः पञ्चभिः अतोऽशाङ्खायन्या च परिगणनया सप्तमी सम्पद्यते । इत्थं सप्तशाखासामान्यमगम्यन्ते, गम्यते च चरणव्यूहकार

पञ्चानां साङ्ख्या वाल्या चेति द्वे शाखे विलुप्ते, शाङ्खायनी माण्डू-केया चेति द्वेऽशाकले तदाप्यविलुप्ते इति। एवञ्च तदानीं मिश्रो-पात्ता आश्वलायन्यादयः पञ्चैव शाखाः सम्प्रचलिता आसन्। अन्यासु षोडश विलोपं गता इति स्यान्मन्तव्यम्।

देवीपुराणे तु त्रिश्रेणीनां तिसृणां वा शाखाना मुल्लेखो दृश्यते। तथाहि तत्र सप्तमेऽध्याये—

"शाखासु त्रिविधा भूप! शाकला यास्कमण्डुकाः"—इति।

तत्र शाकलासु स्युः पूर्वप्रदर्शितनामान एव शैशिरीयाद्याः पञ्च, मण्डुका अपि स्युर्माण्डूकेयाद्याः कतिचिदस्माभिरज्ञातसर्व-नामिकाः, यास्कशाखा तु स्यान्नवीना निरुक्तकृद्यास्काच्च परभवा अथवा यस्कगोत्रीयेन केनचित् प्रोक्ता निरुक्तकृद्यास्कपूर्वतनैव, स्याच्च सा अध्येतृबाहुल्याद् बहुसङ्ख्याकापीति सम्प्रति सम्पूर्णतमसाच्छन्ने-वेत्यत्र नास्माकं वाक् प्रसरति। 'शाकलयास्कमण्डुकाः'—इति पाठे त्रिविधेत्यस्य यदि तिस्र इति भावार्थः स्यात्, यथा 'एकविंश-तिधा बाह्वृच्यम्'—इति (पा० म० भा० १आ०), तर्हि शाकलेति सम्प्रति प्रचलिताया ग्रहणं न दोषावहम्, मण्डुकेति माण्डूकेय्या एव ग्रहणं भवेत् स्वीकार्यम्, अनन्यविदिता यास्कशाखैवात्राधि-केति। एवं हि पूर्वकीर्त्तितसप्तनामभिरेतदनन्यविदितयास्कनाम्नः सङ्कलनया अष्टशाखानामानि परिज्ञातानि भवन्ति।

अस्ति चाश्वलायनीयगृह्ये तर्पणप्रकरणे—'जानन्ति-वाहवि-र्य-गौतम-शाकल्य-बाभ्रव्य-माण्डव्य-माण्डूकेयाः'—इति माण्डू-केयोल्लेखः। 'कहोलं कौषीतकं पैङ्गयं महापैङ्गयं सुयज्ञं शाङ्खा-यनिं च शाङ्खायनगणोल्लेखः। 'ऐतरेयं महैतरेयं शाकलं वाष्किं महौदवाष्किं सौजामिं शौनक माश्वलायनम्'

–इति चाश्वलायनगणोल्लेखः। तदुक्तं चरणव्यूहटीकायां महिदासेन—'जानन्तिवाहवीत्यारभ्य माण्डूकेया इत्यन्तो माण्डूकेयगणः, + + + शाङ्खायन इत्यन्तः शाङ्खायनगणः, ऐतरेय इत्यारभ्य आश्वलायनान्त आश्वलायनगणः'–इति। इत्थं ऋग्वेदस्य प्रधानतस्तिस्र एव शाखाः पर्यवसिताः, तासा मेव स्युरनुशाखा इतराः। ता एव मूलशाखाः अनुलक्ष्य देवीपुराणे "शाखासु त्रिविधा भूप ! शाकलयास्कमण्डुकाः"–इत्युक्तम् (१३०पृ०)। तत्रापि यास्कस्थाने शाङ्खेति पठितव्यम्, तच्च शाङ्खायनस्यैवैकदेशग्रहणं मन्तव्यम्, यास्कपाठस्तु स्याल्लिपिकरपाण्डित्यमूलकः। तदेवं देवीपुराणे तदानीमचलिताप्रचलितानां सर्वासा मेव ऋक्शाखानां नामग्रहणं सम्पन्न मित्यपि वक्तुं शक्यते।

अस्मन्मते तु शाकला माण्डूकेया चेत्येत एव द्वे प्राचीनतमशाखे ; ऐतरेयारण्यके एतयोरेव द्वयोराचार्यनाम्नोरान्नानदर्शनात्, अपि शाङ्खायनी स्यान्माण्डूकेयानुशाखा माण्डूकेयभेदेवेति। त एत एव द्वे ऽध्येतृभेदात् पाठादिभेदत एकविंशतित्व मापन्ना। तत्र चेदानीं माण्डूकेयानां शाङ्खायन्येवैका लुप्तावशिष्टा, शाकलाना माश्वलायनीति। अत एवाग्निपुराणे एतयोरेव द्वयोः शाखयोर्नामनिर्देशो विद्यते (२७१ अ० २ श्लो०)—

'भेदः शाङ्खायनश्चैक आश्वलायनो द्वितीयः'–इति।

अद्याप्येत एव द्वे शाखे विद्येते। तत्र चाद्या शाङ्खायनी, तस्ब्राह्मणारण्यकपुस्तकानि बहून्युपलभ्यन्ते, संहितायास्त्वेक सम्पूर्णं पुस्तकं सुदुर्लभम्! अथवास्माभिरद्यापि न दृसुवचम्। यच्चात्र आस्यायितिकसमित्यधिकृतगवर्णलये दृश्यतेऽनिर्दिष्टं खण्डितं पुस्तक मेकम्,

नून मनाश्वलायनीयम् ; तदन्ते बृहद्देवताग्रन्थवर्णितानां कुङ्कुमादिमहानाम्न्यन्तसूक्तानां विद्यमानत्वात् ; बृहद्देवताया ह्यशाकलीयत्वनिर्णयात्। द्वितीयाष्टकोऽपि स्यादनाश्वलायन्याः ; तदन्ताध्याये द्वादशवर्गादनन्तर मेको वर्ग आश्वलायनीतोऽधिक आम्नात इत्येव तस्यानाश्वलायनीत्वप्रतीतेः। उद्धृता चैतदीयैका ऋक् निरुक्ते (९. १. ५.) निगमखेनेति नास्ति च तद्वर्गस्य खैलिक्त्व मतः शाखान्तरीयत्व मेवोररीकर्त्तव्यम्। परन्त्वेतत्पुस्तकस्य तयोरेव द्वितीयाष्टमाष्टकयोः षोडशानां मेवाध्यायानां पुष्पिकासु 'महानाम्नीशाखायाम्'-इत्यादि लिखित मस्ति, परं नासीन्नास्ति च काचिन्महानाम्नीशाखा ; अतः किलेय मेव महानाम्न्यन्ता महानाम्नीति च व्यपदिष्टा शाखा, स्याच्छाङ्खायनीति सम्भाव्यते।

अष्टविकृतिविवृतौ पञ्चानां शाकलाना मन्यतमा यैका साङ्केति ज्ञायते, सैव साङ्खायनी शाङ्खायनी वेति मन्यते चरणव्यूहव्याख्यानक्रमहिदासः, तया च सम्पद्यते शाङ्खायन्या अपि शाकलत्वम्। तदिदं नादरणीयम् ; श्रुतिविरोधात्। श्रूयते हि कौषीतक्यारण्यके (१४ अ०)— "शाङ्खायनः कहोलात् कौषीतकेः", विद्याजन्मात्मवानिति तच्छेषः। तदेवं श्रुतिसिद्धस्य कौषीतकिवंश्यस्य शाङ्खायनस्य शाकल्यशिष्यत्वं कथन्नामोपपद्येतेति। न च साङ्खायनी नाम काचिच्छाखा मन्तव्या ; तत्रैवारण्यकेऽसङ्गच्छाङ्खायनीनामश्रुतेः। नापि महानाम्नान्तायाः शाङ्खायन्याः [illegible]रीयादिशाकलशाखापाठसाम्य मुपपद्यते ; "ऋग्वेदान्त्यो [illegible]कोऽनुवाकः"-इत्याद्यनुवाकानुक्रमण्युक्तेः। एव मृग्यनुक्रम[illegible]स्या अशाकलत्वं प्रतीयत एव। अत एव सत्स्वपि [illegible]नुक्रमण्यादिग्रन्थेषु शाङ्खायन्यर्थ मेव बृहद्देवतानाम-

ग्रन्थोऽप्यमायीत्यस्माक मभिमतम्। अत एव अस्माकतीयानां सज्ज्ञानसूक्तीयानां पञ्चाना मृचा मपि देवतानिरूपण मेवं कृतं बृहद्देवतायाम् (८अ० ९३श्लो०)—

"उशना वरुणश्चेन्द्रश्चाग्निश्च सविता स्मृताः।
सज्ज्ञानप्रथमस्यान्तु द्वितीयस्या मथाश्विनौ।
तृतीया चोत्तमे च द्वे आशिषोऽभिवदन्ति ताः"—इति।

तदेतत् पञ्चर्चं सज्ज्ञानसूक्तं शाकलासु शैशिरीयादिषु नाम्नातम्, अत एव सायणाचार्येणापि न व्याख्यातम्, अध्यापकस्यात्तमूलरेणैकस्मिन्नादर्शे दृष्ट मपि खैलिक मित्युपेक्षितञ्च (ऋ०वे० ६भा० पाठ० ३२पृ०)। वस्तुतो न चैतत् खैलिकम्; तैत्तिरीयाथर्वणयोर्ऋक्त्वेनाम्नानात् (तै० सं० २. ४. ४ ६; २. ६. १०. ३; ते० ब्रा० ३. ५. ११. १; तै० आर० १. ९. ७; अथ० सं० ७. ४२. १; ३. ८. ६.), निरुक्तेऽप्येतत्पञ्चम्या ऋचो निगमत्वेन ग्रहणाच्च। तथाहि— "अथापि संयुर्वार्हस्पत्य उच्यते, 'तच्छंयोरावृणीमहे × × ×'—इत्यपि निगमो भवति"—इति (४. ३. ५.)। सैषा ऋक् सज्ज्ञानसूक्तस्य पञ्चमी दृश्यते। तदेतत् सज्ज्ञानं नाम शाङ्खायन्या उपान्त्यं सूक्तम्, एतदनन्तर मेव तत्राम्नातं महानाम्नीसूक्तम्। अत एव शाङ्खायनसूत्रेऽस्य सूक्तस्य प्रतीक ग्रहणेनैव विधानं कृतम्। तथाहि— "सज्ज्ञान मुशनावदन्ति सूक्तं जपेरन्निति (३. ६. ३.)। इत इद मपि सम्भाव्यते— दृष्टं तदादर्शपुस्तकं पुस्तकांशो वा स्यात् शाङ्खायनसंहिताया

बाष्कलशाखाया मप्यस्ति सज्ज्ञानसूक्तम्, परं न
र्चम्, प्रत्युत पञ्चदशर्चम्; अपि नोपान्त्यम्, प्रत्युता
ल्यम्। बाष्कला तु शाकलाना मेवान्यतमा, शा

महानाम्नीसूक्तं नाम्नात मित्यत एवैतरेयारण्यके तत् समाम्नातम्; शाङ्खायनसंहितायास्तु महानाम्नीसूक्तान्नानेनैव समाप्तिरिति तत्पूर्वम्नातस्य सञ्ज्ञानसूक्तस्य संहितोपान्त्यत्व मेत देव बाष्कलशाङ्खायनसंहितयोः सञ्ज्ञानसूक्तसङ्ख्यावस्थानयोः पार्थक्य मिति ।

अथाग्निपुराणोक्ता द्वितीया आश्वलायनी तु शाकलाना मन्यतमेत्युक्तं पुरस्तात्, परिचाययिष्यामश्च ता मुपरिष्टादिति ॥

अथ शाकलाना माद्या शैशिरीया दशमण्डलात्मिकेत्यतो 'दाशतयी'-इति व्यपदिश्यते । तदुक्त मनुवाकानुक्रमण्याम्—

"पञ्चाशीतिर्दाशतयेऽनुवाका दृष्टाः पुराणैर्ऋषिभिर्महात्मभिः ।
यस्तान्वेद वेद चैवाप्यधीते स नाकपृष्ठं भजते ह शश्वत्"—इति ।

"दाशतये दशमण्डलयोगिनि वेदे । 'सङ्ख्याया अवयवे तयप्' (पा० ५. २. ४२.), ततः स्वार्थे अण्"—इति तद्व्याख्याने षड्गुरुशिष्यः । तदत्र मण्डलविभागे प्रतिमण्डल मनुवाकविभागो विद्यते, प्रत्यनुवाकञ्च सूक्तविभागः । तत्तदनुवाकसूक्तसङ्ख्या तत्र ३२—३६-श्लोकेषु निरूपिता । तथा चैवं सम्पद्यते—

म० १, २, ३, ४, ५, ६, ७, ८, ९, १० ।
अनु० २४-४—५—५—६—६—६—१०—७—१२=८५ ।
[० १९१-४३-६२-५८-८७-७५-१०४-९२-११४-१९१=१०१७।]

ज्ञायते चैतेन वालखिल्यानां सूक्तानां शैशिरीये समाम्नान मुक्त मिति । तानि च सूक्तानि एकादश सन्ति, तेषा मपीह [illegible] १०२८ स्युरिति स्पष्टम् ।

[illegible] शैशिरीया सम्प्रति नोपलभ्यते । पर मुपलभ्यते तु [illegible]नुक्रमण्यः शैशिरीया मवलम्बेव कृता इति ।

[illegible] उपक्रमे— "ऋग्वेदे शैशिरीयायाम्"—

इति उपसंहारे च— "तान् पारणे शाकले शैशिरीये"–इत्युक्तम्।

सायणीय मृग्भाष्यञ्च ता मवलम्ब्येव कृतं स्यात्; तत्रा शैशिरीयाणां वालखिल्यसूक्ताना मव्याख्यातत्वात्। अत एव ऐतरेयभाष्ये तेषां वालखिल्यानां क्वचित् खिलत्वेन, क्वचित् ग्रन्थान्तरीयत्वेन, क्वचिच्छाखान्तरीयत्वेन वर्णन मुपपद्यते सायणस्येति। तथाहि— "खिलेषु समाम्नातम्"–इति ६. ४. ९, "वालखिल्याख्ये ग्रन्थे समाम्नाताः"–इति ६. ५. २, "तानि वालखिल्यनामके ग्रन्थे समाम्नायन्ते"–इति ६. ४. ८, "सोऽयं प्रगाथः शाखान्तरे द्रष्टव्यः"–इति ३. २. ५। तदिदं वालखिल्यानां खिलत्वं नून ममङ्गतम्; तेषां पदपाठश्रवणात्; न हि खिलानां पदपाठः कृतः शाकल्येन;— अधीयतेऽध्याप्यते मुद्रितो मुद्रयते च वालखिल्यर्चाना मपि पदपाठः सर्वत्र। तदाह चरणव्यूहकृन्महिदासोऽपि— 'यस्य मन्त्रस्य पदाभावस्तस्य खैलिकत्वं सिद्धम्'–इति। ग्रन्थान्तरत्व मपि न सङ्गच्छते; सर्वेषा मेव वेदानां संहिता त्वेकैकैवेति कः सम्भवेत्ततोऽन्यो ग्रन्थ इति। शाखान्तरीयत्वकथनेन चाभिगम्यतेऽद्यप्रचलितेय माश्वलायनी शाखा नैव दृष्टा सायणेन, अपि तद्देशीया मन्या मेव शाखा मवलम्ब्य भाष्य मारचितम्, तस्यां नु शाखायां वालखिल्यं नाम्नात मिति तद्दृष्ट्यास्य शाखान्तरीयत्व मभ्युगन्तव्य मेवेति। वालखिल्यैकादशसूक्तेषु दशदशादिक्रमादशीत्यृचोऽधीयन्ते यथा— १–११ सू० १०–१०–१०–१०–८–८–५–५–४–३–७=८० ऋचः।

तदाह सर्वानुक्रमण्याम्— "अभि प्र दश प्रस्कण्वं प्रा
तत्, प्र सुश्रुतं पुष्टिगुः, यथा मनौ श्रुष्टिगुः, यथा मनावायुः
त्वाष्टौ मेध्यः, एतत्ते मातरिश्वा नो विश्व इति वैश्वदेव
भूरीत् पञ्च कृशः प्रस्कण्वस्य दानस्तुतिर्गायत्रं हृती

ष्टुभौ, प्रति ते पृषध्रोऽन्त्याग्निसौरी पङ्क्तिः, युवं देवा चतुष्कं मेध्य आश्विनं त्रैष्टुभम् ,०— ०, इमानि वां सप्त सुपर्ण ऐन्द्रावरुणं जागतम्"–इति ४४. ४९—५९। सर्वानुक्रमणीकारकात्यायनेनेव मुक्तत्वाच्चास्य वालखिल्यकाण्डस्य खैलिकत्वं विध्वस्तम्; न हि कस्यचिदपि खिलस्य ऋष्याद्यनुक्रमणं कृतं तेन, किञ्च पञ्चमाष्टकीयचतुर्थाध्यायीयत्वेनैव तत्र ग्रहणादस्याश्वलायनशाखीयत्वं व्यक्तम्, व्यक्तञ्च तदनुक्रमणिकाया अप्याश्वलायनशाखीयत्व मिति।

ऐतरेयब्राह्मणे त्वेषा मेकादशसूक्तानां प्रथमतोऽष्टाना मेव वालखिल्यनाम्ना विधान माम्नातम्, अन्त्यस्य तु सौपर्ण मिति (६. ४. ८, ९.)। इत्थ मपि ज्ञायते, तासां वालखिल्यर्चां सायणोक्तं खिलत्वं नून मवास्तवम्; नापि ग्रन्थान्तरतादरणीया, न हि ग्रन्थान्तरीयर्चां प्रतीकेन नाममात्रेण वा ग्रहणं युज्यतेऽत्रैतरेयके; शाखान्तरीयत्वं च वक्तुं नात्र शक्यते, सति हि तस्मिन् प्रपठ्यैव विधानं क्रियेतैतरेयेणेति। तथाप्यस्य शाखान्तरीयत्वेनोपन्यासाद्गभाष्यस्यैवास्य शाखान्तरीयत्वं प्रतिपन्नम्; न ह्याश्वलायन्यां वालखिल्याध्ययनं पश्यतोऽपि तद्भाष्यकारस्योक्तरूपप्रलापवचनानि सम्भाव्यन्ते।

एव मपि सायणाचार्येणावलम्बिता शैशिरीया, अन्या वा काचिच्छाकलशाखा स्यादाश्वलायन्यनुरूपैव प्रायः सर्वत इत्यत्र च न भवति संशयः; नान्यथात्र सायणीयभाष्ये सर्वानुक्रमणीवचनानि यथायथं सङ्गच्छेयुरिति।

अथ द्वितीया, बाष्कला। एतस्या अपि परिचयः शौनकीयाश्वलायनादिभ्योऽवगम्यते चैवम्— "उप प्र यन्तो (१. ७४.)"– प (१. ११६.)"– "अग्निं होतारम् (१. १२७.)"– (१. ९४.)"– "वेदिषदे (१. १४०.)"–इत्येष

क्रमो बाष्कलस्य प्रथममण्डले निदर्शितः। एव मपरमण्डलेष्वपि बोध्यम्। तद्यथा— "स्वादोरभक्षि (८. ४२.)"–इतिसूक्तादनन्तरम् "अभि प्र वः सुराधसम् (८. ४९.)"–"प्रसुश्रुतम् (८. ५०.)"–इति सूक्तद्वय माम्नाय "अग्न आ याह्यग्निभिः (८. ६०.)"–इत्यामातम्। एवं "गौर्ध्वयति"–इत्यनुवाको दशसूक्तात्मकः शैशिरीयायाम्, पञ्चदशसूक्तात्मको बाष्कलायाम्। तथाच "गौर्ध्वयति"–इतिसूक्तादनन्तरं "यथा मनौ सांवरणौ (८. ५०.)", "यथा मनौ विवस्वति (८. ५२.)", "उपमन्त्वा (८. ५३.)", "एतत्त इन्द्र (८. ५३. ९.)", "भूरीदिन्द्रस्य (८. ५४.)"–इति पञ्चसूक्तान्याम्नाय "आ त्वा गिरो रथीरिव (८. ९५. १)"–इत्यामातम्। एव मन्ते च मण्डले— "संसमित् (१०. १९१.)"–इतिसूक्तादनन्तरम् "सञ्जान मुशनावदत्"–इत्यादि, "तच्छंयोरावृणीमहे"–इत्यन्तं चतुर्वर्गात्मकं पञ्चदशर्च मेकसूक्त मधिकं बाष्कलायाम्। तदेवं "समानी वः (१. १९१. ४.)"–इति शैशिरीयाया अन्तिमा ऋक्, "तच्छंयोः"–इति तु बाष्कलाया इति भेदः।

तास्त्वेताः पञ्चदशर्चः—

"सञ्जान मुशना वदत् सञ्जानं वरुणो वदत्।
सञ्जान मिन्द्रश्चाग्निश्च सञ्जानं सविता वदत् ॥ १ ॥
सञ्जानं नः स्वेभ्यः सञ्जान मरणेभ्यः।
सञ्जान मश्विना युव मिहास्मासु नियच्छताम् ॥ २ ॥
यत् कक्षीवान् संवननः पुत्रो अङ्गिरसां भवेत्।
तेन नोऽद्य विश्वे देवाः सम्प्रियांस मजीजनन् ॥ ३
सं वो मनांसि जानतां समाकूतिर्मनामसि।
असौ यो विमना जनस्तं समावर्त्तयामसि ॥

नेर्हत्यं सेनादरणं परिवर्म तु यद्धविः ।
तेनामित्राणां बाहून् हविषा शोधयामसि ॥ ५ ॥
परिवर्म्मान्येषा मिन्द्रः पूषा च संश्रुतः ।
तेषां वो अग्निदग्धानामग्निमू∞ढानामिन्द्रो हन्तु वरं वरम् ॥ ६ ॥
एषु नत्यद्दषाजिनं हरिणस्य धियं यथा ।
परा७ अमित्रा७ ऐषत्वर्वाची गौरुपेजतु ॥ ७ ॥ २ वर्गः ॥
प्राध्वराणाम्पते वसो होतर्वरेण्य क्रतो । तुभ्यं गायत्र मुच्यते ॥ ८ ॥
गोकामो अन्नकामः प्रजाकाम उत कश्यपः ।
भूतं भविष्यत् प्रस्तौति बहु ब्रह्मैक मक्षरम् ॥ ९ ॥
यदक्षरं भूतक्रतो विश्वे देवा उपासते ।
महर्षिं मस्य गोप्तारं जमदग्नि मकुर्वत ॥ १० ॥
जमदग्निराप्यायते छन्दोभिश्चतुरुत्तरैः ॥ ११ ॥
राज्ञः सोमस्य भक्षेण ब्रह्मणा वीर्यावता ।
शिवा नः प्रदिशो दिशः सत्या नः प्रदिशो दिशः ॥ १२ ॥ ३ वर्गः ॥
अदो यत्तेजो दृदृशे शुक्रं ज्योतिः परो गुहा ।
तद्दृषिः कश्यपः स्तौति सत्यं ब्रह्म चराचरम् ॥ १३ ॥
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुष मगस्त्यस्य त्र्यायुषम् ।
यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम् ॥ १४ ॥
तक्षंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये ।
दैवीः स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः ॥ १५ ॥ ४ वर्गः ॥"–इति ।

अथ द्वतीया साङ्ख्या, चतुर्थी वाल्या । त एते सम्प्रति न क्वाप्यु-
अतएवैतयोः कोऽपि संवादोऽस्माभिर्न ज्ञायत इत्येव
थवा विष्णुभागवतपुराणयोर्यौक्ता मौद्गलीति, सैव स्यात्
पुराणयोः 'साङ्ख्या'–इत्यस्य स्थाने 'मौद्गली'–इत्यस्य

पाठप्रतीतेः सम्भाव्यते साङ्गाचार्यस्य मुद्गल इति गोत्रनामेति। अध्यापकम्याक्षमूलरेण च ऋग्वेदस्य तृतीयभागभूमिकाया १२ पृष्ठेऽलेखि एतत्— "फिट्स् एड्वाड् हल् महोदयः काशीतोऽलिखदिदम् (१५--१--५५.)— 'सायणाचार्यकृतभाष्यस्य मूल मादर्शपुस्तकं यदासीद् लण्डनस्थेण्डियापुस्तकालये मुद्गलभाष्यं नाम, तत्र प्रथमाद्याश्चयोऽष्टकाश्चतुर्थाष्टकस्यान्त्याध्यायाश्च त्रयः सन्ति, सन्ति चान्यानि कतिचित् पत्राणि प्रथमसप्तमाष्टकयोः। तदीय-प्रथमाष्टकस्य यावानंशः पाठयोग्यः, तावन्त मेव यथालिपि भवन्तं दर्शयामि। लिखितं चैतत् पुस्तकं १४७× संवत्समायाम्' —इति"—इति। तदेतत् पुस्तकं मौद्गल्याः शाखाया एव सायण-भाष्य मिति सुव्यक्तम्; परं नास्ति सायणस्य मुद्रितभाष्यादन्यद् भाष्य मिति शाकलानां पञ्चशाखानां मौद्गली मेवावलम्ब्य तेना-कारीदं भाष्य मिति सम्भवते सुतराम्। तथा चैषा मौद्गली दश-तयीत्यपि स्वीकार्यम्; सायणीयभाष्ये वालखिल्यमन्त्राणां व्याख्या-नादर्शनात्, अष्टतय्यां हि वालखिल्याना मवश्यभाविलं स्यादि-त्युक्तम्। सेयं मौद्गली शाखा सायणाचार्यसमये सायणाचार्यदेशे आसीत् सुप्रचलितेत्येना मेवावलम्ब्य तेनैतत् भाष्यं कृत मिति चोपपद्यते। अद्य च स्यात् तद्देशे मौद्गल्या एव शाखाया विद्यमानतेति च नासम्भवम्। अपि नाम शाकलानां पञ्चाना मेव प्रायो ग्रन्थपरिच्छेदसाम्यात्, क्रम-पाठादौ चात्यल्पतारतम्यात् सर्वपुस्तकपुष्पिकासु नामोल्लेखादर्शनाच्चैवं नामविभ्रमोऽपि एवेति मौद्गल्या आश्वलायनीत्वेन आश्वलायन्याश्च मौद्गलीत्वे सुसम्भाव्य मेवेति।

अथ शाकलानां पञ्चमी, आश्वलायनी नाम। [illegible]

शाखा शाकलानां पञ्चानां लुप्तावशिष्टा, अद्यापि सर्वत्राध्ययनाध्यापनैः सुप्रचलिता विद्यते । प्रवाद एवात्र प्रथमं प्रमाणम् ; सर्वत्रैव हि दाक्षिणात्यादिष्वेषा आश्वलायनीत्येव प्रोद्यते । प्रदर्शिताग्निपुराणवचने शाकलाना मस्या एवैकस्या ग्रहण मत्र द्वितीयं मानम् ; न हि तदानी मभ्यासीत् काचिदन्या शाकलेति । गौडराज-लक्ष्मणसेन-प्रदत्तेष्वनधिककालिकेषु ताम्रफलकेषु च "आश्वलायनशाखाध्यायिने"—इत्युत्कीर्णं दृश्यत इतीह तृतीयं प्रमाणम् । स्कन्दपुराणान्तर्गतश्रीमालखण्डनामग्रन्थस्य सप्ततितमेऽध्याये ऋग्वेदस्येय मेवैकाश्वलायनी शाखा बहुवार मुपन्यस्ता दृश्यते । तद्यथा— "तत्र आश्वलायनी शाखा ऋग्वेदस्य, यजुर्वेदस्य माध्यन्दिनी, सामवेदस्य कौथुमी, अथर्ववेदस्य स्वान्तरायणीति ; ऋग्वेदस्याश्वलायनसूत्रम् , यजुर्वेदस्य कात्यायनम्, सामवेदस्य लाट्यायनम् , अथर्ववेदस्यार्वटकञ्चेति"—इति । तदित्थं गुर्जरीयश्रीमालप्रदेशे बहुदिनत एव ऋग्वेदस्यैषाश्वलायनी शाखैवैकास्ति प्रचलितेत्यपि मानं भवेदिह चतुर्थम् । तस्मादेतर्हि सर्वत्राधीयमाना, मुद्रिता चेयं शाखा नून माश्वलायनीत्येव मन्तव्यम् ।

सेय माश्वलायनी तत्त्वतोऽष्टतय्येव ; सर्वेष्वेवैतत्पुस्तकेषु अष्टकाध्यायवर्गनामत्रिविधपरिच्छेदानां प्राधान्यदर्शनात् । एतदीयदेवर्षिच्छन्दोनिर्णयाय कात्यायनेन या "सर्वानुक्रमणी" प्रणीता, तत्रापि अष्टकाध्यायवर्गविभागानुसृता विभागा एव दृश्यन्ते । अत [illegible] षष्ठाष्टकीय-चतुर्थाध्यायस्य चतुर्दशाद्यष्टादशवर्गात्मकं वाल- [illegible]श्यते ; न हि दाशतय्यां वालखिल्यर्चां मस्तिताभ्युपगम्यते [illegible]र्णेति तु प्रतिपादितं पुरस्तादेव (१३४ पृ०)। एव [illegible]श्वशाखायाः शैशिरीयाया दशतयीत्वप्रतीतेः , एत-

त्पूर्वतनायाः शाकल्यसंहितायाश्च ऐतरेयेण यास्कादिना च दाशतयीत्वेन ग्रहणात्, शौनकोक्तानुवाकानुक्रमण्यादौ च दशतयीत्वस्यादरातिशयदर्शनात्, सर्ववेदभाष्यकारेण सायणाचार्येण च दाशतयीमेव साङ्ग्रापरपर्यायां मौद्गली मन्यां वा काञ्चिद् शाकलशाखा मनुसृत्य ऋक्संहिताया भाष्यं कृत मिति दशतय्यष्टतय्योः सम्मिलनाच्च दशतयीत्वानुकूला मण्डलानुवाकसूक्तेतित्रिविधपरिच्छेदा अपीह लेखकादिभिः सूचिता यथायथं सर्वत्रैवेति ॥

अथ पञ्चस्वेव शाकलशाखासु अध्यायादिपरिगणनञ्चैकविध मेव मन्यते प्रायः। अत एवैव माहानुवाकानुक्रमणीकारः—

"अध्यायानां चतुष्षष्ठिर्मण्डलानि दशैव तु।
वर्गाणान्तु सहस्रे द्वे सङ्ख्याते च षडुत्तरे।
सहस्र मेतत्सूक्तानां निश्चितं खैलिकैर्विना।
दश सप्त च पठ्यन्ते (सङ्ख्यातं वै पदक्रमम्)।"—इति।

तदेतत् सर्वं वालखिल्यवर्जनेनात्र गणनातोऽप्युपपद्यते। ऋक्सङ्ख्यायास्तु शाखापार्थक्यात् पार्थक्यं स्वीकार्य मेव, पर मस्या मेकस्या माश्वलायन्या मपि मतवैभिन्न मुपलभ्यते यथा—

अनुवाकानुक्रमण्याम् १०५८० ऋचां स्वीकारः, तदुक्तम्—

"ऋचां दशसहस्राणि ऋचां पञ्चशतानि च।
ऋचा मशीतिः पादश्च पारणं सम्प्रकीर्त्तितम्"—इति।

कदस्सङ्ख्यायान्तु १०४०२ ऋचां स्वीकारः, तदुक्तम्—

"एवं दशसहस्राणि शतानान्तु चतुष्टम्।
ऋचां द्व्यधिक माख्यात मृषिभिस्तत्त्वदर्शिभिः"—

मुद्रितसर्वानुक्रमण्या भूमिकायां १०४४२ ऋचां

अनुक्रमणीविवरणकृज्जगन्नाथेन त्वक्सङ्ख्या १०

आचार्यस्वामिदयानन्दसरस्वतिना तु "दशसहस्राणि पञ्चशतानि एकोननवतिश्च (१०५८९) ऋचोऽत्राम्नाता इति निर्द्धारितम् । अस्मत्परिगणनयात्वाश्वलायनसंहितायाम् १०५२२ ऋचो दृश्यन्ते । एव मृक्सङ्ख्याया मतपार्थक्ये निदानानि त्वेव मवगम्यन्तेऽस्माभिः— अनुवाकानुक्रमणी नूनं शैशिरीय-शाखायाः ! नास्ति च तत्र बाल-खिल्याना मृचा माम्नानम् , तथापि तत्र वालखिल्यभिन्नाः सपादाः १०५८० ऋचः परिगणिताः । अस्मत्परिगणनया त्वत्र वाल-खिल्यसहिताः १०५२२ ऋचः सन्ति, वालखिल्याना मृचां सङ्ख्या तु ८० ; तया चात्र आश्वलायनसंहितायां वालखिल्यातिरिक्ताना मृचां सङ्ख्या १०४४२ सम्मता । तदित्थं शैशिरीयाया मित आश्वलायनीतोऽधिकाः १३८ ऋचोऽधीता इत्येव निश्चीयते ।

छन्दस्सङ्ख्योल्लिखितोक्तसर्वसङ्कलनसङ्ख्या तु स्वोक्तप्रतिच्छन्दस्सङ्ख्या-तोऽपि विरुद्धैव प्रतीयते । तद्यथा तत्र चोक्तं श्लोकैः— गायत्र्यः २४५१, उष्णिहः ३४१, अनुष्टुभः ८५५, बृहत्यः १८१, पङ्क्तयः ३१२, त्रिष्टुभः ४२५३, जगत्यः १३४८, अतिजगत्यः १७, शक्वर्य्यः ९, अतिशक्वर्य्यः ९, अष्टयः ६, अत्यष्टयः ८४, धृत्यौ २, अतिधृतिः १, द्विपदाः १७, एकपदाः ६, बार्हतप्रगाथाः १९४, ककुप्प्रगाथाः ५५, महाबार्हतप्रगाथः १ । तदेवं तदुक्तप्रतिच्छन्दस्सङ्ख्यानां सङ्कलनया १०१४२ ऋचः स्युः, पूर्वप्रदर्शितत्च्छ्लोकतस्तु गम्यन्ते १०४०२ । अत्र प्रायः सर्वत्रैव सङ्कलनाभ्रमोऽस्माभिर्ग्रन्थदृश्या प्रमाणित एव ।

मुद्रितसर्वानुक्रमणीभूमिकायां यत् १०४४२ इति निश्चितम् ,
वालखिल्यव्यतिरिक्ताया: आश्वलायन्या इति तु सुव्यक्तम् ।
पण्डितोक्ता ऋक्सङ्ख्या तु नित्यद्विपदार्ङ्चादिभेदकृता ।
महिदाससम्मता च सैव । तथाचोक्तं तेन—

"वालखिल्यसहिता सर्वानुक्रमणीमन्त्ररूपर्क्सङ्ख्या उच्यते,—द्विपञ्चाशदधिकपञ्चशतदशसहस्राणीति (१०५५२)। एतत्सङ्ख्या नित्यद्विपदानैमित्तिकद्विपदासहितोक्ता। हवनाध्ययनाभ्यां समाना सा नित्यद्विपदा,०—०, हवनाध्ययने विपरीता सा नैमित्तिकद्विपदा"—इत्यादि। नित्यद्विपदादिनिर्णयस्तु उपलेखग्रन्थालोचनतः सम्भाव्यः। उपलेखापि नैवाश्वलायन्याः सम्भाव्यते; तत्र नित्यैकपदाः पञ्चेत्याद्याश्वलायनीविरुद्धपरिगणनादर्शनात्; गण्यन्ते ह्यत्राश्वलायन्या मेकपदाः षडिति। एव मर्चादिष्वपि द्रष्टव्यम्।

स्वाम्युक्तपरिगणनेऽपि सङ्कलनभ्रमः प्रतीयते।

तत्त्वतस्त्विहाश्वलायन्यां शाखाया माश्वलायनसंहितायां वा अष्टादशवर्गेषु अशीतिर्वालखिल्यर्चः सन्ति, तद्वालखिल्यसहिताः १०५२२ ऋचः भूयन्त इति त्वद्भिः सुनिश्चित मिति॥

अथासां शाखानां कतमा मवलम्ब्यैद मैतरेयकं प्रोक्त मिति विचारस्यैतर्हि प्रकृतोऽवसरः समुपस्थितः। दृश्यते हि ब्राह्मणग्रन्थेष्वेषा शैली,— यां शाखा मवलम्ब्याम्नायते यद् ब्राह्मणम्, तत्संहितायां ये मन्त्रा आम्नाताः, तेषां प्रतीकग्रहणमात्रेण नामग्रहणमात्रेण वा विधानम्; ये मन्त्रा विधातव्या अप्यन्यशाखीया इति तत्संहितायां न दृश्यन्ते, तेषान्तु प्रपठ्य विधान मिति। तत्र प्रतीकमात्रेण यथा— "त्व मग्ने सप्तथा असि, सोम यास्ते मयोभुव इत्याज्यभागयोः पुरोऽनुवाक्ये"—इति ऐ० ब्रा० १. १. ४ आम्नातौ चैतौ मन्त्रावाश्वलायन्या मस्याम् ५. १३. ४, पुन ८१. ८। नामग्रहणमात्रेण यथा— "सुकीर्त्तिं शंसति पुनस्तदुत्तरत्र, "वृषाकपिं शंसति"—इति च ऐ० ब्रा० सुकीर्त्तिनाम सप्तर्चं सूक्तम्, वृषाकपिनाम त्रयोद

श्वलायन्याम् १०. १३१ ; १०. ८६ । अनाम्नाताया: प्रपठ्य विधानं यथा— "यस्माद् भीषा निषीदसि ततो नो अभयं कृधि । पशून् न: सर्वान् गोपाय नमो रुद्राय मीळ्हुष इति तामुत्थापयेत्"–इति ऐ० ब्रा० ५. ५. २ । न ह्येषा ऋगिहाश्वलायन्या माम्नाता ।

तदेव मिद मैतरेयक मेतदाश्वलायन्या ब्राह्मण मिति वक्तुं युज्येत, यदि नामैतद्व्यतिक्रमोऽप्यत्र न प्रतीयेत ! प्रतीयते ह्येतद्व्यतिक्रमोऽपि । तद्यथेहानाम्नातानां मपि मन्त्राणां प्रतीकग्रहणमात्रेण विधानम्— "अग्निर्मुखं प्रथमो देवतानाम् , अग्निश्च विष्णो तप उत्तमं महः इत्याग्नावैष्णवस्य हविषो याज्यानुवाक्ये भवत:"–इति ऐ० ब्रा० १. १. ४, तथा "सावीर्हि देव प्रथमाय पित्र इति सावित्री मन्वाह"–इति १. ५. ४ । नैते मन्त्रा इहाश्वलायन्या माम्नाता: । तद्यदेतस्या आश्वलायन्या एतद् ब्राह्मणं स्यात् , तर्ह्येषां मन्त्राणां नूनं प्रपठ्य विधानं दृश्येत । एव मिहानाम्नातानां मपि मन्त्राणां नामग्रहणमात्रेण विधान मस्ति यथा— "तिस्र: सामिधेनीरनूच्य तिस्रो देवता यजन्ति"–इति ऐ० ब्रा० ३. ५. १ । ता एतास्तिस्र: सामिधेन्य ऋचोऽत्राश्वलायन्यां न दृश्यन्ते । तथात्राश्वलायन्या माम्नातानां मपि प्रपठ्य विधानं कृत मैतरेयेण । तद्यथा— "इन्द्राग्नी आगतं सुतं, गीर्भिर्नभो वरेण्यम् , अस्य पातं धियेषितेत्यैन्द्राग्न मध्वर्युर्ग्रहं गृह्णाति"–इति ऐ० ब्रा० ७. २. ७ । आम्नातैवैषा आश्वलायन्याम् ३. १२. १ ।

अस्ति च ऋक्परिशिष्टो नामैको ग्रन्थ: । तदीयर्ङ्मन्त्रा अपि ब्राह्मणे नामग्रहणमात्रेण विहिता: श्रूयन्ते । तद्यथा— शंसति", "आजिङ्गासेन्या: शंसति", "अतिवादं च ऐ० ब्रा० ६. ५. ७ । परिशिष्टग्रन्थीयश्रुतमन्त्रेभ्यो-

ऽप्यधिकमन्त्राणां विधानञ्चेह श्रूयते यथा – "आहनस्याः शंसति ०—० ता दश शंसति"–इति ६. ५. १०। ऋक्परिशिष्टे खल्वाहनस्यानामर्चोऽष्टावेव श्रूयन्ते, इह तु दशानां विधान मान्नातम्।

तस्मादेतद् ब्राह्मणं नाश्वलायन्याः सम्भाव्यते, सम्भाव्यते तु यस्यां शाखायां प्रतीकतो नामतो वा एतद्ब्राह्मणविहितानां सर्वासामेवर्चां मस्ति विद्यमानता, नास्ति चेह पठितानाम्, अपि चेह विहिता ऋक्परिशिष्टग्रन्थीयाश्चर्चो यथावत् समाम्नाताः, तस्याः शाखाया एवेदं स्यादिति। तथाविधा कतमेति प्रश्नस्योत्तरं तु विलुप्तपूर्वशाखाकालिकाना मद्यतनाना मस्माकं नैव सुकरम्, तथाप्यत्र यावच्छक्यं प्रयतिते गम्यते,— शाकल्यशिष्येण शाकलाचार्येण या संहिताधीताध्यापिता च, या मधीत्यैव शिशिरादयः शाखाप्रवक्तोऽभवन्, शिशिरवाष्कलसाङ्ग्रवात्याश्वलायनाधीता, अप्यद्यप्रचलितशाकलाश्वलायनशाखातः पूर्वतना, सैव शाखा स्यादस्यैतरेयब्राह्मणस्यावलम्बन मिति। अत एवैतरेयारण्यकभाष्ये "त्रयं त्वेव न एतत् प्रोक्तम्'–इत्येतस्य व्याख्यान मेव मुक्तं सायणाचार्येण—"नः अस्मान् (महिदासादिकान्) शिष्यान् प्रति शाकल्येन प्राणऊष्मरूप मित्यादि त्रय मेव प्रोक्तम्, न तु मांस मित्यादिकं चतुर्थम्"–इति (३. २. २.)। इत्थ मस्य ब्राह्मणस्य मैत्रिरीयादिभ्यः पञ्चभ्यः प्राक्तनत्वेऽपि शाकलशाखोपयोगित्व मव्याहतं स्पष्टम्। तस्मात् मैत्रिरीयाद्याश्वलायन्यन्तानां पञ्चाना मेव शाखाना मिदमेकं ब्राह्मण मैतरेयकं नामेति च सिद्धम्॥

———

(७)

अथेदानीं विचार्यं मस्ति कोऽस्य विषय इति। यज्ञ एवास्य विषय इति ब्रूमः ; प्रायः सर्वेषा मेव ब्राह्मणग्रन्थानां तत्रैव प्रवृत्तेः। यज्ञस्वरूपन्त्वेवं निरूपितं भगवता कात्यायनेन— "यज्ञं व्याख्यास्यामः। द्रव्यं देवता त्यागः"–इति (श्रौ० सू० १. २. १, २.)। यज्ञस्वरूपं कथयिष्याम इति प्रथमसूत्रार्थः। 'द्रव्यं' पुरोडाश-चरु-सान्नाय्य-पशु-सोमादिकम्, 'देवता' अग्निविष्णुसोमेन्द्रादिकाः, देवता मुद्दिश्य पुरोडाशादिद्रव्यस्य यः 'त्यागः' उत्सर्गः, स यज्ञः। तत्र "तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन चेष्यते। देवतासङ्गतिस्तत्र दुर्बलन्तु परम्परम्"–इत्याहुर्याज्ञिकाः। तद्धितेन देवतासङ्गतिर्यथेह-- "अष्टाकपाल आग्नेयः, त्रिकपालो वैष्णवः"–इति १. १. १। चतुर्थ्या देवतासङ्गतिर्यथेह— "अग्नये प्रणीयमानाय"–इत्यादि १. ५. २, "सोमाय क्रीताय प्रोक्ष्यमाणाय"–इत्यादि च १. ३. २। मन्त्रवर्णेन देवतासङ्गतिर्यथेह प्रयाजयागेषु (१. ३. ६.)। तदत्र द्रव्याणि प्रसिद्धानि, मन्त्रलक्षणानि निरुक्तालोचने प्रदर्शितानि, देवतास्वरूपाणि त्विहैवानुपदं यथामति बोधयिष्यामः॥

अथ यागलक्षणभेदादीनप्यत्र किञ्चित् सूचयामः। स एव यागः प्रक्षेपाधिको होम उच्यते। "देवतायै सङ्कल्पितस्य वह्नौ प्रक्षेपो होमः"–इति हि तल्लक्षणं साम्प्रदायिकम्। आह चात्र यायनः— "यजतिजुहोतीनां को विशेषः ? तिष्ठद्धोमा वषट्-ना याज्यापुरोऽनुवाक्यावन्तो यजतयः, उपविष्टहोमाः स्वाहा-जुहोतयः"–इति (१. २. ५, ६, ७.)। तदेवं यागस्य द्विविध मपि चैतद् यागकर्म प्रधानाङ्गभेदात् पुनर्द्वि-

विधम् । तद्यथा— ये च यागा यदाग्नेयोऽष्टाकपाल इत्यादिवाक्यैः दर्शपूर्णमाससंयोगेनोत्पन्नाः, ते दर्शपूर्णमासशब्दवाच्याः । तेषा मेव "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत"–इति फलसाधनत्वेन विधानात् प्रधानत्वम् , तत्प्रकरणपठित मितरत् सर्व मग्न्यन्वाधानादि ब्राह्मणतर्पणान्तं तदङ्गजातम् ; फलश्रुतिशून्याः प्रयाजादियागाः पूर्वाधारादिहोमाश्च तत्प्रकरणपठितास्तदुपकारका इति तदङ्गभाजना एव । तदुक्त मापस्तम्बर्षिणा यज्ञपरिभाषायाम्— "आग्नेयोऽष्टाकपालोऽग्नीषोमीय एकादशकपाल उपांशुयागश्च पौर्णमास्यां प्रधानानि, तदङ्ग मितरे होमाः"–इति ७७, ७८ सूत्रे । "सहाङ्गं प्रधानम्"–इति (८६ सू०) च तत्रैव प्रधानलक्षणम् ।

ते यागाः पुनस्त्रिविधाः ; इष्टि-हौत्र-सोमभेदात् । दर्शपूर्णमासादय इष्टयः, अग्न्याधेयाग्निहोत्रादयो हौत्राः, अग्निष्टोमात्यग्निष्टोमादयः सोमाः । ते पुनस्त्रिसप्तकाः ; हविः-पाक-सोमसंस्थाभेदात् । तत्र अग्न्याधेयः, अग्निहोत्रम् , दर्शः, पौर्णमासः, आग्रयणम् , चातुर्मास्यम् , पशुबन्धश्चेति सप्त हविःसंस्थाः । सायंहोमः, प्रातर्होमः, स्थालीपाकः, नवयज्ञः, वैश्वदेवः , पित्र्ययज्ञः , अष्टकेति सप्त पाकसंस्थाः । अग्निष्टोमः , अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्याम इति सप्त सोमसंस्थाः । त एव सोमयागाः पुनरेकाहाहीनसत्रभेदात् त्रिविधा भवन्ति । एतद्व्यतिरिक्ता अप्यन्ये बहवः सन्ति काम्ययागाः । तद्यथेष्टयः आयुष्कामेष्टिः, पुत्रेष्टिः, पवित्रेष्टिः, वर्षकामेष्टिः, प्राजापत्येष्टिः, वैश्वानरेष्टिः, नवशस्येष्टिः, ऋत्वेष्टि गोष्टतीष्टिः प[illegible] गोमेधाश्वमेधादयस्तु पशुयागा उच्यन्ते , ते तु [illegible] सौत्रामणी यागोऽपि सोमविकार एव ।

अस्ति चेषु यागेषु प्रकृतिविकृतिभेदः । यस्मिन् यागेऽपरविधिनिरपेक्षाणां सर्वेषा मेव कर्मणा मुपदेशः श्रुतः, स एव प्रकृतियागः ; प्रकृतिवच्च विकृतिः कर्त्तव्या भवति । अत्राह आपस्तम्बः— "दर्शपूर्णमासाविष्टीनां प्रकृतिः, अग्नीषोमीयस्य च पशोः, स सवनीयस्य, सवनीय ऐकादशिनानाम् , ऐकादशिनः पशुगणानाम् , वैश्वदेवं वरुणप्रघास-साकमेध-शुनासीरीयाणाम् , वैश्वदेविक एककपाल एककपालानाम् , वैश्वदेव्यामिक्षामिक्षाणाम् , ०—०, अग्निष्टोम एकाहानां प्रकृतिः, द्वादशाहो ऽहर्गणानाम् , गवामयनं सांवत्सरिकाणाम् , निकायिनान्तु प्रथमः"—इति (य० प० सू० ११६—१४४ सूत्राणि)। एषु सर्वेष्वेव सूत्रेषु प्रकृतिरित्यनुवर्त्तत इति बोध्यम् ॥

देवता । सर्वेष्वेतेषु यागेष्वङ्गयागेषु च यत्र कुत्रचित् यस्य कस्यचित् द्रव्यादेः प्रार्थनीयफलदानसामर्थ्य मारोपयन् यां कां च स्तुतिं करोति, तत्स्तुतिमन्त्रस्य मेव देवता, तादृशस्तुतिमन्त्रप्रधानः स च यागस्तद्देवतो मन्यते । तदाह निरुक्तकारो भगवान् यास्कः— "यत्काम ऋषिर्यस्यां देवताया मार्थपत्य मिच्छन् स्तुतिं प्रयुङ्क्ते, तद्देवतः स मन्त्रो भवति"—इति (निरु० ७. १. १.), "यो देवः सा देवता"—इति च (७. ४. २.)। "देवो दानाद्वा, दीपनाद्वा , द्योतनाद्वा, द्युस्थानो भवतीति वा"—इति देवशब्दर्वचनञ्च तत्रैव । तदेव मिन्द्रवायुादीना मचेतनानां हव्यादिदान- , याजावरराजादीनां चेतनानां चार्थादिदानहेतुकं देव- ादिजीवाना मजीवानाञ्च ग्रावादीनां दीप्तिहेतुकं देव- न्द्रनक्षत्रादीनां ब्रह्मवर्चस्विनां विदुषाञ्च द्योतनहेतुकं रादीनां तल्लोकस्थानां तारकादीनाञ्च द्युस्थत्व-

निबन्धनं देवत्वम् ; यत्र त्वीश्वरे सर्व एवेते गुणा उपपद्यन्ते, तस्य देवत्वस्य तु कैव कथा । तदेव ब्रह्मस्तम्बपर्यन्तानां सर्वेषा मेव पदार्थानां देवत्व मुपगम्यते । द्युस्थत्वे सति दानादिगुणवत्त्व मिद मेक मेव देवलक्षणं स्वीकार्य मिति मते तु सूर्येन्द्राग्न्यनिलेन्दुप्रभृतीनां मूलतो द्युस्थानाना मेव पदार्थानां मुख्यं देवत्वम्, तत्तत्स्थानभक्तिसाहचर्यतस्त्वन्येषां भूरादिलोकस्थानां तत्रत्याना मग्नसोमौषध्यादीना मपीत्येव विशेषः ।

अन्यच्चोक्तं यास्केन—"तिस्र एव देवता इति नैरुक्ताः । अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानः"—इति (७. २. १.), "तासां (तिसृणां देवतानां) भक्तिसाहचर्यं व्याख्यास्यामः । अथैतान्यग्निभक्तीनि— अयं लोकः०—० ये च देवगणाः समाम्नाताः प्रथमे स्थाने"—इत्यादि (७. ३. १.) च । तानि च प्रथमे स्थाने समाम्नातानां देवानां नामानि निघण्टावाम्नातानि "अग्नः शकुनिः मण्डूकाः"—इत्यादीनि (५. ३. १—३६.) षट्त्रिंशत् द्रष्टव्यानि । व्याख्याताश्च ता देवता निरुक्ते समन्वोदाहरणम्— "अथ यानि पृथिव्यायतनानि स्तुतिं लभन्ते, तान्यतोऽनुक्रमिष्यामः । तेषा मग्नः प्रथमागामी भवति"—इत्यादिना (८. १—४३.) । एवम् "अथैतानीन्द्रभक्तीनि— अन्तरिक्षलोकः०—० ये च देवगणाः समाम्नाता मध्यमे स्थाने"—इत्यादि चोक्तं तत्र तदुत्तरम् (७. ३. २.) । मध्यमे स्थाने समाम्नातानां देवानां नामानि च तत्रैव निघण्टौ— "श्येनः सोमः चन्द्रमाः"—इत्यादीनि षट्त्रिंशत् (५. ५. ३६.) । व्याख्याताश्च ता अपि देवता निरुक्ते समन्वोदाह "श्येनो व्याख्यातस्तस्यैषा भवति"—इत्यादिना (११. एवम् "अथैतान्यादित्यभक्तीनि – असौ लोकः

गणाः समाम्नाता उत्तमे स्थाने"–इत्यादि चोक्तं तत उत्तरम् (७. ३. ४.)। उत्तमे स्थाने समाम्नातानां देवानां नामान्यपि तत्रैव निघण्टौ— "अश्विनौ उषाः सूर्या"–इत्यादीनि एकत्रिंशत्पदान्याम्नातानि (५. ६. १—३१.)। व्याख्याताश्च ता अपि देवता निरुक्ते समन्वोदाहरण मेव— "अथातो द्युस्थाना देवतास्तासा मश्विनौ प्रथमागामिनौ भवतः"–इत्यादिना (१२. १—४६.)। तदेवं प्रधानतो देवतात्रित्वेऽपि स्थानभक्त्यादितो तद्बहुत्वं च न विरुद्धम्। तत एवेद मुक्तं तत्र तेनैव— "तासां (तिसृणां देवतानां) माहाभाग्यादेकैकस्या अपि बह्वनि नामधेयानि"–इति (७. २. १.)। भागो विभागो भक्तिश्चैकार्थाः। महाभागस्य भावो माहाभाग्यम्। तच्च माहाभाग्यम् एकस्थानभाक्तेन, एकस्मिन् मन्त्रे साहचर्यतयाम्नातत्वेन, एककर्मभाक्तेन, एकवाच्यभाक्तेन च भवति। तस्मान्माहाभाग्यादेव देवबहुत्वं स्वीकार्यमिति तदर्थः। तदित्थ माब्रह्मस्तम्बपर्यन्तानां सर्वेषा मेव पदार्थानां पारिभाषिकं देवत्व मभ्युगत्यैव "यत्काम ऋषिर्यस्यां देवताया मर्थपत्व मिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति"–इत्युक्त (निरु० ७.१. १.) मिति फलितम्। तस्मात् वैदिकमन्त्रेषु स्तुता एव पदार्थाः तन्मन्त्रतः स्तुतिकाले एव च देवत्वेन स्तुत्या भवन्ति; नान्ये नाप्यन्यत्रेत्येव याज्ञिकसिद्धान्तः। अत एव ते मन्त्रमयी देवतेत्येव स्वीकुर्वन्तीति च प्रवादः।

तत्रापि प्रधानतस्त्रयस्त्रिंशदेव देवताः सर्वसंहितासु परिगणय[illegible]। तद्यथा— "ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन्। [illegible]तासनन्"–इति ऋ० सं० ८. २८.१। "त्रयस्त्रिंश[illegible]न्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीत्"–इति

वा० सं० १४. ३१। "यस्य त्रयस्त्रिंशद्देवा निधिं रक्षन्ति सर्वदा। निधिं त मद्य को वेद यं देवा अभिरक्षथ"–इति अथ० सं० १०. २३. ४. २३। ब्राह्मणेषु च प्रायः सर्वेष्वेवैव मेव।

तथा चास्मिंश्च ब्राह्मणे देवानां त्रयस्त्रिंशत्सङ्ख्याकत्व मसकृदाम्नातम्। तद्यथा— "त्रयस्त्रिंशद्वै देवा अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च"–इति (३. २. ११.)। एव मप्येतदतिरिक्ता अपि देवताः समाम्नाताः। तद्यथैवैव प्रायणीयेष्यारम्भे (१. २. १.)— "पथ्यां यजति", "अग्निं यजति", "सोमं यजति", "सवितारं यजति", "उत्तमा मदितिं यजति"–इति। तदत्राग्निभिन्नाः सर्वा एव तास्त्रयस्त्रिंशद्गणोऽतिरिक्ताः श्रुताः; अथ सवितुरादित्यविशेषत्वेन त्रयस्त्रिंशान्तःपातित्वस्वीकारेऽप्यन्यासां तिसृणां तदतिरिक्तत्व मपरिहार्य्यम्। अत एव निघण्टौ दैवते काण्डे वस्वादिभिन्ना अपि बह्वयो देवता आम्नाताः। प्रदर्शितत्रयस्त्रिंशद्गणनन्तु सोमप-पर मित्येव। तदाहैवैतरेये— "त्रयस्त्रिंशद्वै देवाः सोमपास्त्रयस्त्रिंशदसोमपाः। अष्टौ वसवः, एकादश रुद्राः, द्वादशादित्याः, प्रजापतिश्च, वषट्कारश्च; एते देवाः सोमपाः। एकादश प्रयाजाः, एकादशानुयाजाः, एकादशोपयाजाः; एतेऽसोमपाः पशुभाजनाः। सोमेन सोमपान् प्रीणाति, पशुनाऽसोमपान्" इति २. २. ८। एवं शतपथादिष्वपि द्रष्टव्यम्।

तदत्र पूर्वं सोमपानां त्रयस्त्रिंशत्सङ्ख्यानां देवानां परिचयाय किञ्चिद् यतामहे।— 'वसवः'–इति पदं निघण्टौ नामसु पठितम् (१. ५. १०.), पुनः द्युस्थानदेवनाम[illegible] ६. २८.)। निरुक्तकारस्त्वस्य वसुशब्दस्य निर्वचनमि[illegible] रोत्— "वसवः। यद् विवसते सर्वम्। अग्नि[illegible]

समाख्या ; तस्मात् पृथिवीस्थानाः"–इत्यादि , "इन्द्रो वसुभिर्वा-सव इति समाख्या ; तस्मान्मध्यमस्थानाः"–इत्यादि , "वसवः = आदित्यरश्मयः, विवासनात् ; तस्माद् द्युस्थानाः"–इत्यादि च (१२. ४. ७, ८, ९.)। तदेवं निरुक्तमते पार्थिवाग्निशिखाः, वैद्युताग्निप्रभाः, उक्तमाग्निरश्मयश्चेति तमोविवासनहेतवस्त्रि-स्थानास्त्रिविधा वसवो निर्णीताः, तत्तत्र तत्तन्निगममन्त्रान्वान-प्रदर्शनादिभ्यः। तदेतत् सर्वं तत्तन्निरुक्तयन्यत एवावगन्तव्यम्। शतपथश्रुतितोऽपि वसूनां त्रिस्थानत्वादिक मेवावगम्यते, परं तत्त्व-परत्वैव। तथाहि— "कतमे वसव इति। अग्निश्च पृथिवी च, वायुश्चान्तरिक्षञ्च, आदित्यश्च द्यौश्च, चन्द्रमाश्च नक्षत्राणि चैते वसवः ; एतेषु हीदं सर्वं वसुहित मेते हीदं सर्वं वासयन्ते ; तद्यदिदं सर्वं वासयन्ते तस्माद् वसव इति"–इति (१४. ५. ७. ४.)। एव मपि "स गायत्री मेवाग्नये वसुभ्यः प्रातस्सवनेऽभजत्"–इत्यादिश्रुतिषु (ऐ० ब्रा० ३. २. २.) वसूनां गायत्रीच्छन्दोभागित्वकल्पनात् , अग्निना सहान्नानात् , प्रातस्सवनदेवत्वेनोपन्यासाच्च पार्थिवं स्थान मेव प्रधानं बुध्यते। तैत्तिरीयारण्यके तु वसूनां पार्थिवाग्निस्वरूपत्वं स्पष्ट मान्नातम्— "अग्निश्च जातवेदाश्च सहौजा अजिराः प्रभुः। वैश्वानरो नर्यपाश्च पङ्क्तिराधाश्च सप्तमः। विसर्प्येवाष्टमोऽग्नीना मेतेऽष्टौ वसवः क्षितौ"–इति (१. ९. १.)। स्यादेवम् "अप्येते न्तरे (मध्यमोत्तमे) ज्योतिषी अग्नी उच्येते"–इति (७. ४. ३.) -सिद्धान्तात् अग्निविशेषाणां वसुदेवानां त्रिस्थानत्व मप्यव्या-नक्षतस्त्वष्टौ वसवो ऽष्टविधा अग्नय इत्येव सारम्। इति पदं निघण्टौ माध्यमिकदेवनामसु पठितम् (५. चैषा मन्तरिक्षस्थत्वेन वायुभक्तित्व मवगम्यते।

तन्निर्वचनादिकन्त्वेव मवादि यास्केन – "रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा। यदरुरुदत् तद्रुद्रस्य रुद्रत्व मिति काठकम्। यदरोदीत् तद्रुद्रस्य रुद्रत्व मिति हारिद्रविकम्" –इत्यादि (१०. १. ५.)। एतेन च रुद्राणां वायुविशेषत्व मेव प्रतीयते। ततस्तेनेव तदुत्तरमुक्तेन "अग्निरपि रुद्र उच्यते" –इत्यादिना (१०. १. ७.) रुद्रस्याग्निविशेषत्वे निर्दीतेऽपि माध्यमिकत्वाद् वायुभक्तित्वं न विरुद्धम्; विद्युदग्नेर्हिआन्तरिक्ष्या-न्माध्यमिकत्वम्, तस्माद् वायुसभागत्वं [illegible] सुव्यक्तम्। ऐतरेये-ऽप्यत्र "(सः) त्रिष्टुभ मिन्द्राय रुद्रेभ्यो [illegible] प्रन्दिने (व्यभजत्)" –इति श्रुतौ (३. २. ३.) रुद्राणां त्रिष्टुप्छन्दोभागित्वकल्पनात्, इन्द्रेण सहाम्नानात्, माध्यन्दिनसवनदेवत्वेनोपन्यासाच्चान्तरिक्ष-स्थानत्व मेव बुध्यते। शतपथेऽपि रुद्रा वायुविशेषा एव विश्रुताः, परं त्वन्यथैव। तद्यथा— "कतमे रुद्रा इति, दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्मान्मर्त्याच्छरीरादुत्क्रामन्त्यथ रोदयन्ति; तद्यद्रोदयन्ति तस्माद् रुद्रा इति (१४. ५प्र. ७. ५.)। अथात्र तैत्तिरीयारण्यकम्— "अथ वायोरेकादश । ०—० । प्रभ्राज-माना व्यवदाता याश्च वासुकि-वैद्युताः। रजताः पुरुषाः श्यामाः कपिला अतिलोहिताः। ऊर्ध्वा अवपतन्ताश्च वैद्युत इत्येकादश" –इति (१. ९. ४.)। तदित्थं विद्युत्संश्लिष्टाः स्फूर्जथुनिदान-रूपा आन्तरिक्ष्या वायुविशेषाः तथाविधवायुसंश्लिष्टा विद्युदग्नयो वा रुद्राः, स्फूर्जथुश्च तेषां रोदन मिति निश्चितम्।

'आदित्याः'–इति पदं निघण्टौ द्युस्थानदेवतासु पठि[illegible] ६. २४.)। तथा चैषां द्युस्थत्वेन सूर्यभक्तित्व मवग[illegible] र्वचनादिकन्त्वेव मवादि यास्केन— "आदित्यः [illegible]

रसान्, आदत्ते भासं ज्योतिषाम्, आदीप्तो भासा इति वा, अदितेः पुत्र इति वा"–इति (२. ४. १.), "अथातो द्युस्थाना देवगणास्तेषा मादित्याः प्रथमागामिनो भवन्ति"–इत्यादि च (१२. ४. १.)। तदेतेन तेषा मादित्यानां सूर्यविशेषत्वं द्युस्थानत्वं चावगम्यते। "आदित्येभ्यस्तृतीयसवने"–इत्यादिश्च (३. २. २.) अत्र ऐतरेय-स्मृतिः; तदेतत्तृतीयसवनभाक्त्वेन चादित्यानां द्युस्थानत्व मेव बुध्यते। श्रूयतेऽप्येवं शतपथे— "कतम आदित्या इति, द्वादश मासाः संवत्सरस्येत आदित्याः; एते हीदं सर्वं माददाना यन्ति। तद्यदिदं सर्वं माददाना यन्ति, तस्मादादित्या इति"–इति (१४. ५प्र० ७. ६.)। तदित्थ मादित्यापरपर्यायसूर्यकृतमासरूपकालाना मप्यादित्यत्वम्, सौरत्वेन च तेषां द्युस्थानत्व मपि सुवचम्।

गुरुचरणैस्त्विह— 'निरुक्ते व्याख्याताः सवित्रादयो द्वादश सूर्यविशेषा एवादित्याः'–इत्युपदिष्टम्। तथाच १२. २, ३ख०—

"सविता, ०—०—० तस्य कालो यदा द्यौरपहततमस्काकीर्ण-रश्मिर्भवति"–इत्याद्युक्तः प्रथम आदित्यः।

"भगः, तस्य कालः प्रागुत्सर्पणात्"–इत्याद्युक्तो द्वितीयः।

"सूर्यः, सर्त्तेर्वा सुवतेर्वा स्वीर्यतेर्वा"–इत्याद्युक्तस्तृतीयः। 'स पुनरयं भगकालात् सृतः सूर्यो भवति'–इति तत्र दौर्गी वृत्तिः।

"अथ यद्रश्मिपोषं पुष्यति, तत् पूषा भवति"–इत्याद्युक्त-स्तुर्थः। 'आपूर्णस्तेजसा'–इति तद्वृत्तिः।

यद् विषितो भवति, तद् विष्णुर्भवति"–इत्याद्युक्तः पञ्चमः।

[प्रत्यृतः सर्वाणि भूतानि ७. ६. १.]"–इत्याद्युक्तः षष्ठः।

र्णोतीति सतः १०. १. ३.]"–इत्याद्युक्तः सप्तमः।

रश्मयस्तद्वान्"–इत्याद्युक्तोऽष्टमः।

"अथ यद्रश्मिभिरभिकम्पयन्नेति"–इत्याद्युक्तो हृषाकपिर्नवमः ।
'वर्षिता चावश्यायानां कम्पनश्च भूतानाम्'–इति तद्वृत्तिः ।
"यमः [यच्छतीति सतः १०. २. ६.]"–इत्याद्युक्तो दशमः ।
"अजएकपाद्, अजनः एकः पादः ; एकेन पादेन पातीति वैकेन पादेन पिबन्तीति वैकोऽस्य पाद इति वा"–इत्याद्युक्त एकादशः ।
"अजश्चैकपाद्"–इति च तत्र तत उत्तरम् ।
"[सम्मोदन्तोऽस्मिन् भूतानि २. ३. १.]"–इत्याद्युक्तो द्वादशः ।

तादेत्थं द्वादशमासकाला द्वादशविधसूर्या वा द्वादश आदित्या गम्यन्ते । अभिधानभेदात् कर्मभेदाच्च देवताभेदो नैरुक्तादिसम्मत एव । अतएव एकस्यैव तेजसोऽग्निविद्युत्सूर्येति त्रित्वम् , अप्येकस्यैवाग्नेः अग्निः, जातवेदाः, द्रविणोदाः, वैश्वानरः इति चत्वार्यभिधानानि पृथक्देवतात्वेनाम्नातानि (निघ० ५. १. २.) । उक्तञ्चेदं निरुक्ते स्फुटम्— कर्मपृथक्त्वात्०—० पृथग्घि स्तुतयो भवन्ति तथाभिधानानि"–इत्यादि ७. २. १ द्रष्टव्यम् ।

अदितेः पुत्रा इति चादित्याः श्रुतिपरिचिताः सन्त्यष्टौ, तथाहि ऋ० सं० २. २७. १, य० वा० सं० ३४. ५४—
"इमा गिर आदित्येभ्यो घृतस्नूः सनाद् राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः"–इति ।

अत्र 'तुविजातः'–इत्यस्य 'बहुजातश्च धाता'–इत्यर्थः कृतो यास्केन (१२. ४. २.) । तदेव मन्त्रा मृचि सप्तादित्यनामानि श्रुतानि ; अष्टमस्त्वादित्यो मार्त्तण्डनामा । स चान्यत्र श्रुतः तद्यथा ऋ०सं० १०. ७२. ८—

"सप्तभिः पुत्रैरदितिरुप प्रैत् पूर्व्यं युगम् ।
प्रजायै मृत्यवे त्वत् पुनर्मार्त्ताण्ड माभरत्"

उपपद्यते चैवम् "अष्टौ पुत्रासो अदितेः"–इति (ऋ० सं०. १०. ७२. ८.) श्रुतिश्च। "अदितिरन्तरिक्षम्"–इत्यैतरेयकम् (३. ३. ७.)। "अदितिरदीना देवमाता"–इत्यादि च नेरुक्तम् (४. ४. २, ३.)। त एतेऽष्टावादित्या आन्तरिक्ष्या इत्येषां नात्रोपयोग इति च ध्येयम् ॥

अथ प्रदर्शितैतरेयश्रुतिसमाम्नानक्रमतः प्रजापतिं निरूपयामः— 'प्रजापतिः'–इति पदं निघण्टावन्तरिक्षस्थानेष्वाम्नातम् (५. ४. २८.)। "प्रजापतिः, प्रजानां पाता वा पालयिता वा" --इत्याह यास्कः (निरु० १०. ४. ५.)। "प्रजापतिर्वा इद मेक एवाग्र आस, सोऽकामयत प्रजायेय भूयान्त्स्या मिति"--इत्यादि च ऐ. ब्रा. २. ५. १। तदित्थं परमेश्वर एव प्रजापतिरभिगम्यते। कालवाच्यपि प्रजापतिशब्दः श्रूयते— "संवत्सरः प्रजापतिः ; सोऽस्य सर्वस्य प्रजनयिता"--इति च तत्रैव (२. ५. ७.)। "प्रजापतिश्चरति गर्भे अन्तः"--इति (य. वा. सं. ३१. १९.) श्रुतेः जीवोऽपि प्रजापतिर्गम्यते। "यः (प्रजापतिः) देवेभ्य आतपति" –इत्यादि च तत्रैव (३१. २०.), "प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीम्"--इत्याद्यैतरेयकम् (४. २. १.), प्रजापतिर्वै स्वां दुहितर मभ्यध्यायत् , तद्दिव मित्यन्य आहुः उषस मित्यन्ये"–इत्यादि च तत्रैव (३. ३. ९.)। एवमाद्याम्नायेभ्यः [illegible]ऽपि प्रजापतिरवगम्यते। "एष वै प्रजापतिर्यदग्निः"–इति [illegible]तरीयकम् (ब्रा० १. १. ५. ५.)। "प्रजापतिर्हि वाक्" [illegible]त्र तदुत्तरम् (१. ३. ४. ५.)। "रूपं वै प्रजापतिः" [illegible] वै प्रजापतिः"–इति च तत्रैव (२. २. ७. १.)। [illegible]"–इति च तै० ब्रा० १. ३. १०. १०। शत-

पथब्राह्मणे "कतमः प्रजापतिः"–इत्याशङ्क्य "यज्ञः प्रजापतिः" –इति समाहितम् (१२. ५प्र. ७.)। तैत्तिरीयसंहितायान्तु "मन इव हि प्रजापतिः"–इति (६. ६. १०. ३.) मनसोऽपि प्रजापतित्व माम्नातम्। "प्रजापतिः स्यात् वायुराकाश आदित्यो वा"–इति चाह मीमांसासूत्रभाष्ये शबरः (१. २. १०.)। तदित्थं प्रजापतिशब्दो बह्वर्थः। अत एवाम्नात मिह— "अपरिमितो वै प्रजापतिः"–इति (६. १. २.)। शतपथे ऽप्येवं श्रुतम्— "सर्वं वा इदं प्रजापतिर्यदिमे लोका यदिदं किञ्च"–इति (५. १. ३. ११.)। एव मपि "दिवो धर्ता भुवनस्य प्रजापतिः (ऋं. सं. ४. ५३. २.) –इत्याद्याम्नानप्राबल्यात् आदित्य एव मुख्यः प्रजापतिरित्यस्माकम् ॥

अथैहैतरेये सोमप-देवानां त्रयस्त्रिंशत्सङ्ख्यापूरको वषट्कारः श्रुतः। "वौषडिति वषट्कारः"–इत्याहाश्वलायनः (श्रौ० सू०) १. ५. १२। "उच्चैस्तरां वा वषट्कारः"–इति च पा० सू० १. २. ३३। "यस्यै देवतायै हविर्गृहीतं स्यात्, तां मनसा ध्यायेद् वषट् करिष्यन्निति ह विज्ञायते"–इत्याह यास्कः (निरु० ८. २. ७.)। श्रुतञ्चैतद् वचन मिहैतरेये। तथाहि— "यस्यै देवतायै हविर्गृहीतं स्यात्, तां मनसा ध्यायेद् वषट् करिष्यन् साक्षादेव तद्देवतां प्रीणाति, प्रत्यक्षाद् देवतां यजति"–इति ३. १. ८। तदित्थं वौषडिति उच्चैर्ध्वनिरेव वषट्कारो देव इति सुवचम्। यत्त्वाम्नातं शतपथे — "प्राणो वै वषट्कारः"– (४. २. १. २९.) तन्नु स्यादौपचारिकम्; उच्चैर्ध्वनिः बलवता मेव भवतीति ॥

शतपथब्राह्मणे हि वस्वादिषु त्रयस्त्रिंशत्सङ्ख्यावे कारो न श्रूयते, श्रूयते त्विन्द्रपरः। तथाहि—

दश रुद्रा द्वादशादित्यास्त एकत्रिंशत्, इन्द्रश्च प्रजापतिश्च त्रयस्त्रिंशौ"–इति ११. ६. ३. ५। तत्रैवोत्तरत्र (१४. ५प्र० ७.)— "कतम इन्द्रः ?"–इत्याशङ्क्य "स्तनयित्नुरेवेन्द्रः"–इति सिद्धान्तितम्। अत्र स्तनयित्नुहेतुर्मेघचालको वायुरेवार्थो बोध्यः। तथा तत्रैव तत उत्तरं श्रुतम्— "कतमः स्तनयित्नुः ?"–इति प्रश्नपूर्वकम् "अशनिरिति"–इति। अत्राप्यशनिहेतुः स्तनयित्नुरित्येवार्थः प्रतीयते। यास्काचार्येण त्विन्द्रशब्दो बहुधा निरुक्तो बह्वृदाहृतश्च (४. ५. ७. २.); ततोऽपि मेघचालको वायुरेवेन्द्र इति प्रधानतोऽवगम्यते, परमेश्वराऽऽदित्यकालाद्यर्थाश्च गम्यन्ते यथाप्रकरणम्। तदेतत्सर्वं मत्कृतायां नैरुक्तदेवतसूच्यां सूचितम्, तन्निर्वचनादिकन्विहाप्यनुपदं दर्शयिष्यामः॥

अपि शतपथे ब्राह्मणे (४. २. ७. २.) सोमपदेवेषु द्यावापृथिव्योर्द्वात्रिंशत्त्वत्रयस्त्रिंशत्त्वे अभ्युपगम्य, तेषा मुत्पादकस्य प्रजापतेश्चतुस्त्रिंशत्त्वञ्चाम्नातम्। तथाहि— "अष्टौ वसव एकादश रुद्रा द्वादशादित्या इमे एव द्यावापृथिव्यौ त्रयस्त्रिंश्यौ; त्रयस्त्रिंशद्वै देवाः, प्रजापतिश्चतुस्त्रिंशः"–इति॥

अथासोमपानाम्।— तत्र प्रयाजदेवानां परिचयाय ऐतरेयोक्तं "समिधो यजति"–इत्यादिकमेवेष्टम् (२. १. ४.)। तैत्तिरीयेऽप्येवम्— समिधः, तनूनपात् नराशंसो वा, इडः, बर्हिः, उषासानक्ता, देव्याहोतारा, तिस्रो देव्यः, त्वष्टा, वनस्पतिः, त्रयः,— इत्येवैकादशविधाः (ब्रा० ३. ६. २.)। प्रधानस्य ये या एकादश आहुतयो हूयन्ते, ता एव प्रयाजाहुतयः उच्यन्ते। तन्मन्त्राणां देवाप्रीणनहेतुत्वात् वेदेषु ते त्वाप्रियो यद्यप्याम्नाताः सर्वत्र द्वादश,

समिदादयः प्रयाजदेवता अपि द्वादशैव श्रुताः, तथापि तत्र द्वितीयतृतीययोर्वैकल्पिकत्वेन विधानादेकत्वसिद्धेरेकादशैव पर्यवसन्ना भवन्ति। तदेतत् सर्वं सर्वब्राह्मणेषु विश्रुतम्, भगवता यास्केन च स्पष्टीकृतम् (८. ३. ७.)। समिदादिव्याख्यानञ्च निरुक्तादौ सुव्यक्तम्, यथा— "इध्मः (समिधः) समिन्धनात्०—० यज्ञेध्म इति कात्थक्यः", "तनूनपात् आज्यं भवति", "नराशंसो यज्ञः", "इडः०—० ईडितव्यः (यज्ञियाग्निः)", "बर्हिः परिवर्हणात् (कुशः)", "द्वारः (दुरः)०—० गृहद्वारः", "उषासानक्ता= उषाश्च नक्ता च; उषा व्याख्याता (रात्रेःअपरः कालः), नक्तेति रात्रिनाम", "दैव्याहोतारा= दैव्यौ होतारौ; अयञ्चाग्निरसौ च मध्यमः", "तिस्रो दैव्यः ('इडा', 'भारती', 'सरस्वती')", "त्वष्टा= माध्यमिकः (रूपकृत्)", "वनस्पतिः= यूपः", "स्वाहाकृतयः, स्वाहेत्येतत् सु+आहेति वा, स्वा वागाहेति वा, स्वं प्राहेति वा, स्वाहुतं हविर्जुहोतीति वा"–इति (८.२. १—८. ३. ५.)। "दैव्याहोतारा= नेष्टापोतारौ"–इति तै० ब्रा० ३. ६. १३. ६। 'दैव्यहोत्रशब्दवाच्यौ षष्ठानुयाजदेवस्य द्वौ देहौ'–इत्यादि तत्र सा० भा०। तथाच तत्तन्नामकौ द्वात्रिंशौ। तदेव मिध्मादयः स्वाहाकृत्यन्ताः सर्व एवैमे पदार्था यज्ञसम्बन्धित्वात् देवत्वेन श्रुता इत्येव ब्राह्मणकृता माशयः फलितः॥

एवं प्रधानयागस्य पश्चाद् या एकादश आहुतयो हूयन्ते एवानुयाजाहुतयोऽनुयाजयागा वा उच्यन्ते। तासा मेक[illegible] माहुतीनां देवा इहैतरेये न श्रुतास्तैत्तिरीयके त[illegible] तद्यथा— "बर्हिः, द्वारः, उषासानक्ता, जोष्ट्री, ऊ[illegible] होतारा, तिस्रो देव्यः, नराशंसः, वनस्पतिः, त्व[illegible]

इति तै० ब्रा० ३. ६. १२. १४ । अत्र बर्हिषो द्विरुपादानं किञ्चिद्-विशेषाभिप्रायम् , तत् तत्रैव द्रष्टव्यम् ॥

उपयाजदेवाना मपि परिचयस्तैत्तिरीयत एवावगम्यते । तद्यथा—"समुद्रः, अन्तरिक्षम् , सविता, अहोरात्रे, मित्रावरुणौ, सोमः, यज्ञः, छन्दांसि, द्यावापृथिव्यौ, दिव्यं नभः, वैश्वानरः,—इति (तै० सं० १. ३. १. ; ६. ४. १. ६—१६.) ॥

एवञ्च सोमपासोमपदेवानां समुदितानां कृत्वा चतुष्षष्टिः पञ्चषष्टिर्वा गम्यते । इतोऽतिरिक्ता अपि सन्ति ये पारिभाषिका देवास्तेषां परिगणन मसम्भव मेव । तदेवं देवाना मसङ्ख्येयत्वेऽपि दार्शतय्यां प्रधानतया अग्निवायविन्द्रसूर्याणां स्तुत्यादिदर्शनात् त एव चत्वारो देवा मुख्या गण्यन्ते ; तत्रापीन्द्रस्य प्रायो वायुविशेषत्वेनो-पगमात् देवतात्रित्व मेव सम्पद्यते । तदाह यास्कः— "तिस्रो देवता इति नैरुक्ताः ;— "अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्त-रिक्षस्थानः सूर्यो द्युस्थानः"—इति (७. २. १.) । तदेव मत्र पृथिव्या मग्निरेव मुख्यो देवः, जलादयस्तदे कस्थानास्त्वप्रधानाः, अश्वादयश्चेतना इध्मादयोऽचेतनाश्च पारिभाषिकाः । अन्तरिक्षे वायुर्वेन्द्रो वा मुख्यो देवः, पर्जन्यादयस्तदेकस्थानास्त्वप्रधानाः, श्येनादयोऽन्तरिक्षचराश्चेतना वागादयोऽचेतनाश्च पारिभाषिकाः । द्युलोकेऽप्येवं सूर्यो मुख्यः, अक्षिप्रभृतयस्तदेकस्थानास्त्वप्रधानाः, रिभाषिकदेवास्तु तत्र नैव सन्तीति गम्यते ; ब्राह्मणग्रन्थेषु तत्र-नथाविधाना मनुल्लेखादिति ॥

पारिभाषिकदेवत्व मापन्नाना मश्वशकुन्यादीनाञ्चे-ीध्मवागादीना मचेतनानाञ्च देवशरीरवत्त्वं कलत्रा-षादियुक्तत्वञ्च नास्तीति तु लाङ्गलस्कन्ध-पांशुल-